Bhaktidúti. A poem in praise of devotion to Kṛishṇa, and the means of attaining it. By Káliprasáda S'armá.

Beginning. नत्वा श्रीनाथपादाम्बुजमतिरुचिरं भोगमोचैकहेतुं
नित्यानन्दप्रबोधं सकलसुरनरैः सेवितं तत्त्वसारम् ।
श्रीमान् कालीप्रसादो द्विजकुलवरजो मुक्तिकान्ताभिलाषी
भक्तिं दूतीं हितज्ञां रचयति चतुरां चारुशीलां मनोज्ञाम् ॥ १ ॥

End. रमणिरपि परा भक्तिदूत्या समाप्ता ॥ २२ ॥

विषयः । भक्तिरसाश्रितं त्रयोविंशतिपद्यात्मकं काव्यं ।

No. 1052. अनुमानदीधितिः ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 134. Lines, 5—6 on a page. Extent, 3216 s'lokas. Character, Bengali. Date, Sk. 1658. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct.

Anumána-didhiti. An old complete and very correct text of S'iromaṇi's gloss on the Anumána-chintámaṇi of Gaṅges'a. Vide ante No. 495, Vol. I. p. 285.

Beginning. ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परजुष्टनयान्निवर्त्तमाना मनमास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥
मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ॥
पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुमान-निरूपणं प्रतिजानीते प्रत्यक्षेत्यादि ।

End. तथापि जन्यत्वशरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न च भावसम्भव इत्यत्र तात्पर्यम् ॥

Colophon. इति महामहोपाध्यायश्रीमद्भट्टाचार्यात्मजशिरोमणिकृता अनुमानदीधितिः समाप्ता ।

विषयः । महामहोपाध्यायगङ्गेशोपाध्यायकृतचिन्तामणिग्रन्थीयानुमानखण्डस्य व्याख्यानम् । ७८१ सं० द्रष्टव्यम् ।

No. 1053. प्रत्यक्षचिन्तामणिदीधितिटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 16. Lines, 7 on a page. Extent, 630 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, fresh. Prose. Correct.

Pratyakshachintámaṇi-didhiti. S'iromaṇi's gloss on the Pratak-sha-chintámaṇi of Gaṅges'a. Vide ante, No. 495, Vol. I. p. 285.

Beginning. नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरा-
दुर्वीमण्डलमण्डलायितयशोराशेरशेषा गिरः ।
सङ्क्षिप्तोन्नयतिदक्षदीधितिहृतः प्रत्यक्षचिन्तामणेः
व्याख्यां सङ्कुरुते गदाधरसुधीर्मोदाय विद्यावताम् ॥
गुरुकीर्त्तनरूपमङ्गलं कुर्वाण एव स्वीयग्रन्थे प्रेक्षावतात् प्रवृत्त्यर्थं दर्शयति गिरमिति ।

End. भ्रमे विशेष्यानुयोगिकविशेषणप्रतियोगिकालौकवैशिष्ट्यभानमवलम्ब्येदम् अ-न्यथा भ्रमत्र (इतः खण्डितम्) ।

विषयः । प्रत्यक्षदीधितिव्याख्यानम् ।

No. 1054. बौद्धाधिकारदीधितिटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 12. Lines, 7—8 on a page. Extent, 540 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Bauddhádhikára-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha S'iromaṇi on Udayana's refutation of the atheism of Buddhist philosophy, and defence of Deism against infidelity generally. By Gadádhara. *Vide* Hall's Contributions, pp. 81-82.

Beginning. श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः ।
बौद्धाधिकारविवृतिं व्याकरोति शिरोमणेः ॥

End. शब्दत्वादिधर्मसमूहरूपस्याननुगमात् तथा च तैः (इतः खण्डितम्)

विषयः । बौद्धाधिकारदीधितिव्याख्यानम् ।

No. 1055. कुसुमाञ्जलिव्याख्या ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 27. Lines, 7—8 on a page. Extent, 1215 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Kusumáñjali-káriká-vyákhyá alias *Kusumánjali-vyákhá.* A commentary on the Kusumáñjali of Udayana A'chárya. By Haridása Nyáyálaṅkára Bhaṭṭáchárya. Two editions of this work have appeared in Calcutta, one bearing date 1769, and the other edited by Professor Cowell in his edition of the Kusumáñjali. Hall's Contributions, p. 83.

Beginning. ईषदीषदनधीतविद्यया तातमात्मसुदमाविवर्द्धयन् ।
चेपणाय भवकर्मजन्मनां कोऽपि गोपतनयो नमस्यते ॥
इष्टदेवतासङ्कीर्त्तनं अस्मप्रतिपादकसच्छब्दप्रयोगात्मकञ्च मङ्गलं कुर्वन् ग्रन्थनामाह । सत्पचप्रसरः——

End. नावासयेत्ततः किमस्माकम् ॥०॥

Colophon. इति महामहोपाध्यायश्रीहरिदासन्यायालङ्कारभट्टाचार्यविरचिता कुसुमाञ्जलिव्याख्या समाप्ता ॥

विषयः । कुसुमाञ्जलेर्व्याख्या ।

No. 1056. व्याख्याप्रकाशः ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 9. Lines, 9 on a page. Extent, 546 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, fresh. Prose. Generally correct.

Vyákhyá-prakás'a. A gloss on the last named work. Anonymous. This is reported by the pandit who examined it to be distinct from the Kusumánjali-prakás'a of Varḍhamána Upádhyáya. Hall's Contributions, p. 83.

Beginning. प्रारम्भपत्रं नास्ति । द्वितीयपत्रारम्भे "यक विषयतायां ग्टहत्त्वित्वप्रकारतानिरूपितदेवदत्तादिविषयताकप्रमात्वविरहत्वे सति——

End. यस्मादित्यस्य प्रश्नेष्टेन्वयः। शङ्का तु एष वेदप्रामाण्यसंशयोद्भेदेन कलङ्को येषां तैरपरै र्बौद्धादिभिः किं किमनिष्टमिति ॥

Colophon. इति चतुर्थस्तवकव्याख्याप्रकाशः ॥

विषयः। कुसुमाञ्जलेर्व्याख्यानाम्नीटीकाया व्याख्यानं।

No. 1057. सिद्धान्तमुक्तावलीव्याख्या।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 50. Lines, 8 on a page. Extent, 2,700 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, fresh. Prose. Generally correct.

Siddhánta-muktávalí-vyákhyá alias *Siddhánta-muktávalí-prakás'a, Nyáya-muktavalí-prakás'a, Muktávalí-dípiká, Muktávali-kiraṇa.* A gloss on the Siddhánta-muktávalí, which itself is a commentary on the Bháshá-parichchheda of Haridása. By Mahádeva, son of Válakṛishṇa. It is said that the father commenced this work under the last name, and the son completed it and gave it the 2nd name "which himself or others have expanded or exchanged as above." Hall's Contributions, p. 74. The work is common enough.

Beginning. लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवक्त्राम्बुजात्।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावलीं
गूढार्थां तनुते यथामति महादेवः परेषां कृते ॥

End. हेत्वाभासानिति।——ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभावविशिष्ट-ह्रदादावव्याप्त्यापत्तेः। (इतोऽलिखितमित्यसम्पूर्णम्)।

विषयः। भाषापरिच्छेदस्य टीकायाः सिद्धान्तमुक्तावलीनाम्न्या व्याख्यानम्।

No. 1058. कलापसङ्ग्रहः।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 33. Lines, 10 on a page. Extent, 742 s'lokas. Character, Bengali. Date, Sk. 1652, Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Kalápa-saṅgraha. An abridgment of the Sanskrit Grammar called Kalápa. Anonymous.

Beginning. प्रणम्य परमात्मानं शब्दब्रह्मस्वरूपिणम्।
कलापसङ्ग्रहं कुर्वे बालानां हितकाम्यया॥ आदिचान्तवर्णाः।

End. कृतसुच्छलं कृत्वैव कात्यायनेनोक्तम् "हृचादिवदमी रूढ़ाः कृतिनाम कृताकृतम्॥ इत्युत्तरः पादः॥

Colophon. इति कलापसङ्ग्रहः समाप्तः॥ अत्रैव च शेषपङ्क्तिचतुष्टये व्याकरणशास्त्रीयसञ्ज्ञादिपारिभाषिकशब्दानां नवानां नवलक्षणानि सन्ति। यथा——
१, सञ्ज्ञायते यया सा सञ्ज्ञा। २, सञ्ज्ञायते येन स सञ्ज्ञः। ३, पदयोः पदानां वा मेलनं सन्धिः। ४, वस्तुवाचकाः शब्दाः। ५, कर्त्रादि करोतीति कारकः। ६, समासः सन्धिवत्। ७, क्रियत्प्रत्ययान्तस्तेषु शब्देषु तेषां शब्दानां वा हितस्तद्धितः। ८, सम्यक् कथयतीत्याख्यातः। ९, धातुं शब्दं करोतीति कृत्।

विषयः। कलापव्याकरणस्य विशेषप्रयोजनीयसूत्राणि सोदाहरणानि इह सङ्गृहीतानि।

No. 1059. कोमलकोषसङ्ग्रहः।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 17. Lines, 10 on a page. Extent, 382 s'lokas. Character, Bengali. Date, Sk. 1652. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Verse. Correct.

Komala-kosha-saṅgraha. A Sanskrit vocabulary compiled from the works of Vopálita, Rantideva, author of the Ratna-kosha, Bháguri, Pola, Vararuchi, Rudra, Amara Datta, author of the Dvirúpakosha, Govardhana, authors of the Ratnamálá and of the Visvakosha, Haláyudha, authors of the S'abdárnava, S'abdamálá, Anekártha-dhvanimañjarí. Nánártha, and S'abdakosha, Hadda-chandra, Sas'vata, Subháṅga, Rabhasa Siṅha, Gangádhara, Ajaya, Vyáḍhí, Dharaṇi, and the author of Harakávalí. By Tírtha Svámí.

Beginning. नामानुशासनं वक्ष्येत्यल्पान्मूर्खलशान्तये।
लिङ्गभेदः क्वचित् ख्यातः समानार्था उपेक्ष्यते॥

पुराणागमवेद्यस्य योगार्थस्यागमोऽपि च ।
प्रचरद्रूपशास्त्रेषु ये शब्दा अनुदाहृताः ॥
लिङ्गभेदो न घटतेऽप्येकद्विवचनादिकम् ।
तन्नाथादि न पूर्वेण लिङ्गमिश्रे त्रिषु द्वयोः ॥
क्वचित् कारणनामानि कार्ये कार्याणि कारणे ।
क्वचिदेकार्थके भेदो भेदे चाभेद दृश्यते ॥
बह्वर्थलाभाय बहुवचनं बहुसङ्गते ।
ब्रह्मब्रह्मः स्वः पुरुष आत्मा धर्मौ च पूरुषः ॥

End. अ आ इ ई उ ऊ ऋ ए ओ औ ॐ स्वराव्ययम् ।
पश्यत् कं नकि पश्चाद्धा ही ही ही किम् किन्नु च ॥
एवमन्यत्रान्यत्राधिकवर्णाः क्वचित् क्वचित् ।
सर्वे शब्दाः सर्ववस्तुष्वन्तो लिङ्गभेदतः ॥
पदान्यसाध्वाभासानि साधुविलिङ्गकानि च ।
धृतमानान्यादितत्त्वे शब्दपाठो न विद्यते ॥
समालोक्यानेककोषानिदमेव विनिश्चितम् ।
कोषा दोषाय विदुषां गुणाय गौणशालिनाम् ॥
वोपालितो रन्तिदेवो रत्नकोषस्य भागुरिः ।
पोलो वररुची रुद्रोऽमरदत्तो द्विरूपकृत् ॥
गोवर्द्धनो रत्नमाला विश्वकाशो हलायुधः ।
शब्दार्णवः शब्दमालाऽनेकार्थध्वनिमञ्जरी ॥
नानार्थशब्दकोषस्य रुद्रुचन्द्रस्य शाश्वतः ।
शुभाङ्को रभसः सिंहो नानार्थध्वनिमञ्जरी ॥
गङ्गाधरोऽजयो व्याडी धरणी हारकावली
ततः कोमलकोषस्तु जातो यतिविवेचितः ॥

Colophon. इति तीर्थस्वामिकृतकोमलकोषसङ्ग्रहः समाप्तः ॥

विषयः । विविधकोषेभ्यः प्रसिद्धशब्दा इह सङ्गृहीताः । (अत्र परिच्छेदादयः प्रायोऽमरकोषवत् ।)

No. 1060. श्राद्धकल्पः ।

Substance, country-made yellow paper, 19 × 3½ inches. Folia, 27. Lines 6 on a page. Extent, 1012 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old, Prose and verse. Correct.

S'ráddha-kalpa. Manual for the performance of S'ráddhas, according to the rules of the Sáma Veda. By S'rídatta.

Beginning. स्मृतिगृह्यपुराणादिभूपगोलकसम्मतम् ।
सतां वाक्यानि चालोक्य छन्दोगश्राद्धमुच्यते ॥

End. पितृमातृसपिण्डाद्यभावेऽध पतितायास्तस्या अप्यधिकार इति सर्वं समञ्जसम् ॥

Colophon. इति महामहोपाध्यायश्रीश्रीदत्तविरचितः श्राद्धकल्पः समाप्तः ॥

विषयः । सामवेदिनां पार्वणैकोद्दिष्टादिश्राद्धकर्मणो व्यवस्था ।

No. 1061. व्यवहारचिन्तामणिः ।

Substance, country-made yellow paper, 20 × 3½ inches. Folia, 54. Lines, 6 on a page. Extent, 1560 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Vyavahára-chintámaṇi. A treatise on jurisprudence and judicature, in four chapters. By Váchaspati Mis'ra.

Beginning. आराध्य नन्दनन्दनमनुसन्धाय प्रयत्नतो ग्रन्थान् ।
श्रीवाचस्पतिविबुधो व्यवहृतिचिन्तामणिं तनुते ॥

End. पुत्रस्यानुमतौ पितुस्तद्धनादौ प्रभुत्वमननुमतौ त्वप्रभुत्वमिति समुदायः ॥
इति निर्णयः पादः ॥

Colophon. इति महामहोपाध्यायश्रीवाचस्पतिमिश्रविरचितो व्यवहारचिन्तामणिः समाप्तः ॥

विषयः । अर्थिप्रत्यर्थिभ्यां स्वविवादभञ्जनाय कथं यतितव्यम्, प्राड्विपाकैर्वा तत्र कथं कर्त्तव्यमित्यस्यैवाचोपदेशः । तदत्र चत्वारः पादाः । प्रथमो भाषपादः पूर्वपक्षपादो वा, अत्रार्थिनो यत्नप्रकार आवेदनपत्रलिखनादिक्रम; द्वितीय उत्तरपादः, अत्र प्रत्यर्थिन उत्तरदानप्रकारादिकम्; तृतीयः क्रियापादः, अत्र

प्राड्विपाकैः साक्षिग्रहणादिविचारप्रकारादिकम्; चतुर्थो निर्णयपादः, अत्र जयपराजययोरादेशविधानप्रकारादिकञ्चेति ।

No. 1062. विवादचिन्तामणिः ।

Substance, country-made yellow paper, 20 × 3½ inches. Folia, 18. Lines, 6 on a page. Extent, 519 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Viváda-chintámaṇi. The code of procedure in civil cases. By Váchaspati Mis'ra. The work comprises 18 chapters as follows: 1st, Debts; 2, Trusts; 3, Sales of property by other than rightful owners; 4, Coparcenary; 5, Repudiation of gifts; 6, Wages; 7, Contracts; 8, Sales and Purchases; 9, Disputes between landlords and tenants; 10, Boundary disputes; 11, Forgery; 12, Stolen property; 13, Trespass; 14, Disputes regarding religious ceremonies; 15, Disputes regarding sons begot on one's wife by another; 16, Ditto inheritance; 17, Ditto gambling; 18, Ditto giving evidence. The work was printed in Calcutta some fifty years ago. The author was the son of Kes'ava, and lived about three hundred and fifty years ago (S'aka 1423). Unlike the generality of paṇdits of his country he devoted his attention both to law and philosophy at the same time, and acquired great distinction in both. He wrote several commentaries on standard works on the Nyáya, the Yoga, and the S'ankhya systems of philosophy, and a whole series of manuals on law under the title of Chintámaṇi, besides several independent treatises. "All his works," says Colebrooke, "are held in high and deserved estimation." His son, Lakshmidása, was also an author of some repute.

Beginning. क्षीराब्धेरुज्जिहानां त्रिदशपरिषदि प्रोल्लसद्भ्रूविभङ्गी-
मङ्गीकुर्वन् कटाक्षैस्त्रिभुवनजननीं व्रीडया नम्रमौलिः ।
देवः पायादपायात् कुसुमशरपरीरम्भसञ्जातभावः
सद्यः स्विद्यत्तरेण स्मितकमलमुखीमाददानः करेण ॥ १ ॥
श्रीकृत्यकल्पद्रुमपारिजातरत्नाकरादीनवलोक्य यत्नात् ।
वाचस्पतिः श्रीपतिनम्रमौलिर्विवादचिन्तामणिमातनोति ॥ २ ॥

End. अथ ऋत्विजि हते पश्चादन्यं वृणुयात् पूर्वहतस्यैव दक्षिणां पश्चाद्वृतः किञ्चिल्लभेत्———ऋत्विजोऽपतितस्य (इतः परं न लिखितं ततोऽसमाप्तम्) ॥

विषयः। उत्तमर्णाधमर्णादीनां विवादादिनिरूपणम्। अत्राष्टादश परिच्छेदाः। तथा हि—१मे, ऋणादानम्, ऋणग्रहणविषयको वादः। २ये, निक्षेपः स्थापितधनविषयको वादः। ३ये, अस्वामिविक्रयः, अन्यस्य द्रव्यम् अन्येन विक्रीतम् तद्घटितो वादः। ४र्थे, सम्भूयसमुत्थानम्, कतिपयधनिभिर्मिलित्वारब्धे वाणिज्ये यो वादः। ५मे, दत्तस्यानपकर्म, दानं कृत्वा ततोऽनङ्गीकारः। ६ष्ठे, वेतनादानम्, भृतिं कारयित्वा तन्मूल्यादीनामप्रदाननिबन्धनो वादः। ७मे, सम्बिद्व्यतिक्रमः, प्रतिज्ञाभङ्गे वादः। ८मे, क्रयविक्रयनिबन्धनो वादः। ९मे, राज्ञा भूस्वामिना वा सह प्रजानां वादः। १०मे, ग्राम-क्षेत्र-भवनादीनां सीमावादः। ११शे, पारुष्यनिमित्तको वादः। १२शे, स्तेयजातवादः। १३शे, साहसम्, बलपूर्वकं परद्रव्यहरणं तत्रोत्थितो वादः १४शे, पर्वघटितो वादः। १५शे, क्षेत्रजपुत्रादिविषयको वादः। १६शे, दायानां विभागे वादः। १७शे, द्यूतक्रीड़ाजनितवादः। १८शे, आक्रयः, साक्षिदानादिकार्य्ये आक्रयनीयानाक्रनीयविषयको वाद इति ॥

No. 1053. आत्मप्रबोधोपनिषत्।

Substance, country-made yellow paper, 18½ × 3½ inches. Folium, 1. Lines, 14. Extent, 27 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance, old. Prose. Generally correct.

A'tmaprabodha Upanishad. An apocryphal Upanishad on the divinity of Krishṇa, and on the best mode of worshipping him: attributed to the Atharva Veda.

Beginning. प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपं, अकार उकार मकार इति त्र्यक्षरं प्रणवं तदेतदोमिति यमिष्ट्वा मुच्यते योगी जन्मसंसारबन्धनात्।

End. आत्मप्रबोधोपनिषदं मुहूर्त्तमुपासित्वा न स पुनरावर्त्तते न स पुनरावर्त्तते।

Colophon. आत्मप्रबोधोपनिषत् समाप्ता ॥

विषयः। नारायणस्योपासना ब्रह्मधिया, अत्रोपासनायां लक्षितस्य नारायणस्य देवकीपुत्रत्वेनापि भावना वर्त्तते।

No. 1064. श्राद्धविवेकविवृतिः ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 52. Lines, 7 on a page. Extent, 2070 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa Rámavilása S'armá. Appearance, old. Prose. Generally correct.

S'ráddha-viveka-vivriti. A commentary on Sullpáni's treatise on S'ráddhas, the *S'ráddha-viveka.* By S'ríkrishṇa S'armá.

Beginning. पादाम्बुजे द्वे भुवनावलम्बे प्रणम्य भूयो जगदम्बिकायाः ।
श्रीकृष्णविप्रो विवृतिं वितेने बुधाद्दते श्राद्धविवेकसङ्ग्रहे ॥
ग्रन्थारम्भे विघ्नविघाताय देवतानामकीर्त्तनरूपं मङ्गलमाचरन् शिष्यप्रवृत्त्यर्थं ग्रन्थस्याभिधेयप्रयोजनसम्बन्धांश्च प्रदर्शयन् शिष्यावधानाय प्रतिजानीते वि-लोक्येति ॥

End. तेनेति, न च कृष्णपक्षे दशम्यादौ वर्ज्जयित्वा चतुर्द्दशीमित्यादिवचनात् चतुर्द्दशीवर्ज्जनेन कथं पञ्चदशश्राद्धानामिति । सामान्यकृष्णपक्षश्राद्धाचतुर्द्दशी-वर्ज्जनस्योक्तत्वात् । (इतः खण्डितम्)

विषयः । शूलपाणिकृतश्राद्धविवेकसङ्ग्रहस्य व्याख्यानम् ॥

No. 1065. महिम्नस्तवटीका समूला ।

Substance, country-made yellow paper, 10 × 3½ inches. Folia, 21. Lines, 8—9—10 on a page. Extent, 500 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance, old. Prose and verse. Incorrect.

Mahimnastava Ṭíká. A commentary on the popular hymn to S'iva called Mahimnastava. By Bhagíratha Mitra.

Beginning. (द्वादशपत्राणि खण्डितानि ततश्लोकायाः प्रारम्भवाक्यं न लिखितं मूलस्यापि द्वादशश्लोकाः न सन्ति अतस्तस्यादिप्रारम्भवाक्योल्लेखो निष्प्रयोजनीय इति मन्तव्यम् ।)

End. विपाकः परिपूर्णता यस्याल्पबुद्धित्वात् ॥ ३१ ॥
(एकत्रिंशच्छ्लोकपर्य्यन्तस्यैव टीका दृश्यते, ततोऽन्तिमयोः परिचायकफलश्रुत्यात्म-कयोर्नास्ति ।)

Colophon. इति श्रीभगीरथमिश्रविरचितमहिम्नस्तवटीका समाप्ता ॥

विषयः। पुष्पदन्तप्रणीतमहादेवस्तुतिव्याख्यानं।

No. 1066. रथपद्धतिः।

Substance, country-made yellow paper, 13½ × 3½ inches. Folia, 3. Lines, 8 on a page. Extent, 78 s'lokas. Character, Bengali. Date ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance, new. Prose and verse. Generally correct.

Ratha-paddhati. Rules for the observance of the Car Festival. By Lakshmíkánta Nyáyabhushaṇa Bhaṭṭáchárya. The work was compiled about fifty years ago under the auspices of Mahárájá Girís'achandra Ráya of Krishnanagar, in Nuddea. It opens with an account of a car festival for the goddess Durgá, and then gives the usual rules for the festival in connexion with Jagannátha.

Beginning. श्रीगोपालगिरीशवन्द्यशुभदश्यामाङ्घ्रिपङ्केरुहं,
नत्वा श्रीलगिरीशचन्द्रनृपतेः क्षौणीशचूड़ामणेः।
आदेशाद्रथपद्धतिं बुधमनोध्वान्तान्तिकां चन्द्रिकां,
लक्ष्मीकान्तसुधीस्तनोति कलयन् स्मृत्यादिशास्त्रं मुहुः॥

End. यात्रायाः नवदिनसाध्यत्वात् दशम्यां दक्षिणादिकं कुर्य्यात्।

Colophon. इति श्रीमहामहोपाध्यायश्रीयुतलक्ष्मीकान्तन्यायभूषणभट्टाचार्य्यैर्विरचिता पण्डितवर्गैः परिशोधिता रथपद्धतिः समाप्ता॥

विषयः। महादेवीमहोत्सवविधिः, ततो रथप्रतिष्ठायां विधिं दत्वा तस्या प्रयोगः। ततोऽङ्कुरार्पणे विधिः। अधिवासविधितत्प्रयोगौ। ततो द्वितीयावधिदशमीं यावत् नारायणपूजनादिकप्रयोगः।

No. 1067. कामाख्यातन्त्रम्।

Substance, country-made yellow paper, 15 × 3 inches. Folia, 21. Lines, 6 on a page. Extent, 401 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance fresh. Verse. Incorrect.

Kámákhyá Tantra. An original Tantra of the Kaula class, devoted to the worship of the female emblem with the usual adjuncts of wine, flesh-meat, women, &c. The work comprises nine chapters, the last of which treats of the different kinds of emancipation from the bondage of transmigration recognised by the Tantras.

Beginning. ॐ नमः परदेवतायै । श्रीदेव्युवाच ।
भगवन् सर्वधर्मज्ञ सर्वविद्याप्रियप्रभो ।
सर्वदानन्दहृदय सर्वागमप्रकाशक ॥
श्रुतानि सर्वतन्त्राणि साधनानि च भूरिशः ।
विद्यास्ताः सकला देवाः फलन्ति त्वत्प्रसादतः ॥
सारात्सारतरं तन्त्रं जानासि तद् वद प्रभो ।
अतीवेदं रहस्यानं तेनाहं श्रवणोद्यता ॥
श्रीशिव उवाच । शृणु देवि महाभद्रे मदीयप्राणवल्लभे ।
योनिरूपा महाविद्या कामाख्या वरदायिनी ॥
वरदानन्ददा नित्या महाविभववर्द्धिनी ।
सर्वेषां जननी सापि सर्वेषां तारिणी मता ॥
रमणी चैव सर्वेषां स्थूला सूक्ष्मा सदा शुभा ।
तस्यास्तन्त्रं प्रवक्ष्यामि सावधानावधारय ॥

End. एतत्ते कथितं स्नेहान्न प्रकाश्यं कदाचन ।
गोपनीयं गोपनीयं गोपनीयं सदा प्रिये ॥
पशोरग्रे विशेषेण गोपनीयं विशेषतः ।
भ्रष्टानां साधकानाञ्च सान्निध्ये न वदेदपि ॥
दाम्भिकाय न दातव्यं अभक्ताय विशेषतः ।
मूर्खाय भावहीनाय दरिद्राय ममाज्ञया ॥
दद्याच्छान्ताय शुद्धाय कौलिकाय महेश्वरि ।
कालीभक्ताय शैवाय वैष्णवाय शिवाज्ञया ॥
अद्वैतभावयुक्ताय महाकालप्रजापिने ।
सुराक्षीबन्धकायापि शिवाबलिप्रदाय च ॥

Colophon. इति कामाख्यातन्त्रे पार्वतीश्वरसंवादे नवमः पटलः ॥ (नवमपटलान्तमेवेदं)

विषयः । अस्य पटला नव सन्ति, तत्रादौ कामाख्यायाः महादेव्याः तन्मूलकस्यास्य तन्त्रस्य चोत्कृष्टताप्रकीर्त्तनम् । द्वितीये।—कामाख्यामन्त्रोद्धारः, कामाख्या-

पूजाप्रकारः, योनिपूजा। अथ तत्र देव्या अवस्थानात् तत्पूजया विना महादेव्याः सिद्धासम्भव इत्युपक्रम्य तस्याः पूजावश्यकताप्रकथनं किञ्च सामान्ययोनीनां परस्त्रीयोनयः प्रशस्तास्तास्वपि वेश्यायोनेः पूजायां फलप्राशस्त्यकथनम्। तृतीये।—वरमन्त्रोद्धारः तस्य ध्यानं अष्टोत्तरशतयोनिसञ्चुम्बनपूर्वकं लिङ्गसंश्लिष्टयोनौ जपप्रकारादिश्च। चतुर्थे।—सद्गुरुलक्षणम्, ज्ञानं यत्र समाभाति स एव सद्गुरुरित्युपक्रम्य ज्ञानस्य विशेषतः प्रशंसनं, पशुगुरु(अधमगुरु)लक्षणं, तस्मान्मन्त्रादिग्रहणे निन्दा, मनुष्याणां दिव्यवीरपशुभेदेन त्रैविध्यकथनं तत्तल्लक्षणञ्च कृत्वा अन्तिमस्य (पशोर्नरस्य) निन्दापुरस्सरं वीरश्रेष्ठत्वखाद्यत्वविधिः, कलियुगे सर्वे एव वीरा न तु पशुसम्भावनसम्भाव्या इति निरूपणम्। पञ्चमे।—मद्यमांसमत्स्यमुद्रामैथुनात्मकैः पञ्चतत्त्वैः पूजनावश्यकत्वे युक्तिकथनं, तैर्विना पूजाया असिद्धिस्तथा कलौ सर्वशास्त्राणां मध्ये विशेषतः पञ्चतत्त्वविहीनानां ब्राह्मणानां निन्दाकथनम्। षष्ठे —मारणम्, उच्चाटनं, शुक्रशोणितमूत्राणां शुद्धत्वे शिववाक्यम्, ब्रह्मज्ञानब्रह्मज्ञानिनोः प्रशंसा, सवर, सदोच, शुद्ध, वेदपारगब्राह्मणप्रशंसा। सप्तमे।—पूर्णाभिषेकः, पूर्णाभिषेचनकर्म्म कारयितुं गुरुविशेषस्याधिकारितानिरूपणम्, कौलिकब्राह्मणप्रशंसा, यत्र ते निवसन्ति तद्देशोऽपि श्रेयानित्युपक्रमे वाराणसीप्रशंसा, योनिगोपनोपमयाऽभिषेचनगोपनविधिश्च। अष्टमे —मुक्तिनिरूपणन्तत्रादौ—षड्दर्शनप्रतिपाद्यमुक्तिस्वरूपस्य निन्दा, ततः सालोक्यसारूप्यसायुज्यनिर्वाणात्ममुक्तिचतुष्कं प्रदर्श्य अन्तिममुक्तेः प्रश्ने, शिवस्य सालोक्यादिचतसृणामपि मुक्तीनां स्वरूपोक्तिः, निर्वाणमुक्तेर्मूर्त्तिविशेषपरिकल्पनेन देवीविशेषसंस्थापनम्, पञ्चतत्त्वैः तस्याश्च सविशेषप्रशंसादिः, कुलद्रव्येषु भक्तेर्मोक्षसाधनताकथनं, कुलज्ञानविधिः, एतन्मन्त्रलाभे प्रशंसा, सर्वशेषे आत्मयोनीन्द्रियमुपसीकृत्य गोप्तुमाज्ञा चेति। नवमे।—पार्वत्या कामाख्यामहादेव्याः स्वरूप-प्रश्ने कृते शिवेन कालीपटलेन ब्रह्मपटलेन च तदाख्यानं कृतं, ततोऽस्य तन्त्रस्य पठनपाठनश्रवणश्रावणादौ कामावाप्तिकथनं, एतदीयमन्त्रस्य सदृष्टान्तप्रशंसा, एतत्तन्त्राधिकृतदेशस्य रोगादिनाशनेन दस्युप्रभृतिवाह्यभीतिनाशनेन सप्तपुरुषं यावत्सम्पत्तिप्रभृतिप्राप्तिकीर्त्तनेन बहुतरप्रशंसा, सर्वान्ते एतद्रहस्यस्य भूरिशः गोपनविधिरधिकारिनिरूपणच्छलेन उपदेश्यानुपदेश्यविधिश्चेति॥

No. 1068. अङ्कुरार्पणविधिः।

Substance, country-made yellow paper, 13½ × 3½ inches. Folia, 3. Lines, 8 on a page. Extent, 78 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Rímavilása S'armá. Appearance, new. Prose and verse. Incorrect.

Áṅkurárpaṇa-viddhi. Ritual for the ceremony of *Áṅkurárpaṇa*, or the placing of certain grains in a vessel for the purpose of germination: founded on the *S'áradátilaka.* Anonymous.

Beginning. अथाङ्कुरार्पणप्रयोगः। यत्र तत्रोत्सवमण्डपस्योत्तरे पूर्वापरायतां गूढां शालां निर्माय तन्मध्ये शुभमण्डलं कुर्य्यात्।

End. उत्सवेषु च सम्पत्तौ विदध्यादङ्कुरार्पणं।

Colophon. इति शारदातिलकोक्ताङ्कुरार्पणविधिः समाप्तः।

विषयः। आदौ मण्डलविधिस्तत्प्रयोगश्च, ततः सूत्रेणावेष्टनपूर्वकं पालिकाचतुष्टयस्य पञ्चमुखीपात्रचतुष्टयस्य शरावचतुष्टयस्य च स्थापनम्, पालिकासु हरेः पञ्चमुखीघटिकासु ब्रह्मणः शरावेषु शिवस्य पूजनं, करीषवालुकामृत्तिकाभिर्यथाक्रमं पूरितेषु तत्त्रिविधपात्रेषु शालिश्यामाकान्नवीजानां वपनविधिः, ततोऽभ्युक्षणाच्छादनौ ततो रात्रौ लाजातिलादिबलिः, अङ्कुरार्पणे सारदा-तिलके क्तप्रमाणम्।

No. 1069. कामदतन्त्रम्।

Substance, country-made yellow paper, 13½ × 3½ inches. Folia, 6. Lines, 8 on a page. Extent, 216 s'lokas. Character, Bengali. Date ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance, new. Verse. Incorrect.

Kámada Tantra. This MS. is a mere fragment, containing only four chapters from the sixth to the ninth, and wanting the first five, and some unknown number of chapters after the ninth. The sixth treats of the mode in which Kálí should be worshipped; the seventh points out the importance of that worship for salvation in the present age; the eighth illustrates the position assumed by the work by an anecdote in which a

Bráhmaṇa of Kánchipur, Bahuloma by name, obtained salvation by hearing the name of Kálí; and the ninth establishes the necessity of worshipping Kálí on the night of the new moon in the month of Kártika.

Beginning. (प्रथमावधि पञ्च पटला न सन्ति। षष्ठस्य त्वादिवाक्यं तावदित्थम्,)
पार्वत्युवाच। इदानीं श्रोतुमिच्छामि येन काली प्रसीदति।
कलौ केनैव पुष्पेन केन वा बलिना शिव॥ श्रीशिव उवाच।

End. यो नार्च्चयति मोहेन रुष्टा तस्य महेश्वरी॥

Colophon. इति कामदतन्त्रे नवमः पटलः॥

विषयः। अत्र षष्ठावधिनवमपर्य्यन्ताः चत्वारः पटलाः सन्ति, तत्रादौ षष्ठे——कलौ काल्या एव सिद्धिदात्वं। तस्याः पूजार्थं शिखाहीनजवापुष्पादेर्विधानम्। ततोऽर्घ्यं-सितापराजितापुष्पादेस्तदनु कल्पद्रोणपुष्पादेश्च विधिः। तथा तस्या अर्च्चने पद्म-विल्वपत्रादेः प्राशस्त्यानुकीर्त्तनम्। विल्वदलं विना शिवयोरर्च्चनायां फलाभाव-कथनम्। एवं करवीर-धुस्तूर-कुन्द-मल्लिका-केतकी-धातकीप्रभृतीनां बहूनां पुष्पाणां पूजने प्रत्येकस्य फलोद्भावनं। सप्तमे—कलौ कार्य्यकरणाशक्तानां कलुषचेतसामलसानां जनानां तन्त्रपूजादिकं विना काऽन्या उद्धारे गतिरिति प्रश्ने कालीनाम्नः स्मृतिरेव तेषामद्वितीया गतिरिति प्रतिपादितं बाहुल्यात्। अष्टमे।—अत्यन्तपापासक्तकाञ्चीपुरनिवासिबहुलोमाख्यविप्रस्य मरणसमये केवलं कालीत्यक्षरद्वयस्य श्रवणं जातं तत्फलवर्णनम्। नवमे।—कार्त्तिके कालीपूजाया अत्यावश्यकताप्रतिपादनम्॥

No. 1070. शूद्रपद्धतिः।

Substance, palm leaves, 14 × 2½ inches. Folia, 110. Lines, 6 on a page. Extent, 3093 s'lokas. Character, Bengali. Date, Sk., 1440 Place of deposit, Navadvípa, Rámavilása Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Generally correct.

S'údra-paddhati. A digest of the laws relating to the S'údras. Compiled by Api Pála. Contents, Duties of S'údras; special mantras for S'údras; duties to be attended to in the morning; ablutions; washing of the face; brushing of the teeth; early morning bath; midday bath; offering of water to the manes; worshipping of the gods;

washing of the images of the Deví; ordinary mode of worshipping the same; adoration of the sun; adoration of Vishṇu; adoration of Deví; repetition of the mystic mantra a stated number of times; adoration of the Vis'vedevás; daily s'ráddhas; characteristics of guests; rules for taking the midday meal; duties after the midday meal; articles to be selected or rejected as food; spirituous drinks defined; rules for sleeping; society of women; periodical s'ráddhas; impurity of the person caused by birth or death in one's family; satí; funerals; persons fit to offer oblations to the manes; perpetual impurity of the body. The work is founded on the plan of Kamalákara's digest of the laws relating to the S'údras, entitled the *S'údra-kamalákara*, and traverses very nearly the same ground, but it professes to have been compiled from a work on the subject by Soma Mis'ra. The MS. bears date S'áka 1440, and is 356 years old.

Beginning. ——————————बालशीतांशुधारी,
गौरीवक्षोजखेलन्मृगमयजनितोरस्थलीभूतवेद्यः।
विभ्रान्ता यस्य (विद्युद्)द्युतिकपिलजटामण्डले———
रचयत्यपिपालोऽसौ धर्मशीलो महामतिः।
श्रीसोममिश्रमादाय प्रयत्नाच्छूद्रपद्धतिम्॥

End. अशौचं सर्वकार्य्येषु गृहे भवति सर्वदा।
दानं प्रतिग्रहः स्नानं सर्वन्तस्य वृथा भवेत्॥

Colophon. इत्यपिपालकारिता शूद्रपद्धतिः समाप्ता॥

विषयः। तत्रादौ शूद्रधर्म्मकथनम्, मन्त्रादिविधिनिषेधौ, ततो नित्याचारेषु शूद्राणां मूत्रपुरीषोत्सर्गविधिः, शौचविधिः, आचमनविधिः, दन्तधावनम्, प्रातःस्नानम्-स्नानविधिः, तर्पणविधिः, तर्पणोत्तरकर्म्म-सामान्यदेवतापूजा, देवीस्नानविधिः, सामान्यपूजा, सूर्य्यपूजा, विष्णुपूजा, शिवपूजा, देवीपूजा, जपविधिः, वैश्वदेवविधिः। नित्यश्राद्धम्। अतिथिस्वरूपम्, भोजनविधिः, तदुत्तरकर्म्म, भोज्याभोज्यनिर्णयः, मद्यस्वरूपम्, शयनविधिः, मैथुनविधिरित्येते प्रोक्ताः। ततस्तेषामेव कर्त्तव्यश्राद्धे तत्कालनिर्णयः, पार्वणादिविशेषश्राद्धस्य प्रयोगः। ततस्तेषामेवाशौचनिर्णयस्तत्र च जननाशौचादिविशेषेषु व्यवस्थाविशेषः, ततो निर्हरणाद्यनुमरणव्यवस्था, प्रवेशनादिः, प्रेतक्रियाधिकारिणः, उदकानर्हाः, यावज्जीवाशौचिनः।

No. 1071. सर्व्वोल्लासतन्त्रम् ।

Substance, country-made yellow paper, 12½ × 4½ inches. Folia, 123. Lines, 8 on a page. Extent, 2214 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, old. Prose and verse. Generally correct.

Sarvollása Tantra. A Tantra digest of the S'ákta class; it treats of the usual S'ákta tenets and forms of worship, beginning with some definitions of S'ákta terms, and various systems of cosmogony. By Sarvánandanátha.

Beginning. नमः परदेवतायै ॥ प्रणम्य प्रकृतिं नित्यां जगदात्मस्वरूपिणीं ।
सर्वोल्लासं महोल्लासं महोल्लासे वदाम्यहम् ॥
निगमादागमाच्छास्त्राद् भावाचारं समुद्धृतं ।
श्रीसर्वानन्दनाथोक्तं श्रीदेव्याश्चरणाम्बुजे ॥

End. देहान्ते ब्रह्मभाग् भवेत् ॥

Colophon. इति श्रीसर्वानन्दनाथविरचिते सर्वोल्लासे विषयोल्लासः । समाप्तोऽयं ग्रन्थः ॥

विषयः । प्रथमोल्लासे——प्रकृतिलक्षणं । निगमलक्षणं । आगमलक्षणं । आगमनिगमयोः प्रकाशकथनम् । यामलोत्पत्तिः । शास्त्रोत्पत्तिः । युगभेदे देशाचारः । देवतामूर्त्तिनिरूपणं । वेदोत्पत्तिकथनं । द्वितीये—तन्त्राख्याकथनं । तृतीये—सृष्ट्युत्पत्तिकथनं । चतुर्थे—प्रकारान्तरेण सृष्ट्युत्पत्तिकथनं । पञ्चमे—पुनरन्यप्रकारेण तदेव । षष्ठे—कृत्यप्रकरणम् । सप्तमे—भावप्रशंसा । अष्टमे—त्रिविधभावाचारलक्षणं । नवमे—तन्त्रान्तरीयभावाचारलक्षणं । दशमे—गुरुतन्त्रीयगुरुलक्षणम् । एकादशे—सद्गुरुलक्षणम् । द्वादशे—वैष्णवाचारः । त्रयोदशे—दशभक्तिः । चतुर्दशे—बलिदानं । पञ्चदशे—शैवाचारः । षोड़शे—विभावपशुलक्षणं । सप्तदशे—यन्त्रप्रमाणं । अष्टादशे—शाक्ताचारः । ऊनविंशोल्लासे—साधकलक्षणम् । विंशत्युल्लासे—श्रीचक्रस्य स्थाननिबोधनं एवं एकविंशत्याद्युल्लासे—श्रीचक्रजातिभेदक्रमेण निरूपणं ज्ञेयम् ।

No. 1072. पदार्थतत्त्वविवृतिः ।

Substance, country-made yellow paper, 17 × 3½ inches. Folia, 27. Lines, 2—9 on a page. Extent, 956 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, fresh. Prose and verse. Correct.

Padártha-tattva-vivriti. A commentary on the *Padártha-tattva,* which comprises criticisms by Raghunátha S'iromaṇi on the Vais'eshika categories. By Mádhava Tarkasiddhánta.

Beginning. यो विष्णवे त्रिजगतः प्रणिधाय भारं
स्वाभीष्टया गिरिजया कुतुकी सदैव ।
देवं तमेव प्रणिपत्य पदार्थतत्त्वे
श्रीमाधवो वितनुते विवृतिं सुबोधां ॥

End. कार्य्यत्वञ्च कारणत्वञ्च प्रतियोगित्वादितो भिन्नमित्यर्थः ॥

Colophon. इति श्रीमाधवतर्कसिद्धान्तकृतपदार्थतत्त्वटीका समाप्ता ॥

विषयः । शिरोमणिकृतपदार्थतत्त्वस्य व्याख्यानम् ।

No. 1073. पदार्थतत्त्वनिरूपणम् ।

Substance, country-made yellow paper, 13 × 3½ inches. Folia, 5 Lines, 7—9 on a page. Extent, 135 s'lokas. Character, Bengali, Date, ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, fresh. Prose and verse. Correct.

Padártha-tattva, alias *Padártha-tattva-nirúpaṇa,* or *Padártha-tattva-vivechana,* or *Padártha-khaṇḍana.* Criticisms on the Vais'eshika categories, pointing out, from a Nyáya stand-point, which of them are tenable, and which are not. By Raghunátha S'iromaṇi. Hall's Contributions p. 80.

Beginning. अथ पदार्थतत्त्वं निरूप्यते। तत्र दिक्कालौ नेश्वरादतिरिच्येते ।

End. अर्थानां युक्तिसिद्धानां मदुक्तानां विशेषतः ।
सर्वदर्शनसिद्धान्तविरोधेनैव दूषणम् ॥

Colophon. इति पदार्थतत्त्वं समाप्तम् ॥

अर्था निरुक्ताः सिद्धान्तविरोधिना विपश्चिता ।
विना विचारं न त्याज्या विचारयत सादरम् ॥
सर्वशास्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत सादरम् ॥
रीतिरेषा न दोषाय सेविता पूर्वसूरिभिः ।
यन्निजोक्तिविचाराय याचन्ते विदुषोऽपरान् ॥

विषयः । आन्विक्षिकीशास्त्रमतप्रविष्टस्य कस्यचित् २ खण्डनं कस्यचित् २ मण्डनं सयुक्तिकम् ।

No. 1074. गुणकिरणावलीव्याख्या ।

Substance, country-made yellow paper, 18 × 3½ inches. Folia, 30. Lines, 7—9 on a page. Extent, 1680 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridás Bhaṭṭáchárya, grandson of Mádhava Tarkasiddhánta. Appearance, new. Prose. Generally correct.

Guṇakiraṇávalí-vyákhyá. A paraphrase of Vallabha Nyáyácharya's Guṇakiraṇávalí, a treatise on the leading topics of the Nyáya system. By Raghunátha S'iromaṇi.

Beginning. कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विषदीकृत्य दर्श्यन्ते गुणग्रन्थस्य फक्किकाः ॥
आन्विक्षिकीपण्डितमण्डलीषु सत्ताण्डवैरध्ययनं विनापि ।
मदुक्तमेतत्परिचिन्त्य धीराः निःशङ्कमध्यापनमातनुध्वम् ॥

End. पूर्वसम्बन्धेति, अपेक्षाबुद्ध्युत्पादकद्रव्यचक्षुःसंयोगस्यैव द्वित्वसामान्यज्ञानानि ।
(इतः खण्डितं)

विषयः । गुणकिरणावल्या व्याख्यानम् ।

No. 1075. न्यायलीलावती ।

Substance, country-made yellow paper, 19 × 3½ inches. Folia, 9 Lines, 6 on a page. Extent, 286 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Bhaṭṭáchárya, grandson of Mádhaba Tarkasidhánta. Appearance, old. Prose. Generally correct.

Nyáya-lílávatí alias *Lílávatí*. The elements of the Vais'eshíka system. By Vallabha Nyáyácharya. The MS. is incomplete. Hall's Contributions, p. 71.

Beginning. नाथः सृजत्यवति यो जगदेकपुत्रप्रीत्या ततः परमनिष्टतिमादधाति ।
तस्मै नमः सहजदीर्घकृपानुबद्ध-लब्धचितत्त्वतनवे पुरुषोत्तमाय ॥
द्रव्यं नाकुलमुज्ज्वलो गुणगणः कर्म्माधिकं स्लाघ्यते
जातिर्विद्युतिमागता न च पुनः स्लाघ्या विशेषा स्थितिः ।
सम्बद्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये
सान्वीचालयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥

End. सामर्थ्यं तु धूमस्यापि जठरसाधारणकृशानुमात्रेण व्याप्तिः स्यात् ।
(परिसमाप्तिसूचकं वाक्यं नास्ति ।)

विषयः । द्रव्यादिषट्कपदार्थानां निरूपणम्, विशेषत ईश्वरादिनिरूपणम् ।

No. 1076. न्यायलीलावतीदीधितिः ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia. 6- Lines, 9 on a page. Extent, 374 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, old. Prose. Generally correct.

Nyáya-lílávatí-prakás'a alias *Nyáya lílávatí-dídhiti*. A commentary on the last. By Vardhamána Upádhyáya. The MS. is incomplete, and contains but a fraction of the entire work which extends to over four thousand s'lokas. Hall's Contributions, p. 72.

Beginning. ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
षड़ेव पदार्था इत्यवधारणस्य भाष्यादावभावादाक्षेपासङ्गतेराह, इहेति ।

End. अवयविमहत्त्वजननात् उत्कर्षा अनुविधानात्। इति० ।
विषयः । न्यायलीलावत्या व्याख्यानम् ।

No. 1077. **न्यायलीलावतीव्याख्या ।**

Substance, country-made yellow paper, 19 × 3½ inches. Folia, 23. Lines, 7—9 on a page. Extent, 1288 s'lokas. Character, Bengali. Date. ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, old. Prose. Generally correct.

Nyáya-lílávatí-vyákhyá alias *Nyáya-lílávatí-prakás'a-dídhiti.* A gloss on Vardhamána's commentary (No. 1076) on the *Nyáya-lílávatí* of Vallabha. By Raghunátha S'iromaṇi.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान् नत्वा ।
श्रीमता मथुरानाथतर्कवागीशधीमता ॥
विविच्यते फक्किकार्थो लीलावत्या विशेषतः ।
आन्वीक्षिकीपण्डितमण्डलीषु सत्ताण्डवैरध्ययनं विनापि ।
मद्ग्रन्थमेतत् परिचिन्त्य धीराः निःशङ्कमध्यापनमातनुध्वम् ॥
End. न चात्र वैजात्यभेदोऽनुभवसिद्ध इति ध्येयम् । (इतः परं नास्ति)
विषयः । न्यायलीलावत्या व्याख्यानम् ।

No. 1078. **स्मृतिसारः ।**

Substance, palm leaves, 14 × 2 inches. Folia, 21. Lines, 4 on a page. Extent, 372 s'lokas. Character, Bengali. Date. ? Place of deposit, Navadvípa, Haridás S'armá. Appearance, old. Verse. Correct.

Smṛiti-sára. A digest of the rules regarding the impurity of the person resulting from a birth or death in one's family. By Mahes'a.

Beginning. मुकुन्दचरणं नत्वा स्मृतिसारः प्रयत्नतः ।
क्रियते श्रीमहेशेन बालकानां हितैषिणा ॥ १ ॥

विलोक्य स्मृतिशास्त्राणि व्यवहारोचितञ्च यत्।
अवश्यं तत् प्रकर्त्तव्यं विद्यतेऽन्यत्र विस्तरः ॥ २ ॥
तत्र शुचि तत्कालजीविना कर्म्म कर्त्तव्यमिति श्रुतेरशौचस्य यावद्वैदिककर्म्मप्रति-
बन्धकत्वात् तज्ज्ञानमेव प्रथमं कर्त्तुमिति तदेवाभिधीयते।

End. अशौचे संस्पृशेत् स्नेहात् तदाशुच्येन शुध्यति, "तदाशुच्येन" तदीयाशौचेन।
मनुः। असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्॥

Colophon. इति समाप्तम्॥

विषयः। ग्रन्थभूमिका,——सपिण्डाद्यशौचव्यवस्था; ततो विदेशस्थाशौचस्य, मृत्युविशे-
षाशौचस्य, सद्यः शौचस्य, गर्भस्रावाशौचस्य, बालाद्यशौचस्य, स्त्र्यशौचस्य,
सहानुमरणस्य च व्यवस्था, सर्वान्ते अशौचसङ्कर-व्यवस्था।

No. 1079. आत्मतत्त्वविवेकटीका।

Substance, palm leaves, 12 × 2 inches. Folia, 53. Lines, 5 on a page. Extent, 1325 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Prasannachandra Tarkaratna. Appearance, old. Prose. Correct. Notes on the margin in some places.

A'tmatattva-viveka-ṭíká. A paraphrase of the A'tmatattva-viveka, a treatise on psychology. By Raghunátha S'iromaṇi, titularly called Tárkika S'iromaṇi or simply S'iromaṇi.

Beginning. ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
निर्णीय सारं शास्त्राणां तार्किकानां शिरोमणिः।
आत्मतत्त्वविवेकस्य भावमुद्भावयत्यमुं॥

End. तस्या निर्वाणं विनाशः स्वयं कालविशेषसहकृतात्तत एवेत्यर्थ इत्यन्ये।

Colophon. इति श्रीमहामहोपाध्यायश्रीतार्किकशिरोमणिभट्टाचार्य्यकृतात्मतत्त्वविवेकटीका
समाप्ता।

विषयः। आत्मतत्त्वविवेकस्य यो विषयः स एवास्या अपि, केवलं नानाश्रुतिप्रमाणोद्भावनेन
नानामतखण्डनाण्डनादिकमेव विशेषः।

No. 1080. गुणप्रकाशः ।

Substance, country-made yellow paper, 16 × 2 inches. Folia, 6. Lines, 5 on a page. Extent, 186 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Bhaṭṭáchárya, grandson of Mádhava Tarkasiddhánta. Appearance, new. Prose. Generally correct.

Guṇaprakás'a alias *Kiraṇávalí-prakás'a* or *Guṇa-kiraṇávali*. A gloss on the *Kiraṇávalí*, which is a commentary, by Udayana A'chárya, on Pras'astapáda A'chárya's commentary on the Vais'eshika aphorisms. By Vardhamána Upádhyáya. Hall's Contributions, p. 65.

Beginning. एकत्र सन्निपतितासितकण्ठविम्बमन्यत्र चन्द्रकिरणाञ्चितशुभ्रभारं ।
सन्ध्या जलाञ्जलिमनङ्गरिपोर्नमामि स्वप्रविष्टमिव पुण्यतमं प्रयागम् ॥
नतिवद्भृतेरपि प्रारीप्सितविघ्नविघातकत्वात्तमादौ कृतां निबध्नाति तुष्टेरिति ।

End. यत्र गुणे गुणो नाङ्गीकार्यस्तत्र केवलं गुणत्वं वर्त्तते । (इतः परं नास्ति)

विषयः । गुणकिरणावलीव्याख्यानम् ।

No. 1081. छन्दोगश्राद्धतत्त्वम् ।

Substance, country-made yellow paper, 15 × 2½ inches. Folia, 69. Lines, 6—5 on a page. Extent, 2044 s'lokas. Character, Bengali. Date. Sk. 1497. Place of deposit, Navadvípa, Vishṇuchandra Nyáyaratna. Appearance, decayed. Prose. Correct. Notes on the margin.

Chhandoga-s'ráddha-tattva. A digest of the rules regarding s'ráddhas according to the Sáma Veda. By Raghunandana. The author was born at Nadiyá early in the fifteenth century, and wrote his Jyotish Tattva some time after the Sáka year 1421, as he takes that year for a starting point for certain calculations of intercalary days; he was the son of Harihara, and a contemporary of the immediate successors of the great Vaishṇava reformer Chaitanya. In the Introduction to his Malamása Tattva he recorded his resolution to write, under the collective name of *Smriti Tattvas*, twenty-eight separate digests on different topics regarding the civil and canonical laws of the Hindus. They were to include, 1, *Malimhucha* or intercalary months, commonly called *Malamása* the month "stolen" or omitted as "dross" from calculation every 3 years to adjust the lunar with the solar calendar; 2, *Dáyabhága* or inheritance; 3, *Sañskára*,

sacramentary rights; 4, *Suddhi*, mourning; 5, *Práyas'chitta*, expiatory rites; 6, *Udváha*, marriage; 7, *Tithi*, lunar days for the observance of feasts and fasts; 8, *Janmáshṭamí*, the rites to be observed on the anniversary of the birthday of Krishṇa; 9, *Durgápujá*, the ceremony of the worship of Durgá in the month of A's'vina (September—October); 10, *Vyávahára*, judicature; 11, *Ekádas'í*, the fast on the eleventh day of the moon; 12, *Jalásayotsarga*, consecration of reservoirs of water; 13, *Rigvedi-vrishotsarga*, the consecration of bulls according to the Rigveda; 14, *Yajurvedivrishotsarga*, ditto according to the Yajur Veda; 15, *Chhandoga-vrishotsarga*, ditto according to the Sáma Veda; 16, *Vrata*, fasts and penances; 17, *Devapratishṭhá*, formation and consecration of images of gods; 18, *Paríkshá*, nature of things; 19, *Jyotis*, civil astronomy; 20, *Vástuyága*, rites necessary to be observed when entering a new house; 21, *Dikshá*, investiture of the Brahmanical thread; 22, *Áhnika*, daily prayers; 23, *Kritya*, periodical rites; 24, *Maṭhapratishṭhádi*, consecration of conventual establishments and temples; 25, *S'rípurushottama*, duties and rites to be observed when visiting the Temple of Jagannátha at Purí; 26, *Sámavedi-s'ráddha*, S'ráddha according to the Sáma Veda; 27, *Yajurvedi-s'ráddha*, ditto according to the Yajur Veda; 28, *Súdra-kritya*, duties of S'údras. The order in which the books are named was not what the author followed when he compiled the different treatises, for it appears that he died before he completed the 13th in the list, and altogether there are only twenty-seven treatises extant. MSS. of these are common enough in Bengal; there is scarcely a Smriti Paṇdit in the country who has not at least some of them in his possession. Two editions of the works have also been published, one at Serampore in two volumes 8vo. (1835), the other at Calcutta in the puthi form on yellow arsnecised paper. The MS. under notice is, however, worthy of special note, as it is the oldest that has yet come under examination, dating from the S'aka year 1497 = A. D. 1575, or nearly three hundred years ago. The works are of standard authority in Bengal, and for liturgical purposes have almost superseded all others.

Beginning. प्रारम्भे सप्तपत्राणि न सन्ति इति प्रारम्भवाक्यं नास्ति ।

End. अन्येष्टिप्रमाणं दानप्रमाणञ्च शुद्धितत्त्वे सम्यगभिहितमिति तत्रैवानुसन्धेयम् ॥

Colophon. वन्द्यघटीयश्रीहरिहरभट्टाचार्यात्मजश्रीरघुनन्दनभट्टाचार्यविरचितं छन्दोगश्राद्धतत्त्वं समाप्तम् ॥

विषयः । श्राद्धस्वरूपप्रयोगादिनिरूपणम् ।

No. 1082. त्रिपुष्करशान्तितत्त्वम् ।

Substance, country-made yellow paper, 15½ × 2½ inches. Folia, 7. Lines, 5 on a page. Extent, 113 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Rámavilása S'armá. Appearance, fresh. Verse. Incorrect.

Tri-pushkara-s'ánti-tattva. Rules for the performance of certain funeral rites at a sacred pool called *Tripushkara.* By Raghunandana. This is probably not a separate treatise, but a part of the *Suddhi Tattva;* the exordium however would suggest the idea of its being a distinct work.

Beginning. नत्वा श्रीरामचरणं तापत्रयनिसूदनम् ।
त्रिपुष्करे शान्तितत्त्वं वक्ति श्रीरघुनन्दनः ॥ अथ त्रिपुष्करप्रयोगः ॥

End. कर्म्मान्ते भोजयेद् द्विजानिति आदित्यपुराणाद् ब्राह्मणभोजनमप्यावश्यकमिति ।

Colophon. इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं त्रिपुष्करशान्तौ प्रमाणतत्त्वं समाप्तम् ॥

विषयः । अत्रादौ त्रिपुष्करस्य लक्षणम् । ततस्तत्प्राप्तग्रहस्थस्य तत्फललेन पुत्रादि-मरणानुकीर्त्तनम् । रिष्टिप्रवेशकालानुकीर्त्तनम् । तच्छान्त्यर्थं स्वतद्दिवसावधि-होमप्रतिमादानादिव्यवस्था ।

No. 1083. मठप्रतिष्ठातत्त्वम् ।

Substance, country-made yellow paper, 15 × 3½ inches. Folia, 16. Lines, 6 on a page. Extent, 371 s'lokas. Character, Bengali. Date, Sk. 1498. Place of deposit, Navadvípa, Rámavilása Bhaṭṭácharya. Appearance, decayed. Prose and verse. Generally correct.

Maṭha-pratishṭhá-tattva. Rules for the consecrations of Maṭhas and the merits of dedicating them for the use of recluses. By Raghunandana. This MS. is nearly as old as No. 1081.

Beginning. चतुर्वर्गप्रदं विष्णुं नत्वा तत्प्रीतयेऽधुना ।
तत्त्वं मठप्रतिष्ठादेर्वक्ति श्रीरघुनन्दनः ॥

End. भोजयेच्च यथाशक्ति पञ्चाशद्वाथ विंशतिम् ।

Colophon. इति श्रीहरिहरात्मजवन्द्यघटीयेत्यादिः ।

विषयः । मठप्रतिष्ठाफलं तत्प्रयोगश्च ।

No. 1084. गुणप्रकाशदीधितिः ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 2. Lines, 9 on a page. Extent, 108 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Bhaṭṭáchárya, grandson of Mádhava Tarkaratna. Appearance, fresh. Prose. Generally correct.

Guṇaprakás'a-dídhiti. A commentary on Vallabha's Gunaprakás'a, a treatise on the principles of the Vais'eshíka doctrine. The MS. is a mere fragment. Hall's Contributions, p.

Beginning. ॐ नमः सर्वभूतानीत्यादिः ।

End. न संयोगविभागपदयोर्विशेषपरत्वं । (इतः खण्डितम्)

विषयः । गुणप्रकाशव्याख्यानम् ।

No. 1085. मन्त्रकौमुदी ।

Substance, country-made yellow paper, 14½ × 4 inches. Folia, 112. Lines 7 on a page. Extent, 3479 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Tarkaratna. Appearance, old. Prose and verse. Generally correct.

Mantra-kaumudí. A manual of mantras for the performance of the different rites, sacrifices, and sacraments necessary to be observed by good Hindus. By Rámakṛishṇa. Most of the mantras are explained, and there is an introduction on the nature of the Hindu S'ástra. This is a better MS. of the work described under No. 1048.

Beginning. नमस्कृत्याखिलैर्मन्त्रैर्बोध्यं श्रीपरमेश्वरम् ।
तन्यते रामकृष्णेन रम्या श्रीमन्त्रकौमुदी ॥ १ ॥

End. सूर्य्यशब्देन सूर्य्याधिष्ठेयं नेत्रयुक्तं खर्णाकारः सूर्य्योऽयं यस्य स भवान् स्वाहा स्वकीयं न हिंसि ॥

Colophon. इति मायाभूरित्यादिस्वर्णसूर्य्यः स्वाहा इत्यन्ता मन्त्रव्याख्या समाप्ता ॥

विषयः । ग्रन्थावतरणिका, वेदस्य चातुर्विध्यम्, विधेश्च चातुर्विध्यम्, पञ्चदेवतानियमः,

आरम्भनियमः, मानसपूजानियमः, घटस्थापने द्रव्यनियमः, घटस्थापनमन्त्र-व्याख्या, वेदीनियमः, पञ्चदेवतामन्त्रव्याख्या, अधिवासमन्त्रव्याख्या, तन्नियमश्च, चतुर्थ्यामाग्निस्थापनादौ गायत्रीमन्त्रव्याख्या, छान्दोग्यवृषोत्सर्गमन्त्रव्याख्या, यजुषां वृषोत्सर्गमन्त्रव्याख्या, तत्रादौ कुशण्डिका, शाट्यायनमन्त्रव्याख्या, नवग्रहहोम-मन्त्रव्याख्या, विवाहमन्त्रव्याख्या, चतुर्थीहोममन्त्रव्याख्या, गर्भाधानमन्त्राः, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म्म, निष्क्रामणम्, नामकरणम्, अन्नप्राशनम्, चूड़ाकरणम्, उपनयनम्, गायत्रीव्याख्या, समावर्त्तनम्, दन्तधावनम्, सन्ध्यामन्त्राः, पञ्चयज्ञमन्त्रजपः, पुरुषसूक्तव्याख्यानम्, श्राद्धादिमन्त्रव्याख्या, रुद्राध्यायमन्त्रव्याख्या, सहस्रशीर्षेत्यादिमन्त्रव्याख्या ।

No. 1086. सात्वततन्त्रम् ।

Substance, bark, 13 × 3 inches. Folia, 50. Lines, 5 on a page. Extent, 781 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Tarkaratna. Appearance, old. Prose and verse. Generally correct.

Sátvata Tantra. A Vaishṇava Tantra on the divinity of Krishṇa.

Beginning. य एको भगवान् कृष्णः सृष्ट्यादौ बहुधेयते ।
तमहं शरणं यामि परमानन्दविग्रहम् ॥
कैलासशिखरासीनं शिवं शिवकरं परम् ।
नारदः परिपप्रच्छ सर्वभूतहिते रतः ॥
नारद उवाच । भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः ।
श्रीकृष्णस्याप्रमेयस्य नानालीलातनोर्विभोः ॥

End. महानुभावाय निरञ्जनाय नित्यात्मलाभाय नमो नमस्ते ॥

Colophon. इति श्रीसात्वततन्त्रे शिवनारदसंवादे शिवप्रोक्ते गणेशलिखिते सात्वतजनप्रियो नवमः पटलः समाप्तः ॥

विषयः । भगवतः श्रीकृष्णस्य विराड्रूपवर्णनम्, कोलाद्यवताराणाञ्च वर्णनम् । भक्तानां भक्तिभेदः, पृथग्विधं लक्षणञ्च, भगवतः सेवया युगानुरूपं मोक्षसाधनम्, भगवतो नामसहस्रं, नाममाहात्म्यवर्णनम्, भगवद्विष्णोर्नामग्रहणेन वैष्णवानां अपराधान्निष्कृतिः, तथा सर्वसाररहस्यं, तन्त्रोत्पत्तेः कारणञ्च, प्रश्नानुसारेण हिंसा-विधिनिषेधस्य च निरूपणम् ।

No. 1087. हत्यापल्लवदीपिका ।

Substance, country-made yellow paper, 14½ × 3¼ inches. Folia, 32. Lines, 8 on a page. Extent, 992 s'lokas. Character, Bengali. Date, ? Place of deposit, Barddhamána, Dhátrígráma, Brahmavrata Sámádhyáyí. Appearance, fresh. Prose and verse. Generally correct.

Hatyá-pallava-dípiká. A compendium of sorcery and witchcraft, or the rules and rites described in the Tantras for destroying, subjugating, paralysing, and deluding people and securing peace and robust health. By (?) Vídyávágís'a Bhaṭṭáchárya. The works principally quoted are Unmatta-bhairaví, Pheṭkárí, Ḍámara, Máliní, Kálottara, Siddha-yoges-varí, and Yoginí Tantras.

Beginning. हत्यां देवीं नमस्कृत्य तथा त्रिपुरसुन्दरीम् ।
भद्रकालीञ्च देवेशीं तथा षट्कर्मदेवताम् ॥
श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता ।
क्रियते विदुषां प्रीत्यै हत्यापल्लवदीपिका ॥

End. सर्वशान्तिमवाप्नोति सर्वरक्षाकृती भवेत् ॥ ० ॥

Colophon. इति श्रीकृष्णविद्यावागीशभट्टाचार्यविरचिता हत्यापल्लवदीपिका समाप्ता ॥
(एतदनन्तरमिहैव पत्रे कामधेनुतन्त्रोद्धृतं दृष्टिकरणं विद्यते)

विषयः । उन्मत्तभैरवी—फेत्कारिणी—डामर—मालिनी —कालोत्तर—सिद्धयोगेश्वरी—योगिनीप्रभृतितन्त्रेभ्यः शान्ति-पौष्टिक-मारण-वशीकरण-स्तम्भनोच्चाटनेतिषट्-कर्मप्रकरणानि समुद्धृत्येह स्पष्टतयाभिहितानि । इहैव पुस्तकमध्ये विस्तीर्णा यन्त्रैका विद्यते ।

No. 1088. समयप्रदीपः ।

Substance, country-made yellow paper, 14½ × 3¼ inches. Folia, 31. Lines, 8 on a page. Extent, 961 s'lokas. Character, Bengali. Date, ? Place of deposit, Barddhamána, Dhatrígráma, Brahmavrata Sámádhyáyí. Appearance, fresh. Prose and verse. Generally correct.

Samaya-pradípa. Appropriate astral conjunctions and times for the performance of rites and ceremonies. By Harihara Bhaṭṭáchárya. the father of Raghunandana.

Beginning. अनायासेन कर्मणां समयं यो विवित्सति ।
तदर्थं ज्योतिषः स्लोकान् सञ्चिनोमि यथामति ॥
ज्योतिर्ग्रन्थकलापानां वचनान्याहृत्य बोधाय ।
समयप्रदीपमेव कुरुते श्रीहरिहराचार्यः ॥
नाधीत्य ये ज्योतिषः पुस्तकानि, विवित्सवः कर्मकलापकानाम् ।
गृह्णन्तु ते मे समयप्रदीपं, भवेद् यतोऽज्ञानतमोनिरासः ॥
तत्रादौ चन्द्रशुद्धिः ।

End. तथाच । सङ्क्रान्त्याञ्च त्रयोदश्यां पञ्चाम्ने नवमीतिथौ ।
सप्तम्यां रविवारे च स्नानमामलकैस्त्यजेत् ॥
————॥ शाके महीमङ्गलवेदचन्द्रसङ्ख्यागते शिष्यगणानुरोधात् ।
प्रज्वालितो ज्योतिषपुस्तकानामाहृत्य सारं समयप्रदीपः ॥

Colophon. इति श्रीहरिहरभट्टाचार्यसङ्गृहीतः समयप्रदीपः समाप्तः ॥

विषयः । ज्योतिःशास्त्रीयसङ्ग्रहविशेषः । अत्र आर्यगणव्यवह्रीयमाणानां प्रायः समस्तकार्याणां समयासमयौ बोधितौ ।

No. 1089. लीलावतीदीधितिरहस्यं ।

Substance, country-made yellow paper, $18\frac{1}{4} \times 3\frac{1}{2}$ inches. Folia, 17. Lines, 8 on a page. Extent, 782 s'lokas. Character, Bengali. Date, Sk. 1597. Place of deposit, Navadvípa, Haridása Bhaṭṭácharya, grandson of Mádhaba Tarkasidhánta: another copy at Sántipura, with Kálidása Vidyávágis'a. Appearance, new. Prose. Generally correct.

Lílávatí-didhiti-rahasya. A gloss on the commentary described under No. 495, Vo. I. By Mathuránátha Tarkavagís'a.

Beginning. कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
भावः प्रकाश्यते चारु लीलावत्याः शिरोमणेः ॥

End. आदिपदान्मैत्रकर्तृकभोजनकर्मादिपरिग्रहः । (इतः परं खण्डितमिति समाप्तिसूचकं वाक्यं नास्ति)

विषयः । शिरोमणिकृतलीलावतीव्याख्यानम् ।

No. 1090. बौद्धाधिकारविवृतिः ।

Substance, country-made yellow paper, 19½ × 3½ inches. Folia, 5. Lines, 8 on a page. Extent, 240 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Haridása Bhaṭṭáchárya. Appearance, old. Prose. Generally correct. Notes on the margin.

Bauddhádhikára-vivṛiti. A commentary on the work noticed under No. 459, Vo. I. By Mathuránátha Tarkavágís'a.

Beginning. कुञ्चिताधरतुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मथुरानाथ-तर्कवागीशधीमता ।
बौद्धाधिकारविवृतिर्विशदीकृत्य रच्यते ॥

End. अन्वयसहचारनिश्चयाभावेन व्याप्तिनिश्चयादित्यर्थः ॥

Colophon. इति बौद्धाधिकारमूलमाथुरीटिप्पनी समाप्ता ॥

विषयः । उदयनाचार्यविरचितात्मतत्त्वविवेके यो बौद्धाधिकारस्तस्य व्याख्यानम् ।

No. 1091. विवादनिर्णयः ।

Substance, country-made yellow paper, 16 × 3½ inches. Folia, 51. Lines, 9 on a page. Extent, 2295 s'lokas. Character, Bengali. Date, Sk. 1617. Place of deposit, Barddhamána, Dhátrígráma, Brahmavrata Sámádhyáyí. Appearance old. Prose. Generally correct.

Vívàda-nirṇaya. Procedure in civil cases regarding contracts. By Gopála Nyáyapañchánana Bhaṭṭáchárya.

Beginning. अथ विवादपदानि । तत्र मनुः—तेषामाद्यमृणादानं निःक्षेपः स्वामिविक्रयः ।

Brahmavidyábharaṇa. A commentary on S'aṅkara A'chárya's exegesis of the Vedánta Aphorisms. By Advaitánanda, pupil of Bhumánanda Sarasvatí. The MS. is incomplete, wanting the fourth or last book. The extent of the three books is limited to ten thousand five hundred verses, whereas the complete copy noticed by Mr. Hall (*Contributions*, p. 89,) comprised 24,000 s'lokas. From one of the verses quoted below, it will be seen that the author admits his work to be an abridgement of a more elaborate scholium by his tutor Rámánanda Tírtha.

Beginning. ॐ शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावयेत् ॥ १ ॥
वेदान्तनिकुरम्बेन तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरम्येन कल्याणाय शिवोऽस्तु नः ॥ २ ॥
स्वानन्दाम्बुधिमग्नचित्तमनिशन्निर्धूतमायामलं,
कारुण्यार्ज्जवशान्तिसौरभमसुं देव्या गिरा सेवितम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा,
चित्तेशं कलयामि वेदशिरसस्तत्त्वावबोधाप्तये ॥ ३ ॥
मुग्धं मामनुगृह्य यः करुणया तुर्य्याङ्कुतिप्रस्फुरद्
भासां वेदवतीं विकल्पगलितां विद्यां ददौ चिन्मयीम् ।
भूमानन्दपदस्थितो गुरुरसौ पूज्याधिपूज्यः सदा,
चेतो मे कुरुतादलङ्कृतमतिस्वच्छैः स्वपादाम्बुजैः ॥ ४ ॥

End. तस्मिन् पक्षे ब्रह्मणा रक्षणीयत्वे वचनमुपपद्यते इति ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्भूमानन्दसरस्वतीचरणानुग्रहलब्धसा-
रस्वतपदस्य निरतिशयौदार्य्यादिगुणरत्नखचितयतिकुलोत्तंसश्रीमद्रामानन्द-
तीर्थमुखारविन्दनिर्गतशारीरकसूत्रार्थस्वर्धुनीप्रवाहनिमज्जनमुदितस्याद्वैतान-
न्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाभिधायां तृतीयस्याध्यायस्य
तृतीयः पादः ॥ १ ॥ (चतुर्थाध्यायस्य व्याख्या न मिलतीत्युद्घोषः)

विषयः। शाङ्करशारीरकभाष्यस्य व्याख्यानं।

No. 1136. सङ्क्षेपशारीरकं। सङ्क्षेपशारीरकसारसङ्ग्रहदीपिका-भिधटीकासहितम्।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 435. Lines, 11—18, on a page. Extent, 20,307 s'lokas. Character, Bengali. Date ? Place of deposit, Nadiyárchhatra, Benares, S'ívakṛishṇa Vedántasarasvatí Bhaṭṭácharya. Appearance, new. Text, in verse; Commentary in prose. Generally correct. Notes on the margin.

Sañkshepa-s'áríraka with its commentary entitled *Sañkshepa-sáríraka-sañgraha-dípiká.* A commentary on Sarvajñátma Mahámuni's metrical abridgement of S'añkara's exegesis of the Vedánta Aphorisms. By Madhusúdana Sarasvatí, pupil of Vís'vés'vara Sarasvatí. The commentary was written during the reign of a prince named Manukula Áditya, in the Samvat year 1569. Besides the work of Mudhusúdana, there are five commentaries on the text respectively by Nṛisiñha A's'rama, Rághavánanda Sarasvatí, Ráma Tírtha, and Purushottama Dikshita. Hall's *Contributions*, pp. 91-3203. Madhusúdana was a commentator and Vedántist of great repute, and several works of his are well-known, the most renowned being his commentaries on the Bhágavata and the Bhagavad Gítá.

Beginning. (मूलस्य)—अन्तं जड़विरोधिरूपमन्तत्रयमलबन्धनदुःखिताविरुद्धं।
मुरारेः परमं पदं प्रणयादभिष्टवीमि॥ १॥
स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा।
स्वाभाविकस्वमहिमः स्थितिरस्तमोहा प्रत्यक्चितिर्विजयते भुवनैकयोनिः॥ २॥
प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागमेकम्।
चैतन्यमात्रपरमार्थनिजस्वभावं प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम्॥ ३॥
औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्याः।
विज्ञायते विश्वविवर्त्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्॥ ४॥
प्रारब्धाः फलिनः प्रसन्नहृदयो यथेत्तिरस्थामपि,
नो चेद्विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः।

विश्वैश्वर्यमतो निरङ्कुशमभूद्यस्यैव विश्वप्रभोः,
सोऽयं विश्वहिते रतो विजयते विश्वेश्वरो विश्वकृत् ॥ ५ ॥
वाग्विस्तरा यस्य बृहत्तरङ्गा, वेलातटं वस्तुनि तत्त्वबोधः ।
रत्नानि तर्कप्रसवप्रकाराः, पुनात्वसौ व्यासपयोनिधिर्नः ॥ ६ ॥
वक्त्रारमासाद्य यमेव नित्या, सरस्वती स्वार्थसमन्विताभीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥ ७ ॥
यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्त्तयः ।
जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥ ८ ॥
गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः ।
अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः ॥ ९ ॥
शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः ।
शारीरकार्थविषयावगतिप्रधानं सङ्क्षेपतः प्रकरणं करवाणि हृद्यम् ॥ १० ॥

(टीकायाः)—सत्यं ज्ञानमनन्तमद्वयसुखं यद् ब्रह्म गत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतं ।
जातं नन्दतपोबलात्तदखिलानन्दाय वृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानां प्रणम्य पादाम्बुजपुण्यपांसून् ।
तेषां प्रभावादहमस्मि योग्यः शिलापि चैतन्यमलब्धमेभ्यः ॥ २ ॥
पूर्वाचार्य्यवचो विचार्य्य निखिलं तत्सम्प्रदायाध्वना
हित्वोच्छृङ्खलमार्गमागमगिरां तात्पर्य्यपर्य्याप्तितः ।
विच्छिद्यार्थविभागतः प्रकरणान्युद्धिद्य तत्त्वं रहः
कुर्वे सम्प्रति सारसङ्ग्रहमिमं सङ्क्षेपशारीरके ॥ ३ ॥
हित्वा हेयमुपादेयमुपादाय विचारतः ।
प्रायेण पूर्वटीकानामिहार्थः प्रकटीकृतः ॥ ४ ॥
विशेषाद्विश्वदेवस्य प्रत्यग्विष्णोश्च हृद्ययोः ।
व्याख्यानं हृदयालेखि गुरूणां तौ हि नो गुरू ॥ ५ ॥

End. (मूलस्य)—सङ्क्षेपशारीरकमेवमेतत्, कृतं परिव्राजकमुक्तिहेतुः ।
गुरुप्रसादात्परिलभ्य तत्त्वं, त्रयीशिरस्तत्त्वनिवेदनाय ॥
अविरलपदपङ्क्तिः पद्मनाभस्य पुण्या चरणकमलधूलिग्राहिणी भारतीयम् ।
घनतरमुपघातं श्रेयसः श्रोतसङ्गात् सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः ॥
श्रीदेवेश्वरपादपङ्कजरजः सम्पर्कपूताशयः,

सर्वज्ञात्मगिराङ्कितो मुनिवरः सङ्क्षेपशारीरकम्।
चक्रे सज्जनबुद्धिवर्द्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥
भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥

Colophon. इति श्रीसर्वज्ञात्ममहामुनिविरचिते सङ्क्षेपशारीरके फललक्षणं चतुर्थोऽध्यायः॥

(टीकायाः)—अन्तेऽपि भगवन्नमस्काररूपमङ्गमाचरति,—भुजङ्गमाङ्गेति ॥

इह योऽस्ति विमोहयन्मनः परमानन्दघनः सनातनः।
गुणदोषदृष्टेष एव नस्तृणतुल्यो यदयं परो जनः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यमधुसूदनसरस्वतीकृतायां सङ्क्षेपशारीरकटीकायां चतुर्थोऽध्यायः ॥

विषयः। शाङ्करशारीरकप्रस्थानवदिदमपि अद्वैतवादात्मकं विशेषस्त्वेतावत्——तत्र सगुणब्रह्मनिर्गुणब्रह्मणोरुभयोर्निरूपणमत्र तु केवलं निर्गुणब्रह्मणो निरूपणम्। अत एवैतत्प्रकरणस्य सङ्क्षेपेण कथनात् सङ्क्षेपशारीरकमिति नामेत्यपि ज्ञेयम्। अध्यायाश्चत्वारः। समन्वयाविरोधसाधनफलभेदात् आदौ समन्वयात्मके सर्वासां श्रुतीनां ब्रह्मपरत्वेन व्याख्यानं।

द्वितीये अविरोधाभिधे——वेदान्तातिरिक्तानां सकलशास्त्राणां अप्रामाण्योद्भावनेन तैरविरोधोद्भावनम्।

तृतीये साधनाभिधे——निर्गुणब्रह्मण उपासना जीवस्य च गत्यागतीत्यादिकम्।

तुरीये फलात्मके——यावदीयदर्शनप्रतिपाद्यानां मुक्तीनां खण्डनपुरःसरं अद्वैतवादप्रतिपाद्यमुक्तेः संस्थापनम्।

No. 1137. वैद्यमनोत्सवः।

Substance, country-made yellow paper, 12½ × 4 inches. Folia, 21. Lines, 8—11, on a page. Extent, 564 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Nadiyárchhatra, Sívakṛishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, new. Prose. Incorrect. Notes on the margin.

Vaidyamanotsava. A treatise on the practice of medicine. By S'rídhara Mis'ra.

Beginning. ओं नमः शिवाय ॥

प्रणम्य नित्यं शिवस्तनुन्द्वदिदं सिद्धिं ददातीति तथा निधिं यः ।
कुबुद्धिनाशं सुमतिं करोति मुदं तथा मङ्गलमेव कुर्य्यात् ॥ १ ॥
न कोऽपि सज्ज्ञानमजस्य पारमलक्ष्यमूर्त्तस्तु करोति यस्य ।
साराणि यो मे विदधाति देवो नतः पुनस्तं करसम्पुटेन ॥ २ ॥
आयुर्वेदस्य शास्त्राणि निरीक्ष्य च पुनः पुनः ।
सर्वेभ्यः सारमादाय कुर्वे वैद्यमनोत्सवम् ॥ ३ ॥
आदौ रोगपरीक्षार्थं वक्ष्ये नाड़ीपरीक्षणं ।
येन विज्ञायते सर्वरोगाणां सर्वकारणम् ॥ ४ ॥

End. कच्छूविचर्च्चिकादद्रूकृमिभिर्मुच्यते शिशुः ।

Colophon. इति श्रीमन्मिश्रश्रीधरविरचिते वैद्यमनोत्सवे प्रदरपुष्पोद्गमवन्ध्यागर्भपातनिवारणप्रसूतिका + भगसङ्कोचकुचदृढ़करणलिङ्गधातुपुष्टिकरणदुर्गन्धिनाशनबालरोगचिकित्सा नाम सप्तमः परिच्छेदः ॥ ७ ॥

विषयः । अस्य परिच्छेदाः सप्त सन्ति, ग्रन्थान्ते "सप्तमपरिच्छेदः" इति दर्शनात् परमादौ प्रथमपरिच्छेदसमाप्तिसूचकवाक्यं दृश्यते, तत एकदैव पञ्चमपरिच्छेदसमाप्तिसूचकवाक्यस्य, ततः पुनरेकदैव सप्तमपरिच्छेदसमाप्तिसूचकवाक्यस्य च दर्शनात् द्वितीयतृतीयतुरीयाणां षष्ठस्य च समाप्तिसूचकवाक्यानि लेखकप्रमादात् पतितानीति मन्यते सुतरां परिच्छेदानां सप्तत्वेऽपि त्रित्वमाश्रयमाणेन तावद्विषयाः प्रदर्श्यन्ते ।

तथा चादौ——नाड़ीपरीक्षा । दूतलक्षणं । वैद्यदूतशकुनविचारः । वैद्यशकुनविचारः । मूत्रपरीक्षा । पित्तकफवायुनिदानानि । तेषां शमतोपचारः ॥

द्वितीये = अर्थाद् द्वितीयतृतीयतुरीयपञ्चमेषु——ज्वरदशायामुपद्रवकथनं । पित्तज्वरलक्षणानि । कफज्वरलक्षणानि । वायुज्वरलक्षणानि । मलज्वरलक्षणानि । अजीर्णज्वरलक्षणानि । खेदज्वरलक्षणानि । दृष्टिज्वरलक्षणानि । सन्निपातज्वरलक्षणं । ज्वरपाकमर्य्यादा । ज्वरमुक्तलक्षणम् । प्रथमज्वरचिकित्सा । महाज्वराङ्कुशः । सिद्धज्वराङ्कुशः । ज्वरघ्नी गुटिका । पित्तज्वरघ्नचूर्णं । कफज्वरघ्नचूर्णं । कफज्वरनस्यं । वातज्वरघ्नचूर्णं । वातज्वरे क्वाथः । मलज्वरे आरग्वधादिक्वाथः । अजीर्णज्वरे चूर्णं । खेदज्वरचिकित्सा । दृष्टिज्वरचिकित्सा । दोषत्रयचिकित्सा शीतज्वरचिकित्सा । विषमज्वरचिकित्सा । सान्निपातिकचिकित्सा । अतिसारचिकित्सा । ग्रहणीचिकित्सा । मवेसीचिकित्सा । खूनीमवेसीचिकित्सा । भगन्दरचिकित्सा । गुल्मरोगचिकित्सा । प्लीहादि-

कित्सा। आमवातचिकित्सा। कृमिरोगचिकित्सा। शूलरोगचिकित्सा। पाण्डु-कामलचिकित्सा। चयरोगचिकित्सा। हिक्कारोगचिकित्सा। छर्द्दिरोग-चिकित्सा। श्वासरोगचिकित्सा। कासचिकित्सा। मन्दाग्निचिकित्सा। अथ विसूचिकारोगचिकित्सा। अण्डवृद्धिचिकित्सा। प्रमेहचिकित्सा। मूत्र-कृच्छ्रचिकित्सा। अश्मरीचिकित्सा। मूत्ररोगचिकित्सा। मृगिरोगचिकित्सा। मृग्युन्मादचिकित्सा। कुष्ठरोगचिकित्सा। विचर्चिकादिचिकित्सा। शस्त्रघात-चिकित्सा॥

तृतीये = अर्थात् षष्ठे सप्तमे च——वातरोगचिकित्सा। पित्तकोपचिकित्सा। कफकोपचिकित्सा। गण्डमालाचिकित्सा। मुखरोगचिकित्सा। नासारोग-चिकित्सा। पीनसरोगचिकित्सा। नेत्ररोगचिकित्सा। कर्णरोगचिकित्सा। शिरोरोगचिकित्सा। स्त्रीरोगप्रकारः। गर्भोत्पत्तिप्रकारः। गर्भपातनिवारणं। गर्भसङ्कोचकरणं। योनिदुर्गन्धनाशनः क्वाथः। कुचकाठिन्यकरणं। स्त्रीरोग-चिकित्सा। लिङ्गचिकित्सा। दुर्गन्धिहरणचिकित्सा। बालकरोगचि-कित्सा॥

No. 1138. भेदधिक्कृतिः।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 12. Lines, 13—15, on a page. Extent, 441 s'lokas. Character, Bengali, Date ? Place of deposit, Benares, Nadiyárchhatra, Sívakrishṇa Vedánta-sarasvatí Bhaṭṭácharya. Appearance, new. Prose and verse. Generally correct.

Bhedadhikkṛiti. A refutation of the Nyáya doctrine of the essential difference between the Supreme and the human souls, and the establishment of the modern Vedánta theory of adualism. By Nṛisiñha A's'rama, pupil of Jagannátha A's'rama. Mr. Hall notices two commentaries, respectively by Náráyaṇa A's'rama and Narasiñha Bhaṭṭa, on this work. The work of the latter is noted below. *Contributions*, p. 158.

Beginning. ओं—वेदान्तवनसञ्चारि लीलाचलगुहाश्रयम्।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम्॥ १॥
किं न त्वं नरसिंह एव यदि वा नाहं न नो चेत्कथम्,
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्तः परः।

भूयादर्थवदात्मबन्धहर इत्याद्यं वचोऽपौरुषम्,
न त्वं ना तदहं त्वमेव न्वहरे भूयासमात्मंस्त्वयि ॥ २ ॥
हृदयालयमालम्ब्य करुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धिक्कृतिम् ॥ ३ ॥

End. गुरुचरणसकाशाद+तं निर्गतं तद्
+विगुणमगुणं वा वीक्षतां तत्त्वमात्मा ।
अपि+सृजति कश्चित् काचमालावमत्या
शतमखमणिमालां शारदाकाशकल्पाम् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमज्जगन्नाथाश्रमपूज्यपादशिष्यश्रीमद्वेदान्तसिद्धान्तसाराभिज्ञश्रीन्टसिंहाश्रमविरचितो भेदधिक्कारः सम्पूर्णः ॥

विषयः । अत्रादौ जीवानां परस्परमभेदसाधकमनुमानादिकम् । जीवानां जीवेश्वरयोश्च भेदे प्रमाणतया उपात्तस्य मनसोऽप्रामाण्यानुमानमनेकविधं मानसस्य भेदासङ्गित्वनिर्णयः । ईश्वरत्वपदार्थविचारः । अहम्पदार्थस्य अनात्मत्वानुमानम् । भेदज्ञानस्यानर्थहेतुत्वसाधनम् । अद्वैतश्रुतेर्बलवत्त्वसाधनम् । भेदे अर्थापत्तिप्रमाणस्याप्रामाण्यनिश्चयः जीवेश्वरयोरभेदसिद्धिः । पुनर्जीवानामपि परस्परमभेदसाधनमनुमानादिकम् । भेदपदार्थविचारः । उपसंहारे परपक्षे भेदप्रतीतेर्निर्विषयत्वसंस्थापनपूर्वकं स्वमते कथञ्चित्सविषयत्वस्योपन्यासः । चैतन्यात्मकसद्व्यतिरिक्तसत्तायाः खण्डनम् । स्वमते भेदप्रतीतिप्रकारः । तथा भेदस्य साक्षिभास्यत्वं प्रतियोगिज्ञानानपेक्षत्वनिश्चयः । सर्वोपसंहारे परमतप्रसिद्धभेदप्रमाणस्यैवाद्वैतसाधकतयोपन्यास इति ॥

No. 1139. अद्वैतचन्द्रिका, भेदधिक्कृतिटीका ।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 23. Lines, 25 on a page. Extent, 1795 s'lokas. Character, Bengali, Date, ? Place of deposit, Benares, Nadiyárchhatra, Sivakṛishṇa Vedántasarasvatí Bhaṭṭácharya. Appearance, new. Prose and verse. Correct.

Advaita-chandriká. A commentary on the work noticed under the last preceding number, by Narasiñha Bhaṭṭa, son of Raghunátha and Siñgámbá, of the family of Náges'vara and the sept of Chinajharí, or Nierilla according to Mr. Hall. The work was written under the

auspices of a prince named Jagannátha of the Kimmuro family. The MS. is incomplete.

Beginning. ओं—यस्याज्ञावशवर्त्तिनोऽनुदिवसं शक्रादिदिक्पालकाः
येन व्याप्तमिदं विभाति हितसद् भातं सुखाद्यात्मना।
उद्भूतवियदादयो विकृतयो यस्मिन् विवर्त्तात्मना
कस्मैचित् सुखसत्यबोधवपुषे तस्मै सवित्रे नमः ॥ १ ॥
श्रीविद्यानिलयं देवं दक्षिणामूर्त्तिमव्ययम्।
नमामि वासमुख्यांश्च ज्ञानशास्त्रप्रवर्त्तकान् ॥ २ ॥
श्रीरामचन्द्रार्पितभक्तिसान्द्रम् श्रीरामभद्राश्रमदेशिकेन्द्रम्।
वेदान्तविज्ञाननिरस्ततन्द्रम् मुदान्तरङ्गं कलये मुनीन्द्रम् ॥ ३ ॥
क्षिणभ्मरिकुलोद्भूतनागेश्वरबुधोत्तमम्।
तथा शेषा हि नामानं नमामि गुरुसत्तमौ ॥ ४ ॥
शिङ्गाम्बारघुनाथाख्यौ पितरौ शिवसन्निधौ।
वन्देऽहं यन्नमस्कृत्य मूको वाचस्पतिर्भवेत् ॥ ५ ॥
नरेन्द्रस्य कुलोत्पन्नः नरसिंहाख्यहरिणा।
अद्वैतचन्द्रिका टीका क्रियते भेदधिक्कृतेः ॥ ६ ॥
कि+रिकुलसम्भूत-जगन्नाथनृपाज्ञया।
दक्षिणामूर्त्तितोषाय कृतिरेषा प्रतन्यते ॥ ७ ॥
क्वाहं मन्दमतिः क्वेदं व्याख्यानं भेदधिक्कृतेः।
तथापि गुरुविश्वासे किमसाध्यं भवेन्मम ॥ ८ ॥

End. वैपरीत्यं निरस्यति अनधिगतेति। भेदाभावस्य मानान्तराज्ञातत्वा
(इतः खण्डितं)।

विषयः। श्रीनृसिंहाश्रमविरचितभेदधिक्कृतेः "नान्यतोऽस्ति द्रष्टा नान्यतोऽस्ति श्रोता" इत्यादिश्रुतिमुल्लिख्य भेदवारणनिरूपणप्रसङ्गपर्य्यन्तस्य व्याख्यानम्।

No. 1140. नरेश्वरपरीक्षा, नरेश्वरपरीक्षाप्रकाशसहिता।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 57. Lines, 12 on a page. Extent, 2650 s'lokas. Character, Bengali, Date, ? Place of deposit, Nadiyárchhatra, Benares, Sívakṛishṇa Vedántasarasvatí Bhaṭṭáchárya. Appearance, new. Text in verse; Commentary in prose. Incorrect.

LIBRARY
FEB 1 ? 1973
UNIVERSITY OF TORONTO

No. IX.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA,

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME III.—PART II.

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1875.

INDEX TO VOL. III.—PART II.

Page

Advaita-rahasya, ... 163
A'loka, ... 164
A'loka-rahasya, ... 165
Anumána-chintámani, 111, 112
Anumána-chintámaṇi-ṭippaní, ... 108
Anumána-didhiti-rahasya, 127
Anumána-khaṇḍa, .. 108, 127
Arthasañgraha, ... 131
A'tmatattva-viveka,...... 110
A'tmatattva-viveka-ṭíká,.. 110
Avadhúta-saṭaka, ... 164
Avidhádiváda-chintámanyáloka-ṭippaní, ... 109
Bálarámáyaṇa, ... 157
Bála S'ástrí, ... 157
Báráṇasí,.............. 104
Bhavánanda S'iddhántavágís'a,.............. 129
Brahma Puráṇa,........ 149
Chaitanya, ... 99
Chandrávali, ... 123
Dáya-tattva, ... 101, 107
Dáya-tattva-ṭippaní, 101, 107
Dharmarája Adhvarindra, 98
Ekádas'ítattva-ṭippaní, ... 102
Gadádhara,........ 128, 169
Gaṇesa, ... 161, 167
Gopinátha Kavirája A'chárjya,............ 156
Gautamiya Tantra,...... 99
Govinda,.......... 109, 110

Page

Govindadása, ... 147
Haramohana, ... 112
Harirámá Tarkavágis'a Bhaṭṭácharya,........ 121
Harshadeva, ... 132
Jagadís'a, ... 112
Jaimini, ... 131
Jayadeva Mis'ra, ... 111
Jayakṛishṇa, ... 129
Kálidása,.............. 156
Kárakádyartha-nirṇayaya-ṭíká,................ 129
Káraka-kaumudí, ... 113
Kás'iráma Váchaspaṭi, 101, 102, 103
Kátantra,.............. 113
Kavikántá, ... 156
Kávyaprakás'a, ... 110
Kávyaprakás'a-bhávártha, 110
Krishṇabhakti-rasodaya,.. 166
Kṛishṇa,.... 23, 99, 123, 155
Kṛishṇakánta Kavi, ... 116
Kṛishṇatattvámṛita, ... 155
Kṛitya-tattva,.......... 130
Kriyáyogasára, ... 113
Kshaṇabhañgura-váda-didhiti-ṭippaní, ... 111
Lakshmana Sena, ... 104
Laugákshibháskara, ... 131
Malamása-tattva, ... 107
Malamása-tattva-ṭippaní, 103, 107

	Page
Mammatha Bhaṭṭa, ...	110
Mánava-dharma-s'ástra,..	117
Manu, ...	117
Mathuránátha Tarkavágis'a, 108, 109, 111, 127, 165,	167
Mukunda S'armá, ...	125
Nandakumára Vidyábhushaṇa, ...	123
Nañváda-didhiti-ṭippaní,..	128
Nárada, ...	168
Nárada Smṛiti, ...	168
Padma Puráṇa, ...	113
Pratyaksháloka-rahasya,..	111
Pratyaksha-khaṇḍa, ...	111
Pratyaksha-khaṇḍa-ṭíká,..	167
Pratyaksha-maṇi-phakkiká,	167
Práyas'chitta-tattva, ...	108
Práyas'chitta-tattva-ṭippaní,	108
Priyadarsaná, ...	132
Rádhá, ...	123
Rádhákṛishṇa, ...	110
Rádhámohana Gosvámí,..	155
Rádhámohana S'armá, 106, 107, 108,	166
Rádhámána-tarañginí, ..	123
Raghudeva Bhaṭṭáchárya,	121
Raghunandana, 101, 102, 103, 106, 107, 108,	130
Raghunátha, .. 111, 127,	128
Rájas'ekhara Kavirája, ..	157
Rámadhana S'armá, ...	166
Rámakṛishṇa, ...	110
Rámakṛishṇa Adhvarindra, ...	98
Rámánanda Tírtha, ...	163
S'abda-khaṇḍa, 109, 128,	161
Saduktikarṇámrita, ...	134
Sámánya-lakshaṇá-vyákhyá, ...	112
S'añkara Ácharya, 110, 162, ...	164
Sannikarsha-vichára, ...	109
Sára-mañjarí, ...	129
Satpadya-ratnákara, ...	147
Satkávya-kalpadruma, 116,	117
S'rídhara Dása, ...	134
S'ríkṛishṇa-stotra, ...	162
Suddhi-tattva, ...	106
Suddhi-tattva-ṭippaní, ..	106
S'úlapáṇi, ...	104
Tantra-ḍípiká, ...	125
Tattva-chintámani,.. 161,	167
Tattva-chintámani, Pratyaksha-khaṇda, ...	166
Tírtha-chintámaṇi, ...	104
Udváha-tattva-ṭippaní, ..	102
Uttara Tantra, ...	125
Vásavadattá, ...	132
Vatsarája, ...	132
Vaṭudása, ...	134
Vedánta-paribháshá, ...	98
Vedánta-s'ikhámaṇi, ...	98
Vis'ishṭa-vais'ishṭya-bodha-vichára, ...	121
Vis'isṭha-vais'ishṭya-vichára, ...	121
Viváhádi-paddhati,......	122
Vyása, ...	149
Vyavasthá-sára, ...	126
Vyavasthá-sára-sañchaya,	126
Yájñavalkya, ...	104
Yájñavalkya-dipakaliká, ..	104
Yogyánupalabdhi-vichára,	121
Yogya-vis'esha-guṇa-vichára, ...	122

Nares'vara-parikshá with a commentary entitled *Nares'vara-parikshá-prakás'a.* The work comprises three books, the first of which, after pointing out the defects of the perfect man as portrayed in the Sáñkhya and other systems of philosophy, describes the particular attributes, the possession of which constitutes perfection ; the second treats of the attributes of the Divinity; and the third criticises the opinions of the different current systems of philosophy regarding the attributes of the Deity. By Rámakaṇṭha Bhaṭṭa, son of Náráyanakaṇṭha.

Beginning. (मूलस्य)—अथ मेयाब्धिरत्नस्य शङ्करस्यामितद्युतेः ।
परीक्षां लेशतो वच्मि पुम्परीक्षापुरःसरम् ॥ १ ॥
(टीकायाः) तं शक्तिं शक्तिमद्रूपं नत्वा नारीश्वरं परम् ।
नरेश्वरपरीक्षायामक्षरार्थः प्रकाश्यते ॥ १ ॥

End. (मूलस्य)—इत्थं सर्वपरीक्षान्तु पुम्परीक्षापुरःसरां ।
चकार मृदुबुद्धीनां हितायातिस्फुटामिमाम् ॥
सद्यो ज्योतिषमालेयं शिवेन गुरुसत्तमः ।
कृपयैवानुजग्राह स्वयञ्ज्योतिर्गुणाकरः ॥
(टीकायाः) एवञ्च पूर्वनयेनेश्वरपरीक्षाच्छिन्नैव नरपरीक्षेति तत्प्रयोजनेनैव सप्रयोजनेति सिद्धम् ॥ नरेश्वरपरीक्षणेति गहनलता नैव यद्गतिर्जगति गम्यते विततबुद्धिवेगेष्वपि । इदं परहितेच्छया सुतनुरामकण्ठकृतः कुतर्कतमसां नुदं विहितवान् प्रकाशात् स्फुटम् ॥

Colophon. इति श्रीनारायणकण्ठसूनुभट्टरामकण्ठकृतौ नरेश्वरपरीक्षाप्रकाशे परदर्शनप्रसिद्धेश्वरप्रतिक्षेपाख्यं तृतीयं काण्डम् । सम्पूर्णश्चायं नरेश्वरपरीक्षाप्रकाशः । शुभाय भवतु ॥०॥

विषयः । इदञ्च दर्शनं साङ्ख्यवेदान्तादिदर्शनादिवत् पृथगेवेति प्रतीमः ; अत्र खलु त्रीणि काण्डानि सन्ति ।
आद्ये—तावत्साङ्ख्यादिदर्शनलक्षणलक्षितपुरुषस्य खण्डनपुरःसरं तत्तद्गिलक्षणलक्षणेन लक्षितं पुरुषं । तच्च नरपरीक्षाभिधम् ।
द्वितीये—स्वमतेनेश्वरलक्षणं श्रुत्यादिप्रमाणतः कृतं तच्चेश्वरपरीक्षानामकं काण्डम् ।
तृतीये तु—ईश्वरवादिन्यायवैशेषिकादितत्तद्दर्शनप्रसिद्धेश्वरस्वरूपप्रतिक्षेपः तच्च परदर्शनप्रसिद्धेश्वरप्रतिक्षेपाख्यं काण्डम् ॥

No. 1141. वेदान्तशिखामणिः ।

Substance, country-made yellow paper, 12¼ × 5 inches. Folia 69. Lines, 18—19, on a page. Extent, 5860 s'lokas. Character, Bengali, Date, ? Place of deposit, Benares, Nadiyárchhatra, Sívakṛishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance new. Prose. Generally correct. Notes in some places.

Vedánta-s'ikhámaṇi. A commentary on the well-known epitome of the Vedánta system, the *Vedánta pari-bháshá.* By Rámakṛishṇa Adhvarindra, son of Dharmarája Adhvarindra, who is the author of the epitome in question : both the father and the son also bore the title of Dikshita.

Beginning. नैदाघभानुकिरणेष्विव वारिपूरः
सर्वो विभाति यदबोधवशात् प्रपञ्चः ।
मालाफणीव च निमीलति यत् प्रबोधात्
तद् ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥ १ ॥
आसेतोराहिमाद्रेरपि भुवि विदितान् धर्म्मराजाध्वरीन्द्रान्
वन्देऽहं तर्कचूड़ामणिभणिजननक्षीरधींस्तातपादान् ।
यत्कारुण्यान्मयाभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीके-
रप्यान्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥ २ ॥
वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्म्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥ ३ ॥

End. परिच्छेदप्रतिपाद्यमर्थं निगमयति तदेवमिति ॥
प्रमादलिखितं यत्तं प्रमादालस्यदोषतः ।
तत्क्षन्तव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥ १ ॥
सुवर्णखचिताकारा कृतिरेषा मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलङ्कृता ॥ २ ॥
अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥ ३ ॥
वन्देऽहं वन्दनीयानां वन्द्यां वाचमधीश्वरीम् ।
कामिनाशेषकल्याणकलनाकल्पवल्लरीम् ॥ ४ ॥

Colophon. इति श्रीधर्मराजाध्वरीन्द्रात्मजरामकृष्णाध्वरीन्द्रविरचिते वेदान्तशिखामणौ प्रयोजनाख्योऽष्टमः परिच्छेदः समाप्तः ॥०॥ समाप्तश्चायं ग्रन्थः ॥०॥

विषयः । श्रीधर्मराजाध्वरीन्द्रविरचितवेदान्तपरिभाषायाः व्याख्यानम् ॥

No. 1142. गौतमीयतन्त्रम् ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia 76. Lines, 7 on a page. Extent, 2,028 s'lokas. Character Bengali. Date Sk. 1736. Place of deposit, Benares, Nadiyárchhatra, Sivakṛishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Gau'tamiya Tantra. A Vaishṇavite Tantra, comprising, in thirty-one chapters, a complete system of rituals for the guidance of Vaishṇavas, and the adoration of Kṛishṇa in a variety of forms. The work is designed with a view to apply the rituals of S'ákta worship with all its forms, mysteries and mummeries to the cult of Kṛishṇa, and is alway appealed to as a leading authority in all questions regarding rituals. It is held in high estimation by Vaishṇava householders, but ascetics and more devout and ardent followers of Chaitanya do not implicitly carry out its ordinances. *Contents ;* 1, Ten-syllable mantra of Kṛishṇa ; 2, Derivation of that mantra ; identification of the mantra with the Deity ; the mystic syllable of the mantra the source of the universe ; the application of the eighteen-syllable mantra of Kṛishṇa ; the object of the mystic particles in the mantras ; regulation of the breath ; 3, Mental assignment of the various parts of the body to different tutelary divinities ; 4, Description of Vṛindávana ; the mode of meditating on Kṛishṇa ; 5, Characteristics of spiritual guides and neophytes, time meet for initiation ; 6, Altars ; 7, Initiation ; daily prayers and adorations ; 8, Twelve forms of purifications ; 9, Purification and forms of worship; observances and rituals during worship ; 10, Adoration of Kṛishṇa through the medium of ammonite stones ; 11, Homa or worship through fire ; 12, Offerings ; 13, Imparting of mantras to disciples; 14, Attainment of mastery over mantras ; 15, Occasional forms of worship, and rosaries ; 16, Daily threefold worship ; 17, Worship of Kṛishṇa in his infantile form ; 18, Derivation and uses of various Vaishṇava mantras ; 19, Means of causing dementation ; mantras for female divinities ; 20,

Differences in the forms of adoration, and advantages of adoring Kṛishṇa under different forms; 21, Various mantras of Kṛishṇa; 22, Attainment of superhuman powers, and various mantras; 23, Attainment of eloquence; mantra &c. of Ráma; 24—28, Various mantras &c.; 29, Characteristics of mastry over mantras; 30, Duties of persons accepting particular mantras; 31, Attainment of true knowledge; praise of the Tantra.

Beginning. ॐ बालगोपालाय नमः ।
सिद्धाश्रमे वसन् श्रीमान् कदाचिद्गोतमो मुनिः ।
तपःस्वाध्यायनिरतो भक्तिमान् पुरुषोत्तमे ॥ १ ॥

End. इत्येवं कथितं प्रश्नं मया ते मुनिसत्तम ।
अस्यालोकनतश्चित्ते कृष्णात्मा सम्प्रसीदति ॥

Colophon. इति श्रीगोतमीये महातन्त्रे सर्वतन्त्रोत्तमे एकत्रिंशोऽध्यायः ॥
समाप्तश्चायं गोतमीयतन्त्राख्यो ग्रन्थः ॥०॥

विषयः । अत्रैकत्रिंशत्पटलाः सन्ति । १—कृष्णस्य दशाक्षरमन्त्रफलं । २—दशाक्षरमन्त्रोद्धारः । वीजानामीश्वरादिभावेनोपासना । क्लींकाराज्जगदुत्पत्तिक्रमः । मन्त्रस्य विनियोगादिकथनम् । अष्टादशाक्षरमन्त्रोद्धारः । वीजतत्त्वानां विन्यासः । प्राणायामाः । ३—काम्यन्यासाः । ४—वृन्दावनवर्णनम् । कृष्णध्यानम् । ५—गुरुलक्षणम् । शिष्यलक्षणम् । दीक्षाकालनिर्णयः । भूमिपरीक्षादयः । ६—यागमण्डपरचना । गेहकुण्डादिरचनाप्रकारः । ७—दीक्षाकथनम् । सन्ध्यात्रयकथनम् । पञ्चप्रकारार्च्चाकथनम् । स्नानद्वैविध्यम् । गङ्गावाहनादिकम् । विप्रपादोदकपानव्यवस्था । देवादितर्पणम् । कृष्णतर्पणप्रकारः । सूर्य्यपूजाप्रकारः । द्वादशविष्णुकथनम् । ८—वैष्णवानां द्वादशशुद्धिकथनम् । वृन्दावनध्यानम् । भूतशुद्धिप्रकारः । ९—पञ्चगव्येन देहादेः शोधनप्रकारः । पञ्चगव्यस्य मात्रानिर्वचनम् । अथ भूतशुद्धिः । मातृकान्यासादेर्विधानम् । अर्घ्यस्थापनप्रकारः । पीठपूजा । मन्त्रात्मदेवताध्यानम् । त्रिविधयजनक्रमः । विष्णोर्गन्धाष्टकम् । कलापूजनम् । कलाजपः । नवरत्नस्थापनम् । १०—कृष्णस्य पञ्चमुद्राभिरावाहनम् । प्राणप्रतिष्टा । शालग्रामादिजड़पदार्थविशेषेषु कृष्णार्च्चायाः नित्यकर्त्तव्यत्वम् । शालग्रामलक्षणम् । यन्त्रसामान्यलक्षणम् । यन्त्रविशेषलक्षणम् । कृष्णप्रतिमागठनप्रकारः । प्रतिमाद्वैविध्यम् । आवाहनादिमन्त्राः । आवाहनादिक्रमेण कृष्णपूजाप्रकारः । मुद्रालक्षणम् । ११—कृष्णमन्त्रानुसारेणाग्निज्वालनादिकम् । नित्यहोमः । शिष्याय चरुसमर्पणम् । कम्बलादिशुद्धासने शिष्यस्य

शयनविधिः। १२—मन्त्रसिद्धिचिह्नानि। बलिविधिः। ब्रह्मार्पणम्। १३—आत्मनि कृष्णसंस्कारः। शिष्याय मन्त्रदानम्। गुरुदक्षिणानियमः। १४—पुरश्चर्य्यासमयनियमः। भूमिपरिग्रहः। भक्ष्याभक्ष्यनियमः। पुरश्चरण-कृतः प्रात्यहिककर्त्तव्यक्रियोपदेशः। पुरश्चरणस्य स्थानविशेषे फलवैजात्यम। चक्रविचारविधिः। नानाविधमालानिर्म्माणं तथा तत् शोधनादिकम्। जपादिनियमलक्षणम्। जपदशांशहोमस्तथा तद्दशांशतर्पणादिकम्। १५—नैमित्तिकानुष्ठानव्यवस्था। १६—कृष्णस्य त्रैकालिकार्च्चनविधिः। १७—बालकृष्णस्य मन्त्रपूजादिकम्। १८—कृष्णमन्त्रयोः प्रयोगः। कूर्च्चवीजोद्धारश्च। नृसिंहवीजोद्धारः। वशीकरणप्रकारश्चेति। १९—उच्चाटनप्रकारः। स्त्री वीजम्। मन्मथगायत्र्यादिकञ्च। २०—कृष्णस्य मासविशेषे फलविशेषाय पूजाविशेषः। २१—कृष्णस्य नानाविधमन्त्राणामुद्धारस्तथा तत्तद्बीजादयश्च। २२—गङ्गावाहनमन्त्रः। तस्य वीजादयश्च। श्रुतिधरभवनप्रकारः। वाक्-सिद्धिभवनप्रकारः। कृष्णमहामन्त्रोद्धारः। यन्त्रधारणप्रकारः। २३—वाग्मि-भवनप्रकारः। कामगायत्र्यादिकम्। २४—रुक्मिणीवल्लभमन्त्रोद्धारादिकम। कामनाविशेषे फलदाः मन्त्राः। अष्टराज्यागममन्त्राः। तथा नानाफलदत्वे-नाभिहिता मन्त्राः। २६—अत्रापि फलविशेषप्रापकाः मन्त्रा एव। २७—अत्रापि तथैव। २८—अत्रापि तथैव। २९—मन्त्रसिद्धेर्लक्षणानि। ३०—मन्त्राचारनिर्द्देशम्। ३१—कार्य्ययोगकथनम्। मन्त्रयोगकथनम्। समा-धिकथनम्। ज्ञानमाहात्म्यम्। तन्त्रमाहात्म्यम्।

No. 1143. दायतत्त्वटिप्पनी।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 14. Lines, 7 on a page. Extent, 477 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, new. Prose. Generally correct.

Dáyatattva-ṭippaní. Notes on the Dáyatattva of Raghunandana, a treatise on inheritance. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय। तत्त्वं—स्वाश्रयप्रतिपादकत्वसम्बन्धेन तादृशस्मृतिव्याप्तत्ता-साधारणपरं दायभागत्वमिति यावत्॥

End. तत्र पितृतो भागकल्पनेत्याह।

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्यविरचिता दायतत्त्वटिप्पनी समाप्ता ।

विषयः । श्रीमद्रघुनन्दनभट्टाचार्यकृतदायतत्त्वस्य व्याख्यानम् ।

No. 1144. उद्वाहतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 15. Lines, 7 on a page. Extent, 518 sl'okas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, new. Prose. Generally correct.

Udváha-tattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding marriage. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय । नत्वा गुरोश्चरणपद्मरजांसि मूर्द्धा
श्रीकान्तकान्तचरणं प्रणिधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्बन्धतत्त्वविवृतिं वितनोति यत्नात् ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुं ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥

End. ननु श्रुवणीत्यादिवचनस्य छन्दोगपरिशिष्टीयत्वेन छन्दोगमात्रपरत्वमिति पाठः
क्वाचित्कः (इतः खण्डितम्)

विषयः । रघुनन्दनकृतोद्वाहतत्त्वव्याख्या ।

No. 1145. एकादशीतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3 inches. Folia, 47. Lines, 7—6 on a page. Extent, 1,299 s'lokas. Character, Bengali. Date ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Ekádasítattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding the fast on the eleventh day of the moon. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय ॥ अथैकादशीतत्त्वस्य टिप्पनी लिख्यते । तत्र वक्ष्यामीति ।

End. एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवमित्यर्थः ॥ (समाप्तिवाक्यं नास्ति)
विषयः । श्रीरघुनन्दनभट्टाचार्य्यविरचितैकादशीतत्त्वस्य व्याख्यानम् ।

No. 1146. मलमासतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 249. Lines, 7—6 on a page. Extent, 249 s'lokas. Character, Bengali, Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, old. Prose. Generally correct.

Malamásatattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding intercallary months. By Kás'iráma Váchaspati.

Beginning. नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्नि
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्यक् तनोति विवृतिं मलमासकस्य ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुम् ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥
मीमांसादिनानाशास्त्रपारदृश्वा श्रीरघुनन्दनभट्टाचार्य्यः प्राचीनविचक्षणगण-नानाविधव्याख्याजनितसन्देहस्य स्मृतिशास्त्रस्य मुन्यन्तरवचनयुक्तिभ्यां तत्त्वं निर्णीयेदानीन्तनानां सुखबोधाय निबन्धांश्चकार । अत्र च स्मृतिशास्त्रस्य स्वभावतो दुर्गमतया कानिचित्कठिनानि सन्ति अतस्तानि मया व्याख्यायन्ते ॥

End. यद्वा सदपि नाम असदेव तत्तन्मासविहितकर्म्मण्यनर्हत्वादित्याहुः ।
यं प्रासूत समस्तशास्त्रनिपुणः श्रीरामकृष्णात्मजः
श्रीराधोत्तरवल्लभाख्यसुकृती सङ्गीतचूड़ामणिः ।
तेन श्री + + काशिरामकृतिना यत्नेन निष्पादिता
टीका नातिसुष्ठुस्फुटापि कृतिभिः सानुग्रहैर्दृश्यताम् ॥

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचिता मलमासतत्त्वटिप्पनी समाप्ता ॥
विषयः । रघुनन्दनभट्टाचार्य्यकृतमलमासतत्त्वस्य व्याख्यानम् ।

No. 1147. याज्ञवल्क्यदीपकलिका ।

Substance, Europe paper, 18 × 3½ inches. Folia, 77. Lines 8 on a page. Extent, 3,071 s'lokas. Character, Bengali. Date, Sk. 1793. Place of deposit, Navadvípa, S'rínátha S'iromaṇi. Appearance, new. Prose. Incorrect.

Yájñavalkya-dípakaliká. A commentary on the Institutes of Yájñavalkya. By S'úlapáṇi. The author lived during the reign of Lakshmaṇa Sena of Bengal, in the beginning of the twelfth century.

Beginning. ओं नमो गणपतये ॥ अशेषकलुषध्वंसि नत्वा विष्णोः पदाम्बुजम् ।
याज्ञवल्क्यस्मृतेष्टीकां शूलपाणिः समातनोत् ॥
अज्ञानतिमिरग्रस्तशास्त्रार्थप्रतिपत्तये ।
कृतेयं दीपकलिका कलिकालमलापहा ॥ योगीश्वरमिति ॥

End. त्रयाणां देवानां समाहारस्त्रयी तस्यावर्त्तप्रकाशकमिति ॥

Colophon. इति साङ्गड़ि(यानमहामहो)पाध्यायश्रीशूलपाणिभट्टाचार्य्यविरचितायां याज्ञवल्क्यटीकायां दीपकलिकायां तृतीयोऽध्यायः समाप्तः ॥

विषयः । याज्ञवल्क्यमहर्षिकृतस्मृतेर्व्याख्यानम् ।

No. 1148. तीर्थचिन्तामणिः ।

Substance, palm leaf, 15 × 2 inches. Folia, 184. Lines, 5 on a page. Extent, 4,140 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Srínátha S'iromaṇi Bhaṭṭáchárya. Appearance, decayed. Verse. Generally correct.

Tírtha-chintámaṇi. A summary of the duties to be observed at sacred places. The MS. is defective both at the beginning and at the end, and five chapters only are available. These treat successively of Prayága, Purushottama, Gañgá, Gayá and Báṛánasí. Owing to the absence of the end, the author's name cannot be ascertained.

Beginning. (प्रारम्भे पत्रचतुष्टयं खण्डितं) लं घृतमुख्यद्रव्यकं, गच्छन् देशान्तरं यत्तु श्राद्धं कुर्य्यात्तु सर्पिषा । यात्राद्यमिति तत्प्रोक्तं प्रवेशे च न संशय इति भविष्यपुराणवचनात् इदमाभ्युदयिकमिति तु केचित् ।

End. स्नानं कृत्वा तु गन्तव्यं गोप्रचे तु यशस्विनि ।
अहनि होलिका देवि अर्चितव्या प्रय(त्नतः)॥ (इतः परं खण्डितम्)

विषयः । यद्यपि खण्डितत्वादत्र कति विभागाः सन्तीति निर्णेतुमशक्यन्तथापि यावन्तः समुपलभ्यन्ते तावतां खलु प्रयागप्रकाश—पुरुषोत्तमप्रकाश—गङ्गाप्रकाश—गयाप्रकाश—वाराणसीप्रकाशानामेषां यथानिर्द्दिष्टं तत्तद्विषयाः प्रदर्श्यन्ते,

तत्राद्ये प्रयागप्रकाशे—सामान्यतीर्थयात्राविधिक्रमः । प्रयागतीर्थयात्राविधिः । अथ तत्प्रयोगः ।

द्वितीये पुरुषोत्तमप्रकाशे—भारतवर्षप्रशंसा तत्परिचयश्च । तथा तदन्तर्गतोत्कलप्रदेशप्रशंसा तत्परिचयश्च । सत्ययुगे प्रादुर्भूतेन्द्रद्युम्ननामधेयस्य राज्ञ इतिहासः, पुरुषोत्तमयात्राप्रवृत्तिप्ररोचकः । द्वादशाक्षरमन्त्रेण कृष्णपूजनविधिः । कृष्णदर्शनमाहात्म्यं । सुभद्रापूजाविधिः । नरसिंहपूजाविधिः । प्रसङ्गात्तन्मन्त्रोपासनफलकीर्त्तनञ्च । मत्स्यमाधवार्चनम् । पञ्चतीर्थीविधिः । पुरुषोत्तमक्षेत्रे सागरस्नानपूर्वकपुरुषोत्तमार्च्चनविधिः । इन्द्रद्युम्नसरःस्नानपूर्वकपुरुषोत्तमार्च्चनप्रकारः । महाज्यैष्ठ्यां पुरुषोत्तमयात्राविधिः । ततस्तत्प्रयोगः । सुभद्रारामसहितमञ्चस्थपुरुषोत्तमदर्शनमाहात्म्यं । कृष्णाभिषिक्तजलेनात्माभिषेकफलम् । सुभद्राबलरामसहितमञ्चस्थपुरुषोत्तमदर्शनप्रयोगः । प्रतियात्राफलम् । दक्षिणोदधेस्तटे वटराजसमीपे भगवत्कृष्णदर्शनविधिः, अथ तत्प्रयोगश्च । तत उत्कलदेशावस्थितकृत्तिवासःक्षेत्रपद्धतिः । तत्रादौ—क्षेत्रपरिचयः । कृत्तिवासोमहादेवस्य पूजनविधिः । ततस्तत्पूजनदर्शनादिमाहात्म्यम् । कृत्तिवासोऽर्च्चनप्रयोगः । अथ कोणार्कविधिरत्रैव रामेश्वरविधिरपि । ततो विरजाक्षेत्रप्रयोगः ।

अथ तृतीये गङ्गाप्रकाशरहस्ये—गङ्गामाहात्म्यम् । गङ्गाजलमाहात्म्यम् । गङ्गासेवनफलम् । गङ्गाभक्तिफलम । गङ्गातोयपानफलम् । गङ्गातोयपानप्रयोगः । गङ्गादर्शनफलम् । गङ्गादर्शनप्रयोगः । गङ्गास्मरणफलम् । गङ्गास्मरणप्रयोगः । गङ्गानामकीर्त्तनफलम् । गङ्गानामकीर्त्तनप्रयोगः । गङ्गास्पर्शनफलम् । गङ्गास्पर्शनप्रयोगः । गङ्गाभिलासफलम् । गङ्गाभिलासप्रयोगः । गङ्गास्नानफलम् । गङ्गास्नानप्रयोगः । कालविशेषे गङ्गास्नानफलम । अथ तत्प्रयोगः । एवं देशविशेषे गङ्गास्नानफलम् । अथ तत्प्रयोगः । गङ्गायामवगाहनफलम् । तथा तत्प्रयोगः । गङ्गाजलेन तर्पणफलम् । अथ तत्प्रयोगः । गङ्गातीरे शिवार्च्चनफलम् । अथ तत्प्रयोगः । गङ्गापूजाविधिः, अथ तत्प्रयोगः । गङ्गातीरे घृतधेन्वादिदानविधिः, अथ तत्तत्प्रयोगः । गङ्गायां व्रतफलमथ तत्प्रयोगः । गङ्गायां श्राद्धफलमथ तत्प्रयोगः । गङ्गान्तर्जलमरणफलम् । अथ तत्प्रयोगः । गङ्गा-

यामस्थिस्थितिफलम् । अथ मतप्रक्षेपप्रकारः । गङ्गायास्तीरक्षेत्रादिनिर्णयः । गङ्गातीरमृत्तिकाफलमिति ।

अथ तुरीये गयाप्रकाशखण्डे—गयामाहात्म्यम् । ततस्तत्परिचयादिकम् । प्रेतशिलाकृत्यविधिः । अथ गयाकृत्ये फल्गुतीर्थस्नानतर्पणषोड़शीप्रभृतिकृत्यादिकं प्रथमदिवसीयम् । ततो द्वितीयदिवसीयकृत्यं प्रेतशिलायां पिण्डदानादिकम् । अथ पञ्चतीर्थीकृत्यम् । पञ्चतीर्थीकर्मापेक्षया यद् द्वितीयदिनकृत्यं तत्कृत्यम् । पञ्चतीर्थीदिनोत्तरतृतीयदिनकृत्यम् । पञ्चतीर्थीदिनोत्तरचतुर्थदिनकृत्यम् । पञ्चतीर्थीदिनोत्तरपञ्चमदिनकृत्यम् ।

पञ्चमे वाराणसीप्रकाशाभिधे—वाराणसीमाहात्म्यम् । वाराणसीक्षेत्रपरिचयादिकम् । वाराणसीक्षेत्रप्रवेशफलम् । वाराणसीवासफलम् । वाराणसीमरणफलम् । तत्रत्यदशाश्वमेधादितीर्थे स्नानदानादिफलम् । तत्रैव च देशविशेषावच्छेदेन च दानादिकार्यविशेषे फलविशेषकीर्त्तनम् । ततो वाराणसीयात्राकालनिर्णयः । यात्रायां विधिविहिततत्तत्कृत्यानि च । (एतत्प्रकाशस्य खण्डितत्वादितः परं किं किमस्तिकृत्यं तन्नोपलब्धम्) ।

No. 1149. शुद्धितत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 109. Lines, 7 on a page. Extent, 3,815 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

S'uddhitattva-ṭippaní. A gloss on the S'uddhitattva of Raghunandana—a treatise on purification. By Rádhámohana S'armá.

Beginning. ॐ नमो गणेशाय ॥ प्रणम्य परमानन्दं गोविन्दं मोहनद्विजः ।
करोति शुद्धितत्त्वार्थतात्पर्य्यस्यावधारणं ॥

End. तथा शूद्रायाः स्वप्रसवाशौचं सपिण्डमरणाशौ (इतः खण्डितं)

विषयः । रघुनन्दनभट्टाचार्य्यकृतशुद्धितत्त्वस्य व्याख्यानम् ।

No. 1150. मलमासतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 107. Lines, 7 on a page. Extent, 3,745 s'lokas Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Malamása-tattva-ṭippaní. A gloss on the Malamása-tattva of Raghunandana—a treatise on intercallary months. By Rádhámohana S'armá.

Beginning. श्रीगुरवे नमः। प्रणम्य राधानलिनीसुभृङ्गमङ्गं घनश्याममलमच्युतस्य ।
परं चिदानन्दमयं तनोति श्रीमोहनोऽर्थं मलमासतत्त्वे ॥

End. अन्यथा मलमासस्थले द्विवैतादिपदप्रयोगानुपपत्तेरिति ॥

Colophon. श्रीमदद्वैतवंशोद्भवश्रीराधामोहनभट्टाचार्यविरचिता मलमासतत्त्वटिप्पनी समाप्ता ।

विषयः । रघुनन्दनभट्टाचार्यकृतमलमासतत्त्वव्याख्या ।

No. 1151. दायतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 42. Lines, 7 on a page. Extent, 1,470 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Dáya-tattva-ṭippaní. A gloss on the Dáya-tattva of Raghunandana—a treatise on the law of inheritance. By Rádhámohana S'armá.

Beginning. प्रणम्य राधिकाकान्तं कृष्णं संसारलोचनं ।
श्रीराधामोहनो दायतत्त्वव्याख्यां करोत्यसौ ॥

End. क्रमेण धनाधिकारे वानप्रस्थस्यापि सतीर्थ्याद्यभावे धनसम्बन्धी विवेच्य इति सङ्क्षेपः ।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतमहाप्रभुवंशसम्भवश्रीराधामोहनभट्टाचार्यविरचिता दायतत्त्वटिप्पनी समाप्ता ।

विषयः । श्रीरघुनन्दनभट्टाचार्यविरचितदायतत्त्वस्य व्याख्यानम् ।

No. 1152. प्रायश्चित्ततत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 86. Lines, 6 on a page. Extent, 2,666 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Práyas'chitta-tattva-ṭippaní. A gloss on the Práyas'chitta-tattva of Raghunandana—a treatise on expiations, By Rádhámohana S'armá.

Beginning. ॐ नमः परदेवतायै ।

तड़िद्वीतोलीनाम्बुदरुचिररूपस्तरतले
लसद्वंशीनादाम्रृतनिकरवर्षी प्रियसखि ।
नवीनोऽयं किं मे रचयति हृदीतीङ्गितकथा
म्रदुस्पन्दा राधा जयति वकशत्रोर्हृदि गता ॥
स्फुटं प्रायश्चित्ततत्त्वव्याख्या मोहनशर्मणा ।
क्रियतेऽद्वैतवंशेन गोविन्दरतिकाम्यया ॥

End. सुरापानस्य जातिमात्रनिषेधात्तदित (इतः खण्डितं)

विषयः । श्रीरघुनन्दनकृतप्रायश्चित्ततत्त्वस्य व्याख्यानम् ।

No. 1153. अनुमानचिन्तामणिटिप्पनी ।

Substance, country-made yellow paper, 18 × 3½ inches. Folia, 230. Lines, 8 on a page. Extent, 8,510 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chúḍámaṇi. Appearance, fresh. Prose. Generally correct.

Anumánachintámani-ṭippaní. A commentary on the Anumána Khanḍa of Gañges'a. By Mathuránátha Tarkavágis'a. (See vol. I., p. 295.)

Beginning. ओं नमो गणेशाय ।

नवीननीरदश्याममञ्जुमञ्जुललोचनं ।
वल्लवीवल्लभं वन्दे वृन्दावनविहारिणं ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दृश्यन्ते द्वितीयमणिफक्किका ॥

प्रत्यक्षं निरूपितमिदानीमनुमानं निरूपणीयं, अतः शिष्यावधानाय प्रतिजानीते प्रत्यक्षानन्तरमित्यादिना ।

End. तथाप्युद्भावने कथकसम्प्रदायसिद्धप्रकारभेदोऽनेन दर्शित इति न काप्यनुपपत्तिरिति सङ्क्षेपः ॥

Colophon. इति महामहोपाध्यायश्रीमथुरानाथतर्कवागीशभट्टाचार्यविरचिता अनुमानटिप्पनी समाप्ता ॥

विषयः । गङ्गेशोपाध्यायविरचितानुमानखण्डस्य बाधान्तस्य व्याख्यानं ।

No. 1154. अभिधादिवादचिन्तामण्यालोकटिप्पनी ।

Substance, country-made yellow paper, 17½ × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 260 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chúḍámaṇi. Appearance, old. Prose. Generally correct.

Avidhádiváda Chintámanyáloka-ṭippaní. A commentary on a portion of the S'abdakhaṇḍa of Gaṅges'a. By Mathuránátha Tarkavágis'a. See vol. I., p. 295.

Beginning. अपि च सङ्कल्पादीनां समुच्चितानां प्रवर्त्तकत्वमेकस्यैव मतमिति भ्रमनिवारणाय मतभेदं स्फुटयति——अभिधेत्यादिना ।

End. विधित्वानुपपत्त्या च नोचितमिति सर्वत्र न हेतुद्वयान्वय इति यदुक्तं तद्बीजं स्वयमेवाह हेतुद्वयमित्यादिना ।

Colophon. इत्यभिधावादादिमिश्रव्याख्या सम्पूर्णा ॥

विषयः । अभिधावादचिन्तामण्यालोकव्याख्यानं ।

No. 1155. सन्निकर्षविचारः ।

Substance, country-made yellow paper, 15½ × 3½ inches. Folia, 13. Lines, 8 on a page. Extent, 565 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭácharya. Appearance, decayed. Prose. Incorrect.

Sannikarsha-vichára. A Nyáya dissertation on perceptible evidence. By Govinda.

Beginning. ओं नमो गणेशाय । प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमा चतुर्विधा, तत्रे-
न्द्रियसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं ।

End. द्रव्यविषयतायां लौकिकत्वनिवेशादिति समासः ।

Colophon. इति सन्निकर्षविचारः ॥

विषयः । षड्विधप्रत्यक्षाणां कारणनिर्वचनम ।

No. 1156. आत्मतत्त्वविवेकटीका ।

Substance, country-made yellow paper, 16½ × 3½ inches. Folia, 18. Lines, 8 on a page. Extent, 819 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

A'tmatattva-viveka-ṭíká. A commentary on the A'tmatattva-viveka of S'ankara A'chárya. By Govinda.

Beginning. ओं नमः परदेवतायै ।

नत्वा कृष्णपदद्वन्द्वं श्रीगोविन्देन धीमता ।
आत्मतत्त्वं प्रवक्तव्यं केवलं मोक्षहेतवे ॥

End. विशिष्टस्वप्रतियोगिसमानाधिकरणसम्बन्धेन तथाविधसंयोगनाशस्य तत्र स्वन्त-
(इतः खण्डितं)

विषयः । आत्मतत्त्वविवेकस्य कियदंशस्य व्याख्यानं ।

No. 1157. काव्यप्रकाशभावार्थः ।

Substance, country-made yellow paper, 17 × 2½ inches. Folia, 29. Lines, 7 on a page. Extent, 1,027 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Bhuvanamohana Vidyáratna Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

Kávyaprakás'a-bhávártha. A commentary on the Kávyaprakása of Mammaṭha Bhaṭṭa—a treatise on Rhetoric. By Rámakṛishṇa.

Beginning. ओं नमः कृष्णाय ॥

सर्व्वैः काव्यैरच्यमानं प्रणम्य परमेश्वरं ।
काव्यप्रकाशभावार्था रामकृष्णेन गीयते ॥

End. भावप्रत्ययरूपतद्धितार्थस्यैव विधेयतया भानेऽलक्ष्य (इतः खण्डितं)

विषयः। काव्यप्रकाशस्य व्याख्यानम्।

No. 1158. क्षणभङ्गुरवाददीधितिटिप्पनी।

Substance, country-made yellow paper, 15½ × 3 inches. Folia, 7. Lines, 8 on a page. Extent, 346 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

Kshanabhaṅgura-váda-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha on the section on mutability of matter in the *Anumána-chintámaṇi* of Gaṅges'a.

Beginning. (प्रारम्भे चतुर्विंशत्यधिकशतपत्राणि न सन्ति) यतं, विभिन्नकालावच्छिन्नमेक-
धर्म्मिणि कार्य्यकारित्वाकारित्वसत्वं।

End. सङ्ग्राह्यसङ्ग्राहकभाव इति भावं स्पष्टयति तथा चेति, ननु व्याप्य (इतः खण्डितं)

विषयः। क्षणभङ्गुरवाददीधितिव्याख्यानम।

No. 1159. प्रत्यक्षालोकरहस्यं।

Substance, country-made yellow paper, 17 × 3 inches. Folia, 49. Lines, 7 on a page. Extent, 3,738 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chuḍámaṇi. Appearance, decayed. Prose. Incorrect.

Pratyakshá loka-rahasya. A gloss on Jayadeva Mis'ra's commentary on the Pratyaksha Khaṇḍa of Gaṅges'a's Chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. नमो गणेशाय।

श्रीमता मथुरानाथतर्कवागीशधीमता।
विशदीक्षत्य दर्श्यन्ते प्रत्यक्षालोकफक्किकाः॥
निर्विघ्नं प्रारीप्सितग्रन्थसमाप्तिकामनया कृतं स्तुतिपूर्वकं भगवत्प्रार्थनरूपं मङ्गल
मिष्यशिक्षायै आदौ निबध्नाति—वक्राणीति॥

End. अप्रामाण्यग्राहकेति ॥ प्रकृतप्रामाण्याश्रये ज्ञाने प्रकृतप्रामाण्यविरोधिग्राहकत्वर्थः अ (इतः खण्डितं)

विषयः । प्रत्यक्षालोकव्याख्यानं ।

No. 1160. सामान्यलक्षणाव्याख्या ।

Substance, country-made yellow paper, 8¼ × 4½ inches. Folia, 26. Lines, 11—13 on a page. Extent, 482 s'lokas. Character, Bengali. Date, Sk. 1785. Place of deposit, Navadvípa. Haramohana Chuḍámaṇi. Appearance, new. Prose. Incorrect.

Sámánya-lakshná-vyákhyá. A gloss on Jagadís'a's commentary on the commentary of Raghunátha on the section on the major term in the Anumána Chintámaṇi of Gañges'a. By Haramohana.

Beginning. श्रीरामो जयतु ॥

श्रीराममिव मत्तातं श्रीरामं पुरुषोत्तमं ।
शिरोमणितयाख्यातं वन्देहमतियत्नतः ॥
सामान्यलक्षणा व्याख्या जगदीशेन या कृता ।
तां टिप्पनीं श्रिया युक्तस्तनुते हरमोहनः ॥
नानाशास्त्रविचारणारणरटच्छङ्काहिसम्मर्द्दिन-
स्तच्छ्रीरामशिरोमणेः पितुरिदं पादाम्बुजं प्रार्थये ।
टीका श्रीहरमोहनेन बहुशो यत्नात्कृता साम्प्रत-
मन्तेवासिगणस्य तोषजननी भूयाद्विपश्चिन्मुदे ॥
न्यायादिशास्त्रनिपुणानतिधीरगणान्
विज्ञान् प्रणम्य विततं परिवद्यामि ।
दूष्यं वचो यदि पुनः परिशोधनीयं
तस्मात्परोपकृतये च सतां हि यत्नः ॥

End. सैव प्रागभावव्यञ्जका इत्यपि वदन्ति ।
नत्वा रामपदारविन्दयुगलं प्रोत्फुल्लपङ्केरुहं,
रम्यं श्रीहरमोहनद्विज इहच्छात्रेच्छयैवेत्यहं ।
शाके बाणवसूदधीन्दुविमितेऽदः पुस्तकं निर्ममे ॥

विषयः । सामान्यलक्षणाजागदीशीटिप्पनीव्याख्यानं ।

No. 1161. कारककौमुदी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia 12 Lines, 7 on a page. Extent, 467 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Kṛishṇakánta S'iroratna. Appearance, old. Prose. Correct.

Káraka-kaumudí. A commentary on the section on cases, in the Sanskṛit grammar called Kátantra.

Beginning. अथापादानम् । तत्र यतोऽपैति तदपादानमिति कातन्त्रसूत्रम्,

End. एवं देवदत्तस्य स्वामीत्यत्र षष्ठ्या देवदत्तस्वकः स्वामीति गम्यते ।

Colophon. इति कारककौमुदी समाप्ता ।

विषयः । कातन्त्रसूत्रमूलकः कारकार्थविचारः ।

No. 1162. क्रियायोगसारः, पद्मपुराणान्तर्गतः ।

Substance, country-made yellow paper. Folia, 226. Lines, 6—7 on a page. Extent, 3,411 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Kṛishnaka'nta S'iroratna. Appearance, decayed. Prose. Incorrect.

Kriyáyogasára. A part of the Padma Purána. It is reckoned to be the most authentic portion of the Purána in question. It has been twice printed in Calcutta, and MSS. are common.

Beginning. श्रीहरये नमः ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
लक्ष्मीनाथपदारविन्दयुगलं ब्रह्मेश्वराद्यामर-
श्रेणीनम्रशिरोमणिन्नमलं वन्दामहे सन्ततम् ।
भक्त्या योगिमनस्तड़ागसुषमासन्दोहहृद्युत्तमं
गङ्गाम्भोमकरन्दविन्दुनिकरं संसारदुःखापहम् ॥

यां मूर्त्तिं बहुधा विधाय भगवान् रक्षत्यशेषं जगत्
यत्पादार्च्चनतत्परा न हि पुनर्मज्जन्ति विश्वार्णवे ।
सर्वप्राणिहृदम्बुजेषु वसतिर्यस्य प्रभोः सन्ततं
सव्यक्रोड़धृतेन्दिराय हरये देवाय तस्मै नमः ॥
वेदेभ्य उद्धृत्य समस्तधर्म्मान् योऽयं पुराणेषु जगाद देवः ।
व्यासस्वरूपेण जगद्धिताय वन्दे तमेकं कमलासमेतम् ॥

End. इदमतिशयगुह्यं निर्गतं व्यासवक्त्रात्-
सरसतरपुराणं प्रीतिदं वैष्णवानां ।
चिरममरवरौघैर्वाञ्छिताङ्घ्रेर्मुरारेः
सकलभुवनकर्त्तुश्चक्रिणः प्रीतयेऽस्तु ॥

Colophon. इति श्रीपद्मपुराणे क्रियायोगसारे व्यासजैमिनिसंवादे युगधर्म्मनिरूपणं नाम पञ्चविंशोऽध्यायः ॥ समाप्तश्चायं क्रियायोगसारः ॥

विषयः । अत्र पञ्चविंशतिः अध्यायाः सन्ति, तत्र प्रथमे—सूतशौनकसंवादः । जैमिनिवाक्यम् । व्यासवाक्यम् । भगवत्कथाश्रवणफलम् ।

२—सृष्टिप्रक्रिया । सागरनामानि । भगवद्भक्तमाहात्म्यलक्षणे । मधुकैटभप्रसङ्गः । ब्रह्मकृतस्तुतिः । वैष्णवमाहात्म्यलक्षणे ।

३—क्रियायोगतत्त्वमाहात्म्य । गङ्गाया गुणः । विष्णुपूजाफलम्, दानादीनां फलं, एकादशीभक्तिः, धात्रीभक्तिः, तुलसीभक्तिः, अतिथिपूजनम्, एतेषां गुणसंवादः फलसंवादश्च ।

४—प्रयागमाहात्म्यम् । इतिहासः । गङ्गासागरसङ्गमः ।

५—माधवचरित्रम् । चन्द्रकलाप्रसङ्गः ।

६—गन्धिनीप्रसङ्गः । सुलोचनावाक्यम् । विद्याधरप्रसङ्गः । प्रचेष्टप्रसङ्गः ।

७—सुलोचनावाक्यम् । भीमनादवाक्यम् । धर्म्मबुद्धिराजप्रसङ्गः । गण्डकनिपातनम् ।

८—वीरवरवाक्यम् । माधववाक्यम् । महाविष्णोः प्रतिमा । माधवकृतस्तवः । माधवं प्रति भगवद्वाक्यं । पुनर्गङ्गामाहात्म्यम् ।

९—विष्णुपूजाफलम् । माघे तदाधिक्यं । पुष्पफलमाहात्म्य । यमदूताः । विष्णुदूताः । नारायणनाममाहात्म्य ।

१०—प्रातःकृत्यानि । तत्र नारायणस्मरणं, निद्राभञ्जनं, विष्णुगृहमार्ज्जनं, भगवत्पूजादिकञ्चेति । विष्णुपादोदकमाहात्म्य । नैवेद्यमाहात्म्य ।

११—फाल्गुनादिमासविशेषे द्रव्यविशेषदानफलानि । अश्वत्थसेचनादि-

फलम्। ब्राह्मणकृतस्तुतिः। भगवतो ब्राह्मणस्य वरलाभः। अश्वत्थमाहात्म्यम्॥

१२—ज्यैष्ठे विष्णुपूजनं। आषाढे तथा। श्रावणभाद्रयोरपि। वैष्णवजनस्य रात्रिभोजननिषेधः। एकवस्त्रपरिधानेन पूजननिषेधः। सर्वकार्य्येष्वेव तिलस्यावश्यकत्वं। बाहुद्वये शङ्खचक्रादेरङ्कनप्रशंसा। आश्विने कार्त्तिके च विशेषपूजादिकं। ब्राह्मणकृतशिवस्तुतिः। शिवकर्त्तृकं ब्राह्मणाख्यानवर्णनम्।

१३—अग्रहायणपौषयोः पूजाविशेषोपाख्यानम्। पूजासमये पाषण्डजनसम्भाषणनिषेधः। वैनतेयाङ्कितघण्टाप्रशंसा। वीणादिवाद्यविशेषाणां वादनप्रशंसा। मुखवाद्यफलम्। मासे मासे हरिपूजनप्रशंसा।

१४—नारायणमाहात्म्यम्। सर्वास्वेव क्रियासु विष्णोः स्मरणं। सत्ययुगीयसत्यवसुनामकस्य वैश्यस्य आख्यानम्। रामनाममाहात्म्यम्। विष्णुदूतयमदूतयोः कलहः। ततः परस्परयुद्धे यमदूतस्य पराभवः, पराजितस्य तस्य यमनिकटे अभियोगः, यमस्य मीमांसा। षड्क्षररामगन्त्रस्य प्रशंसा।

१५—महाविष्णुमाहात्म्यम्। चक्रिकोपाख्यानम्। तत्कृतस्तोत्रम्।

१६—पुनर्विष्णुमाहात्म्यम्। भद्रतनूपाख्यानम्। सुमध्यवाक्यम्। मार्कण्डेयवाक्यं। दान्तभद्रयोः परस्परालापः। अष्टोत्तरशतं नामानि। भद्रतनुरचितजगन्नाथस्तोत्रम्।

१७—पुरुषोत्तमतीर्थमाहात्म्यम्। अन्नसमुद्रयोर्माहात्म्यम्। बलभद्रसुभद्राश्रीकृष्णदर्शनं। फाल्गुनमासे गोविन्ददर्शनं। एवं चैत्रादिमासे जगन्नाथदर्शनफलम्। गुण्डिचामण्डपे श्रीकृष्णदर्शनफलम्। शयने उत्थाने च श्रीजगन्नाथदर्शनफलम्॥

१८—पुनः श्रीकृष्णमाहात्म्यम्। उर्व्वीशोपाख्यानम्। विष्णुनैवेद्यमाहात्म्यम्। स्वजनेरुपाख्यानम्। स्वप्ने केशवदर्शनं। स्वजनिकृतस्तवः। ब्राह्मणवाक्यम्। भगवद्वाक्यम्।

१९—दानतपोमाहात्म्यम्। हरिशर्म्मोपाख्यानम्।

२०—पात्रार्हणाविवेचनम्। ब्राह्मणप्रशंसा। विष्णुबुद्ध्या ब्राह्मणे नमस्कारविधिरवस्थाविशेषे च निषेधव्यवस्था। विप्रपादसेचनमाहात्म्यप्रस्तावे हरिशर्म्मणः पूर्वजन्मवृत्तान्ताद्युपन्यासः।

२१—एकादशीमाहात्म्यं। दशमीकृत्यम्। विष्णुमन्दिरे शङ्खादिचित्रलेखनप्रशंसा। विष्णुपूजा।

२२—कोटिरथाख्यराजोपाख्यानम्। पुण्यात्मनां पापिनाञ्च पथिनिर्द्देशः। नरकवर्णना।

२३—तुलसीमाहात्म्यन्तथा धात्रीमाहात्म्यम् ।

२४—अतिथिसत्कारमाहात्म्यम् ।

२५—सत्यत्रेतादियुगानां माहात्म्यम्, पाठफलं श्रवणफलञ्चेति ॥

No. 1163. सत्काव्यकल्पद्रुमस्य प्रथमखण्डः ।

Substance, country paper, 13½ × 5½ inches. Folia, 20. Lines, 9—10—11 on a page Extent, 725 s'lokas. Character, Bengali. Date, Sk. 1795. Place of deposit, Navadvípa. Kṛishṇakánta S'iroratna. Appearaance, new. Verse. Incorrect.

Satkárya-kalpadruma. Volume first of a collection of miscellaneous verses from standard authors interspersed with verses composed by the compiler. By Kṛishnakánta Kavi.

Beginning. ध्यात्वा शङ्करपादपद्मयुगलं प्राचीनपद्यावलीं
सङ्गृह्य स्वकृतं तथा सुकविताहन्दं सदानन्ददम् ॥
साहित्यार्णवरत्नराजिसदृशं श्रीकृष्णकान्तः कवि-
र्धीराभीष्टफलप्रदस्प्रतनुते सत्काव्यकल्पद्रुमम् ॥

End. संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ॥

विषयः । अत्र महाकविरचितानामुद्भटप्रायाणामपि प्रसिद्धमहाकविप्रणीतग्रन्थेभ्यः सङ्गृहीतश्लोकानां स्वकृतानाञ्च सङ्ग्रहस्तत्र यत् स्वविरचितं पद्यं तत् स्वल्पीदृश (*) चिह्नाङ्कितमिति । तत्रादौ आशीर्वादश्लोकाः । ततः शक्तिविषयकश्लोकाः । रामविषयकश्लोकाः । कृष्णविषयकश्लोकाः । काशीविषयकश्लोकाः । चैतन्यदेवविषयकश्लोकाः । ग्रीष्मकालवर्णना । वर्षाकालवर्णना । शीतकालवर्णना । वसन्तवर्णना । अशैत्यसौगन्ध्यमान्द्यत्रिविधगुणयुक्तवायुवर्णना । प्रभातकालवर्णना । अथ व्यवहारोपयिकनानातात्पर्य्यप्रकाशकनानाविधश्लोकास्तत्र सहायप्रशंसा । नारिकेलतरुविषयकश्लोकाः । यशोवर्णना । गुणप्रशंसा । कूटकविताः । संस्कृतवङ्गहिन्दिपारस्यभाषासङ्कलितश्लोकास्तथा संस्कृतवङ्गहिन्दीलण्डभाषामिश्रितश्लोकः । समस्यापूरणम् । ततः कतिचित्साधारणश्लोकाः ।

No. 1164. सत्काव्यकल्पद्रुमस्य द्वितीयखण्डः।

विषयः। आक्रम्य हनुमान्। रावणं प्रति निकषा। अङ्गदरावणयोरुक्तिप्रत्युक्ती। समुद्रतीरस्थितो रामः। चन्द्रोदये रामचेष्टा। सेतुबन्धारम्भः। रावणं प्रति शुकसारणौ। सीतायाः खेदः। लक्ष्मणशक्तिशेले रामस्य खेदः। रावणे हते मन्दोदरीचेष्टा। विभीषणस्य राज्याभिषेकः। हनूमन्तं प्रति भरतः। रामं प्रति पौरजनवाक्यं। कस्यचिद् भक्तस्य। श्रीकृष्णः। गोवर्द्धनधारणं। वस्त्रहरणं। गोपीषु कृष्णस्य भावः। रासलीला। खेचराणामुक्तिः। यशोदाविकल्पं। कृष्णस्य मथुरागमनं। मथुरामाहात्म्यं। गजेन्द्रमोचणे हरेश्चेष्टा। उद्धवं प्रति गोप्यः। तं प्रति कृष्णः। भजनमाहात्म्यं। जगन्नाथदेवः। बलरामः। मदनः। सरस्वती। लक्ष्मीः। गङ्गा। काशी। शिवः। अर्द्धनारीश्वरः। हरिहरौ। कार्त्तिकेयः। गणेशः। भृङ्गी। वृषः। चन्द्रः। सूर्य्यः। भ्रमरः। पद्मं। पद्माकरः। मत्स्यः। हंसः। चक्रवाकः। खञ्जनः। शुकः। कोकिलः। काकः। मत्स्यरङ्गः। चेमङ्करी। पचिमारः। चम्पकवृक्षः। पलाशः। रसालः। नारिकेलः। गुवाकः। हिन्तालः। तालः। श्रीफलः। शाल्मली। मन्दारवृक्षः। दूर्व्वा। अर्कवृक्षः। महावृक्षः। कल्पवृक्षः। चन्दनतरुः। गुरुः। पर्व्वतः। शरभः। सिंहः। हस्ती। अश्वः। हरिणः। कुक्कुरः। मेघचातकौ। समुद्रः। शङ्खः। भेकः। सर्पः। मणिः। स्वर्णं। गुञ्जा। सज्जनः। खलः। सुजनदुर्ज्जनौ। मूर्खः। पण्डितः। विद्याप्रशंसा। दरिद्रः। धनी। धनप्रशंसा। कृपणः। दाता। प्रेम। गृहं। प्रदीपः। चामरं। कूपः। कलियुगं। वृद्धः। कर्म्म। भवितव्यं। आशा। भावाशुद्धिः। कुज्झटिका। खद्योतः। गर्द्दभः। तन्तुवायः। नवरत्नादिः। प्रातःकालः। सायङ्कालः। हेमन्तः। शिशिरः। वसन्तः। ग्रीष्मः। वर्षा। शरत्। वायुः। राजप्रयाणं। रणभूमिः। खड्गः। धनुः। प्रतापः। यशः। राजस्तुतिः। आदिरसः। नवोढा। अभिसारिका। मानिनी। प्रवत्स्यत्पतिका। प्रोषितभर्तृका। सखीप्रबोधः। प्रोषितनायकं प्रति सखीवाक्यं। विरहः। स्वयं दूती। प्रवासादागतः पतिः। स्मरान्धा। नायिकानिष्क्रमणं। विप्रलब्धा। खण्डिता। कलहान्तरिता। केशः। मुखं। नेत्रं। अधरः। दन्तः। बाहुः। रोमाबली। त्रिबली। मध्यदेशः। स्तनः। वेश्या। तच्चरित्रं। सखीनीतिशिक्षा। द्यूतः। भूषणं। सहायः। भाग्यं। स्त्री। पुत्रः। मिश्रश्लोकाः। विरहिणी॥
विषयानेतान् अवलम्ब्य कोषकाव्यरूपतया विरचितोऽयं ग्रन्थः॥ इति समाप्तिः॥

Postscript. Since writing the above, I have had an opportunity of examining the MS. myself. I find the verse in which the date of Lakshmaṇa Sena is given is defective. It is in the Áryá metre, which

requires twelve instants in the first foot, eighteen in the second, twelve in the third, and fifteen in the fourth; but as the verse stands in the MS. and also in another codex belonging to the Serampore College, the second foot is short by one instant, and the last by two instants. The words which give the date are *rasa* = 6, *eka* = 1, and *rins'a* = 20; if we add these figures they would give 27 years; if we read them from the right we get 0216, which is intolerable in Sanskrit; transferring the figures intellectually the product is 2016, or reading *eka* and *rinsa* together for twenty-one, and intellectually reading from the right, the result is 216, or reading them after writing them down we have 126. None of these figures correspond with history. Leaving out of consideration the two larger figures which are obviously inadmissible, if we accept 216, Lakshmaṇa Sena would be too far removed from 1205, the year in which the work was written, to admit of the author's father serving in the army of that king. Even 126 is too long a period, and can be tolerated only by the supposition that the father of the author came to the command at a very early period of life at about the end of Lakshmaṇa's reign, that he got his son late in life, and that the son wrote the work at a very advanced age. If we accept the lowest figure (27) and believe the Lakshmaṇa of the author to be the last king of the Sena dynasty, the same whom Muhammadan writers call Lákhmaṇiya, the period of the reign would be too short, for the author of the *Tabkát i Náçiri* assigns him a reign of eighty years. It is useless, however to argue on the subject until the right reading of the verse is obtained. The last foot probably contained another figure.

No. 1182. ब्रह्मपुराणं ।

Substance, country-made yellow paper, 19 × 4½ inches. Folia, 248. Lines, 8 on a page. Extent, 9,424 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

Brahma Puráṇa. One of the great Puráṇas attributed to Vyása. The work comprises one hundred and twenty-three chapters. *Contents:* 1, Cosmogony. 2, Origin and descendants of Manus. 3, Rise of the Devas and Asuras. 4, Birth of Pṛithví, and derivation of the

word Mediní (name of the earth). 5, Cycles of Manus. 6, Creation of the sun, of shadow, of Saturn, and of As'visníkumára. 7, Solar race; story of Ilá; character of Yuvanás'va and other kings; destruction of Dhuṇḍa; story of Satyavrata and the deluge. 8, Story of Tris'anka; of Harischandra; of Sagara; destruction of Haihayas; descendants of Sagara and of the Nishádhas. 9, Creation of the moon and herbs; Rájasúya sacrifice performed by Soma, the moon; creation of Budha. 10, Story of Pururavas; marriage of Jahna with Káverí, origin of Vis'vámítra; of the river Kausikí; descendants of the Rishis. 11, Story of Ayu and others; story of Divodása; praise of Váráṇasí. 12—13. Story of Yayáti and of his descendants; ditto of Kártaviryárjuna. 14, Descendants of Kroshṭu; birth of Kṛishṇa. 15—16, Descendants of Vrishṇi; story of Samantyaka. 17, Continents and islands. 18, Extents of land and of water. 19, Nether regions. 20, Hell. 21, Spheres of the sun, moon, and stars. 22, Polar star. 23, Sacred places. 24, Story of certain sages and Bráhmaṇs. 25, Land fit for sacrifice. 26, Praise of the sacred pool of Koṇáditya. 27—31, Adoration of the sun, marriage of the sun, his hundred and eight names. 32—36, Birth and marriage of Párvatí. 37—38, Daksha's feast. 39, Description of Ekámra-tírtha, or Bhuvanes'vara. 40, Description of Utkala, Vaitarini and Purus'ottama. 41, Ditto of Avantipura. 42—43, Ancient history of Purus'ottama. 44—49, Story of Indradyumna and his establishment of the Temple of Jagannátha. 50 to 54, Story of Márkaṇḍeya, and his devotion to Jagannátha. 55, Praise of the Márkaṇḍeya Tank. 56, Praise of Narasiñha: 57, Ditto of Svetamádhava. 58—60, Directions for and praise of bathing in the sea near Puri. 61, Praise of Panchatírtha. 62—63, The feast of Mahájyais'hṭhí, or the bathing festival. 64, Jagannátha's journey to Guṇḍíchá. 65, The twelve annual festivals. 66, The regions of Vishṇu. 67, Special merits of the Kshetra. 68, Praise of Ananta-Vásudeva. 69, The merit of dying at this kshetra. 70, The story of Kaṇḍu. 71 and 72, The various forms of Vishṇu described. 73, Birth of Krishṇa. 74—78, Krishna's early deeds. 79, Amours of Kṛishṇa and the Gopís. 80, The journey of Akrura to Gokula with the news of Kṛishṇa. 81, Departure of Baladeva and Kṛishṇa to Mathurá. 82—83, Kṛishṇa's feats of valour at Mathurá and destruction of Kañsa. 84, Destruction of Panchajana and the

recovery of a conch-shell from him. 85, Attack of Mathurá by Jarásandha. 86, Encounter of Kṛishṇa with Muchukunda. 87, Baladeva's return to Gokula. 88, He indulges in spirituous drinks. 89, Marries Rukminí. 90, Destruction of Sambara. 91, The wives of Krishṇa; marriage of Aniṛuddha with the grand-daughter of Rukmin; Gambling of Baladeva and Rukmin; destruction of Rukmin. 92, Destruction of Tárakásura. 93, The loot of Párijata flower. 94, Kṛishṇa's assumption of sixteen thousand and one hundred forms for the gratification of his numerous wives. 95—96, Marriage of Aniruddha with Ushá. 97, Vásudeva kills Pauṇḍra. 98, Rape of the daughter of Duryodhana by Sámba and the battle with Baladeva. 99, Destruction of Dvivida. 100, The fall of the Yádavas. 101, Funeral of Baladeva and Kṛishṇa; Arjuna's discourse with Ashṭávakra and return to Hastinápur; the Páṇḍava's retirement to a wilderness. 102, The ten incarnations of Vishṇu. 103, The regions of Yama described. 104, Sins and their appropriate punishments. 105, Vicious actions; s'ráddhas. 106, Good behaviour, treatment of vicious men in the regions of Yama. 107, Causes which lead to the transmigration of human souls into animal forms. 108, The course of creation. 109, The regions of the Pitris; s'ráddha described in detail. 110, Daily and occasional s'ráddhas and articles fit to be offered on those occasions. 111 and 112, Duties of the different orders of society. 113, Acts which reduce Bráhmaṇs to the condition of S'údras. 114 and 115, Means of translation to heaven. 116, Reflection of Hari the only means of severing the bonds of the earth. 117, The after-life of Vaishṇavas. 118, Praise of keeping up the night on the 11th of the moon; story of a Chaṇḍála; ditto of a Bráhmaṇa and a Rákshasa; ditto of Urvasí and a Bráhmaṇa. 119, The illusion of Vishṇu. 120 and 121, Duties to be observed in the present Kali age. 122, Periodical destruction of the earth. 123, Substantial destruction of the earth; Sáṅkhyayoga; praise of the Puráṇa. Wilson's Vishṇu Puráṇa I p. XXVII.

Beginning. यस्मात् सर्व्वमिदं प्रपञ्चर(?स)हितं माया जगज्जायते
यस्मिंस्तिष्ठति याति चान्तसमये कल्पाच्च कल्पं पुनः ।
यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोच्च ध्रुवं
तं वन्दे पुरुषोत्तमाख्यमखिलं नित्यं विभुं निश्चल ॥

यं ध्यायन्ति बुधाः समाधिसमये शुद्धं वियत् सन्निभं
नित्यानन्दपदं प्रसन्नममलं सर्व्वेश्वरं सर्व्वगं ।
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुं
तं संसारविनाशहेतुमजरं नित्यं हरिं धीमहि ॥
सुपुण्ये नैमिषारण्ये विचित्रे सुमनोहरे ।
नानामुनिजनाकीर्णे नानापुष्पोपशोभिते ॥

End. व्यक्तं स एव चाव्यक्तं स एव पुरुषोऽव्ययः ।
परमात्मा स विश्वात्मा विश्वरूपधरो हरिः ॥
व्यक्ताव्यक्तात्मिका तस्मिन् प्रकृतिः सम्प्रलीयते ।
पुरुषश्चापि भो विप्रा व्यापिन्यव्याहतात्मनि ॥
द्विपरार्द्धात्मनः कालः कथितो यो मया द्विजाः ।
तदहस्तस्य विप्रेन्द्रा विष्णोरीशस्य कथ्यते ॥
व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा ।
तत्र स्थिता निशा चान्या तत्प्रमाणं तपोधनाः ॥
नैवाहस्तस्य न निशा नित्यस्य परमात्मनः ।
उपचारस्तथाप्येष तस्य शश्वत्तु कथ्यते ॥
इत्येव मुनिशार्दूलाः कथितः प्राकृतो लयः ।
इत्यादिब्रह्मपुराणं समाप्तं ॥ शुभमस्तु ॥

विषयः । अत्र त्रयोविंशत्यधिकशताध्यायाः, श्लोकाश्च दशसहस्रसङ्ख्यकाः ।
१ अध्याये, सङ्क्षेपेण सृष्टिवर्णनं । २ अ, मन्वादिवंशकथनं । ३ अ, देवासुराणामुन्नतिवर्णनं । ४ अ, पृथोरुत्पत्तिचरित्रकीर्त्तनं, भूमेर्मेदिनीतिसञ्ज्ञाव्युत्पत्तिकथनञ्च । ५ अ, मन्वन्तरानुकीर्त्तनं । ६ अ, आदित्योत्पत्तिः, सञ्ज्ञापरिणयः, मार्त्तण्डनामव्युत्पत्तिः, छायाजननं, शनैश्चरस्य जन्म, अश्विनीकुमारयोरुत्पत्तिवर्णनञ्च । ७ अ, सूर्य्यवंशवर्णनं, इलोपाख्यानं, युवनाश्वादीनां चरित्रकीर्त्तनं, धुन्धुबधः, सत्यव्रतोपाख्यानकथनञ्च । ८ अ, त्रिशङ्कूपाख्यानं, हरिश्चन्द्रादीनमुत्पत्तिः, सगरनामव्युत्पत्तिः, हैहयादीनां निधनकथनं, सगरवंशवर्णनं, निषधवंशकीर्त्तनञ्च । ९ अ, चन्द्रौषधीनां जन्मकथनं, चन्द्रकृतराजसूययज्ञकीर्त्तनं, बुधस्य जन्मविवरणञ्च । १० अ, पुरूरवआदीनामुपाख्यानं, कावेर्य्या सह जह्नोर्विवाहः, तद्वंशे विश्वामित्रादीनामुत्पत्तिः, कौशिकीनदीविवरणं, क्षत्यादीनां वंशकीर्त्तनञ्च । ११ अ, आयुरादीनामाख्यानं, दिवोदासप्रसङ्गेन वाराणसीवर्णनञ्च । १२ अ, ययातिचरितकीर्त्तनं । १३ अ,

विषयः। ययातिवंशकीर्त्तनं, कार्त्तवीर्य्यार्ज्जुनचरित्रवर्णनञ्च। १४ अ, क्रोष्टुवंशकीर्त्तनं, श्रीकृष्णजन्मकथनञ्च। १५।१६ अ, वृष्णिवंशकथनं, स्यमन्तकोपाख्यानवर्णनञ्च। १७ अ, द्वीपानां वर्षाणाञ्च वर्णनं। १८ अ, भूमिसागरद्वीपानां परिमाणादि-कीर्त्तनं। १९ अ, पातालविवरणं। २० अ, नरकवर्णनं। २१ अ, चन्द्र-सूर्य्यनक्षत्रमण्डलादीनां संस्थानकथनं। २२ अ, ध्रुवसंस्थितिकीर्त्तनं। २३ अ, तीर्थवर्णनं, तन्माहात्म्यकीर्त्तनञ्च। २४ अ, ऋषिभिः सह ब्रह्मणः संवाद-कथनं। २५ अ, कर्म्मभूमिप्रशंसा, भारतवर्षपरिमाणादिकीर्त्तनञ्च। २६ अ, कोणादित्यतीर्थतन्माहात्म्यकथनं। २७।२८।२९ अ, सूर्य्यपूजा, द्वादशा-दित्यकीर्त्तनं, सूर्य्यमाहात्म्यवर्णनं, ऋतुभेदेन सूर्य्यस्य वर्णभेदकथनं स्तवराज-कीर्त्तनञ्च। ३०।३१ अ, सूर्य्योत्पत्तिपरिणयादिकीर्त्तनं, तदष्टोत्तरशतनाम कथनञ्च। ३२।३३ अ, पार्व्वतीजन्मतपस्या-तद्ग्राहसंवादादीनां कीर्त्तनं। ३४ अ, पार्व्वतीस्वयम्वरे ब्रह्मादीनामागमनं, पार्व्वत्युत्सङ्गवर्त्तिपञ्चमुखशिशुकर्तृकं शक्रादीनां बाहुस्तम्भनं, देवानां शिवस्तुतिः, उद्वाहतत्स्थानवर्णनञ्च। ३५।३६ अ, देवानां शिवस्तुतिकरणं, गौरीकर्तृकहिमालयपरित्यागवर्णनञ्च। ३७।३८ अ, दक्षयज्ञभङ्गविवरणं, भद्रकालीवीरभद्रयोरुत्पत्तिः, दक्षकर्तृक-महादेवस्तुतिकीर्त्तनञ्च। ३९ अ, एकाम्रक्षेत्रवर्णनं, तत्र विन्दुसरोनामतीर्थ-कीर्त्तनञ्च। ४० अ, उत्कलदेशवर्णनं, तत्र वैतरणीनदीकीर्त्तनं, पुरुषोत्तम-माहात्म्यकथनञ्च। ४१ अ, अवन्तीपुरवर्णनं। ४२।४३ अ, क्षेत्रवर्णनं, पुरुषोत्तमपूर्व्ववृत्तान्तकथनञ्च। ४४।४५ अ, क्षेत्रवर्णनं, इन्द्रद्युम्नस्य अश्वमेध-यज्ञः, भगवत्प्रासादनिर्म्माणवर्णनञ्च। ४६ अ, इन्द्रद्युम्नस्य भगवत्प्रतिमानि-र्म्माणचिन्तावर्णनं। ४७ अ, तत्कृतपुरुषोत्तमकारुण्यस्तुतिकीर्त्तनं। ४८ अ, इन्द्रद्युम्नस्य स्वप्ने वासुदेवसन्दर्शनं, वृक्षच्छेदनकाले ब्राह्मणवेशेन हरिविश्व-कर्म्मणोः तत्समीपागमनं, भगवत्प्रतिमानिर्म्माणकथनञ्च। ४९ अ, इन्द्रद्युम्नं प्रति साक्षाद् भगवतो वरदानं, ब्रह्मकर्तृकपुरुषोत्तमदर्शनकाल-तन्माहात्म्य-कीर्त्तनञ्च। ५०।५१ अ, मार्कण्डेयस्य वटमूलाश्रयणं, प्रलयदर्शनकथनञ्च। ५२।५३।५४ अ, मार्कण्डेयस्य भगवत्कुक्षिपरिभ्रमणं, भगवतः स्तुतिः, भगव-द्दर्शनलाभकीर्त्तनञ्च। ५५ अ, मार्कण्डेयह्रदमाहात्म्यवर्णनं, श्रीकृष्णमाहात्म्य-कीर्त्तनञ्च। ५६ अ, नरसिंहमाहात्म्यवर्णनं। ५७ अ, श्वेतमाधवमाहात्म्य-कीर्त्तनं। ५८ अ. समुद्रस्नानविधानं। ५९ अ, श्रीकृष्णपूजाविधिः। ६० अ, समुद्रस्नानमाहात्म्यकथनं। ६१ अ, पञ्चतीर्थमाहात्म्यकीर्त्तनं। ६२ अ, महा-ज्यैष्ठीप्रशंसा। ६३ अ, श्रीकृष्णस्य स्नानमाहात्म्यकीर्त्तनं। ६४ अ, गुण्डिचा-

विषयः। याचामाहात्म्यकथनं। ६५ अ, द्वादशयात्राफलकीर्त्तनं। ६६ अ, विष्णुलोकानुकीर्त्तनं। ६७ अ, चैत्रस्य विशेषमाहात्म्यकथनं। ६८ अ, अनन्त-वासुदेवस्य माहात्म्यकथनं। ६९ अ, चैत्रे देहत्यागफलकथनं। ७० अ, कण्डूपाख्यानं। ७१। ७२ अ, विष्णोर्नानाविधमूर्त्तिवर्णनं। ७३ अ, अंशावतारकथनं। ७४ अ, श्रीकृष्णजन्मविवरणं। ७५ अ, पूतनावध-शकटासुरहनन-यमलार्ज्जुनमोचनादीनां कीर्त्तनं। ७६ अ, कालीयनागदमनं। ७७ अ, धेनुकासुर-प्रलम्बासुरयोर्वधः, गोवर्द्धनगिरिपूजनकीर्त्तनञ्च। ७८ अ, गोवर्द्धनधारण-कृष्णेन्द्रसंवादादीनां वर्णनं। ७९ अ, गोपीकृष्णयोः सङ्गीतकीर्त्तनं। ८० अ, अक्रूरस्य वृन्दावनयात्रा, केशिवधकथनञ्च। ८१ अ, रामकृष्णयोर्मथुराप्रयाणं, अक्रूरस्य जलमध्ये रामकृष्णसन्दर्शनवर्णनञ्च। ८२ अ, कंसरजकवधः, रामकृष्णयोर्मालाकारेण सह संवादवर्णनञ्च। ८३ अ, कुब्जादर्शनं, धनुर्भङ्गः, कुवलयापीड़हननं, देवक्यादीनां रामकृष्णसन्दर्शनं, मुष्टिकचाणूरयोर्निपातनं, कंसवधवर्णनञ्च। ८४ अ, पञ्चजनाभिधदैत्यहननं, कृष्णस्य पाञ्चजन्यशङ्खप्राप्तिविवरणं, गुरुदक्षिणादानकीर्त्तनञ्च। ८५ अ, जरासन्ध्यकर्त्तृकमथुरारोधवर्णनं। ८६ अ, मुचुकुन्दकर्त्तृकश्रीकृष्णस्तुतिकीर्त्तनं। ८७ अ, बलदेवस्य गोकुले प्रत्यागमनवर्णनं। ८८ अ, बलदेवस्य वारुणीलाभः, तत्क्रीड़ावर्णनञ्च। ८९ अ, रुक्मिणीहरणवर्णनं। ९० अ, शम्बरवधपूर्व्वकं प्रद्युम्नागमनवर्णनं। ९१ अ, कृष्णमहिषीणां वर्णनं, रुक्मिणः पौत्र्या सह अनिरुद्धस्य विवाहः, बलरामरुक्मिणोः द्यूतक्रीड़ा, रुक्मिवधकीर्त्तनञ्च। ९२ अ, नरकासुरवधवर्णनं। ९३ अ, पारिजातहरणं। ९४ अ, कृष्णस्य शताधिकषोड़शसहस्रदेहपरिग्रहकथनं। ९५ अ, उषायाः स्वप्ने अनिरुद्धदर्शनं। ९६ अ, उषानिरुद्धयोर्विलासवर्णनं। ९७ अ. पौण्ड्रकाभिधवासुदेववधकीर्त्तनं। ९८ अ, शाम्बकर्त्तृकदुर्य्योधनकन्याहरणं, बलदेवेन सह कौरवाणां युद्धकीर्त्तनञ्च। ९९ अ, द्विविदनामकवानरवधवर्णनं। १०० अ, शाम्बस्य उदरात् मुषलोत्पत्तिः, उद्धवस्य वदरिकाश्रमगमनं, यादवानां निधनं. रामकृष्णयोः स्वधामगमनवर्णनञ्च। १०१ अ, रामकृष्णादीनामौर्द्ध्वदेहिकक्रियासम्पादनं, दस्यूनां समीपे अर्ज्जुनस्य पराजयः, अर्ज्जुनस्य व्याससमीपगमनं, अष्टावक्रेण सह अप्सरसां संवादकथनं, पाण्डवानां वनप्रवेशकथनञ्च। १०२ अ, ब्रह्मकर्त्तृकहिरण्यकशिपुवरदानकथनं, विष्णोर्दशावतारवर्णनञ्च। १०३ अ, यमलोकवर्णनं। १०४ अ, पापकर्म्मणां पृथक् पृथक् यातनाकथनं। १०५ अ, पुण्यजनककर्म्मकीर्त्तनं, श्राद्धविधिकथनञ्च। १०६ अ, सदाचारकथनं,

विषयः। धार्म्मिकानां यमलोकगमनवर्णनञ्च। १०७। १०८ अ, येन येन कर्म्मणा तिर्य्यग्योनित्वं भवति तद्विस्तारकथनं, संसारचक्रवर्णनञ्च। १०९ अ, पितृलोकोपाख्यानं, विस्तरेण श्राद्धविधिकथनञ्च। ११० अ, नित्यनैमित्तिकादिश्राद्धविधानं, श्राद्धे विहिताविहितद्रव्यकथनञ्च। १११। ११२ अ. विस्तरेण वर्णाश्रमाचारधर्म्मनिरूपणं। ११३ अ, केन केन कर्म्मणा द्विजः शूद्रत्वमाप्नोतीति कीर्त्तनं। ११४। ११५ अ, स्वर्गगमनोपायादिकीर्त्तनं। ११६ अ, हरिस्मरणमेव संसारबन्धनमोचनमित्याख्यानं। ११७ अ, वैष्णवादीनां गतिकथनं ११८ अ, हरिवासरमाहात्म्यं, गीतमाहात्म्यकथनप्रसङ्गेन चण्डालोपाख्यानकीर्त्तनं ब्रह्मराक्षसस्य स्वोत्पत्तिविवरणकथनं, उर्व्वशीब्राह्मणसंवादकीर्त्तनञ्च। ११९ अ, विष्णुमायाकथनं, विविधोपाख्यानवर्णनञ्च। १२०। १२१ अ, कलियुगधर्म्मकथनं। १२२ अ, नैमित्तिकप्रलयकीर्त्तनं। १२३ अ, प्राकृतप्रलयकथनं, साङ्ख्यकथनं, ब्रह्मवादकीर्त्तनञ्च॥

No. 1183. कृष्णतत्त्वामृतं।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 24. Lines, 8 on a page. Extent, 484 s'lokas. Character, Bengali. Date ? Place of deposit, S'ántipura, Kálídása Vidyávágís'a. Appearance, new. Prose and verse. Correct.

Kṛishṇa-tattvámṛita. A dissertation on the divinity of Kṛishṇa; the means of attaining salvation through him; and the dualistic philosophy of the Vaishṇavas. By Rádhámohana Gosvámi.

Beginning. श्रीकृष्णं परमानन्दलक्षणं पीतवाससं।
प्रणम्य तत्त्वमयमस्मृतं भावभावितं॥
संसारानलतापार्त्तिहारि भूरिसुखोदयं।
समुद्भावयति श्रीलमोहनो निगमार्णवात्॥
तत्र ब्रह्मसंहितायां।
"ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्व्वकारणकारणं॥"
अत्र कृष्णपदं कृष्णशरीरोपलक्षितपरतत्त्वपरं, यशोदास्तनन्धये नवतमालश्यामलत्विषि कृष्णशब्दो रूढ इति भगवच्चतन्यदेववाक्यात् कृष्णवर्णत्वात् पापकर्षणाच्च यौगिकरूढ़मपीत्यादि।

End. "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेदिति" सप्तमीयात् "कृष्ण एव परो देवस्तं ध्यायेदिति" गोपालतापनीवचनात् "असारे खलु संसारे सारं कृष्ण-पदार्च्चनमिति" गौतमीयात् "ईश्वरः परमः कृष्णः" इत्यादिवचनात्, अन्य-निरपेक्षो निरन्तरं श्रीकृष्णं भजेदिति शं।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतवंशसम्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्य-विरचितं श्रीकृष्णतत्त्वामृतं समाप्तं ॥

विषयः। श्रीकृष्ण एव नित्यनिरतिशयज्ञानानन्दाश्रयः परमेश्वर इति निरूपणं। आत्मनो ज्ञानाश्रयत्वकथनं। ज्ञानस्वरूपत्वकीर्त्तनं। प्रकृतितत्त्वनिरूपणं। मायास्वरूपकी-र्त्तनं। प्रसङ्गाद् भ्रमकथनं। परमात्मजीवात्मनोर्भेदः। आत्मज्ञानस्यैव मोक्ष-हेतुत्वं। श्रीकृष्णस्य गुणभेदेन ब्रह्मपरमात्म-भगवन्नामधेयत्वनिरूपणं। भगव-च्छरीरकथनं। गुणावताराः। प्रकृतेरुपादानकारणत्वकथनं। परमाणुवाद-खण्डनं। ब्रह्मोपादानवादिमतनिरासः। साङ्ख्यमतखण्डनं। वृन्दावनलीला-तिमधुरं श्रीकृष्णरूपमेव सर्व्वतो मनोहरमिति वर्णनं। भक्तिरेव तत्प्राप्त्युपाय इति कथनं। रूपादीनामप्राकृतत्वादिना शास्त्रे तस्यारूपादिविशेषणदान-मिति कथनं। विष्णुपुराणाद्युक्तकेशावतारकथादीनां मीमांसा। भगवद्भक्ति-निरूपणं, तद्विभागादिकञ्च। इति समाप्तिः॥

No. 1184. कविकान्ता।

Substance, country paper, 16 × 2¾ inches. Folia, 95. Lines, 6 on a page. Extent, 3,548 s'lokas. Character. Bengali. Date, Sk., 1599, Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old and decayed. Prose. Generally Correct.

Kavikántá. A commentary on the Raghuvañs'a of Kálidása. By Áchárjya Gopínátha Kavirája.

Beginning. अव्याज+ +व निजङ्गतोपि ———————— ।
अर्द्धार्द्धसन्धानकृतैकदेहौ गौरीगिरीशौ शिवमावहेतां ॥
विश्वं यशोभिरवदाय तु कालिदासो वाचा वि+ + +नवः पुरुषावतारः।
पुंसां प्रसादयति यस्य गिरां प्रपञ्चो वाणी+ + + + +क+ इवाम्बु सद्यः ॥
कविराजगोपीनाथ+ + +रघुवंशकाव्यस्य।
व्यञ्जितरसभावशेषं कविकान्ता रच्यते टीका ॥

श्रीकालिदासस्तुकवेर्वचसि प्रसङ्गादम्भोधितीरजलदाम्बुवचो मदीयं।
श्रादीयतां सुकृतिभिः कुसुमस्य योगात् रम्भागुण+ + + +वहवो वहन्ति॥
मनुमहाराजकुलजमहीपतीनां चरितानि विवर्णयिष्यन् सकलकविसार्थवाहः
श्रीकालिदासः परदेवतानमस्करणमैहिकामुस्मिकफलप्रदमिति श्राशीर्व्वाद-
वस्तुनिर्देशावुद्दिश्य देवतानमस्कारूपं महाकाव्यमुखमाह। वागर्थाविति।

End. रघुवृषभो रघुश्रेष्ठः सैनिकैः सह ++++समीयिवान् सङ्गतः सन् स्वमन्दिरं न्यवर्त्तयत॥ श्रीः॥

Colophon. इति श्रीमदाचार्य्यगोपीनाथ+ +कविराजकृतौ कविकान्ताख्यायां रघुवंशटीकायां नवमः सर्गः॥ श्रीः॥

पूर्व्वसर्गान्ते दशरथस्य पुत्रो + + + + + + नपुत्रोदयो भण्यते इति सर्गयोः सुसम्बिलं॥

नवनवशरचन्द्रे टिप्पनीं वै रघोस्तु,
समलिखदिति शाके सम्मिते सौम्यवारे।
शशधरपरिपूर्णे श्रावणस्य तृतीये,
मिहिर + + + + + + + + कृष्णशर्म्मा॥ (अतः परं खण्डितं)

विषयः। रघुवंशव्याख्यानं नवमसर्गान्तं॥

No. 1185. बालरामायणं।

Substance, country paper, 17 × 4 inches. Folia, 178. Lines, 5—6 on a page. Extent, 3,783 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura. Rámadhana Vidyávágis'a. Appearance, old. Prose and verse. Incorrect.

Bálarámáyaṇa. A drama founded on the incidents described in the Rámáyaṇa and the life of Ráma. By Rájasekhara Kavirája. The work is held in high estimation as a dramatic composition of great merit, and a very good edition of it has lately been published by Paṇḍit Bála S'ástrí of the Benares Sanskrit College.

Beginning. प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य श्राद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना।
यदात्मानो विद्याः परिणमति यथार्थवपुषा
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते॥

नान्द्यन्ते सूत्रधारः। ससंरम्भं परिक्रम्य। पुरोऽवलोक्य च सप्रश्रयमञ्जलिं बद्ध्वा, भो भो भुजस्तम्भालानितलक्ष्मीकरेणुना रघुकुलैकतिलकेन महेन्द्रपालदेवेन अधिकृताः सभासदः सर्व्वानेष वो गुणनिधिर्विज्ञापयति, विदितमेवैतद् भवतां। ++++++ + + + + ++++ + + + + + + + + + +

End. वशिष्ठः। रामं प्रति, किन्ते भूयः प्रियमुपकरोमि।

रामः। अतः परमपि प्रियमस्ति।

भग्नश्चाजगवं न चापि कुपितो भर्गः सुरग्रामणीः

सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारांनिधिः।

पौलस्त्यश्च हतः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः॥

प्राप्तं यानमिदञ्च याचितवते दत्तं कुबेराय च॥

तथापीदमस्तु। सम्यक् संसारविद्याविषदमुपनिषद् भूतमर्थाद्भुतानां

ग्रथ्नन्तु ग्रन्थिबन्धं वचनमनुपतत् सूक्तिमुक्ताः सुयुक्ताः।

सन्तः सन्तर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्त्ते-

स्तत्त्वं सात्त्विकैश्च प्रशमपिशुनितं भावयन्तोऽर्चयन्तु॥

इति निष्क्रान्ताः सर्व्वे।

इति राघवानन्दो नाम दशमोऽङ्कः॥

Colophon. इति श्रीकविराजराजशेखरविरचितं बालरामायणं नाम महानाटकं समाप्तं।

विषयः। आपाणिग्रहणाद् राजपदप्राप्तिपर्य्यन्तं रामचरित्रमवलम्ब्य दशभिरङ्कैः विरचितमिदं महानाटकं। तत्र शुनःशेफप्रवेशमुखेन प्रभातवर्णनं। तापसच्छद्मना प्रविष्टस्य राक्षसस्य तेन सह संलापः। प्रहस्तकेन सह रावणस्य जनकालयगमनं। तत्र सीतां पश्यतस्तस्य औत्सुक्यं, अज्ञातार्थता च धनुर्भङ्गाय कृतोद्यमस्य सत्यन्योन्यसमरोद्योगे जनकरावणयोः, माध्यन्दिनीं सन्ध्यामनुष्ठातुं निष्क्रान्तः रावणः। इति प्रतिज्ञापौलस्त्यो नाम प्रथमोऽङ्कः।

शिवस्य चात्मनोऽवस्थां वर्णयतो भृङ्गिरिटेः स्वप्रकृतिमनुचिन्तयता नारदेन सह परशुरामरावणयोः वीर्य्यविषयकं कथोपकथनं। सीतामनुसन्धाय रावणस्य मदनचेष्टितं। याचितपरशुना परशुरामेण यदभिहितं, रावणसमीपे मायामयस्य तत्कथनं। भार्गवदशमुखयोर्युद्धं। इति परशुरामरावणीयो नाम द्वितीयोऽङ्कः।

रम्भामिथुनसंवादप्रसङ्गेन ताड़कानिधनपूर्व्वकं रामचन्द्रेण मारीचो निगृहीत इति सूचना। रावणसमीपे 'सीतास्वयम्बराभिधान'नाटकस्य अभिनयः। तत्र, विश्वामित्रेण सह रामलक्ष्मणयोः स्वयम्बरसभाधिष्ठानं। रामस्य सीता

विषयः। सौन्दर्य्यपक्षपातः। तत्त्वेन सीतामनुसन्धाय रावणस्य उन्मादः। हेमप्रभया समं सीतायाः समागतराजदर्शनं। तत्र नरकासुरपाण्ड्यराजादीनां प्रशस्तिवर्णनोन्मुखायां सत्यां प्रतिहार्य्यां तत्त्वबुद्ध्या तद्वधार्थं रावणेन गृहीते चन्द्रहासे प्रहस्तकर्त्तृकं तन्निवारणं। पुनः, चेदिपति-सिंहलेश्वर-मथुरानाथावन्तिनाथ-क्रथकैशिकाधिपति-काञ्चीपुरेश्वर-लाटेश्वरप्रभृतीनां प्रशस्तिवर्णनं। धनुर्भङ्गे राजकुलस्य अक्षतार्थता तद्भङ्गाय दशमुखस्य उत्थानेच्छा। रामेण कृतेऽपि धनुर्भङ्गे प्रथमतो नाटकधिया तस्य अविश्वासः। जनकेन समर्पितायां जानक्यां रामचन्द्रकरे तस्य च पुनः संरम्भः। सन्ध्यावर्णनं। इति विलक्षलङ्केश्वरो नाम तृतीयोऽङ्कः।

रामचन्द्रं प्रति श्रुतभार्गवसमरसंरम्भेण शक्रेण दशरथः सत्क्रत्य सुरलोकात् तत्र प्रहित इति उपाध्यायबटुसंवादेन सूचितं। पुरन्दरस्यन्दनस्य चतुर्द्दिशं सत्तवारणीयफलकेषु परशुरामचित्रं लिखितमस्तीति वाचमाकर्ण्य मातलेः, सौदामिन्या सह हरकृतास्त्रोपदेश-रेणुकाशिरश्छेदनादिभार्गवचरित्रचित्रं पश्यतो दशरथस्य विमानाद् विदेहराजमन्दिरावतरणं। सीतां प्रति जनकशतानन्दयोः सुनयोपदेशः। जनकदशरथयोरन्योन्यमाप्यायनं। भार्गवसमीपे रामस्य विनयः। भार्गवनिग्रहाय जनकस्य धनुर्ग्रहणं। विश्वामित्रस्य तन्निवारणं। राममुद्दिश्य भार्गवस्य वैष्णवधनुरर्पणं। लक्ष्मणकर्त्तृकं तत्र ज्यारोपणं। उर्म्मिलादिभिः सह लक्ष्मणादीनां विवाहः। इति भार्गवभङ्गो नाम चतुर्थोऽङ्कः।

माल्यवतो मिथिलानिवासिना स्पर्शेन प्रहितस्य लेखस्य वाचनं विरचिता सीताप्रतिकृतिः रावणोपच्छन्दार्थं यन्त्रकारेण विशारदनामकेनेति मायामयवचनमाकर्ण्य, सयापि सीताधात्रेयिका कारिता सिन्दूरिका नाम, किञ्च, तत्प्रदर्शनेन दशाननः प्रलोभनीयस्त्वयेति तत्प्रति माल्यवत आदेशः। सीतासन्दर्शनाभिलाषिणो रावणस्य मायामयवाक्यस्मरणात् सीतानयनाय प्रहस्तं प्रति समादेशः। सीतां पश्यतः तस्य पूर्व्वरागः। तत्र सिन्दूरिकायाः सीतापूर्व्वरागवर्णनञ्च। सीतां प्रति तस्य स्वागतप्रश्नः। सीताया अनुरागव्यञ्जनं। तत्करस्पर्शेन सारिकाधिष्ठितं सीताप्रतिकृतियन्त्रमिति रावणस्य निश्चयः। तस्य चित्तविनोदनार्थं लीलोद्यानप्रवेशः। ऋतूनां वर्णनं। तत्र तस्य वैधुर्य्यवर्णनञ्च। रावणकृतमदनोपालम्भः। मन्दरकामिनी-हिमगिरिसुन्दरीप्रभृतीनां तत्सेवनार्थमागतानां 'पर्व्वतकलत्राङ्गसङ्गो नितरां तापयेति' तासां विसर्ज्जनं। रम्भामेनकादीनामप्सरसां ताम्रपर्णीमुरलाप्रभृतीनां नदीनाञ्च

विषयः। तद्दुपचारः। वारुणीलक्ष्मीसरस्वतीनां तत्कृततिरस्कृतिः। इन्दीवराकर-चन्द्रबिम्बमवलोक्य 'पुरन्दरोऽयं सीतामालिङ्गतीति' बुद्ध्या तस्य पुनः चन्द्र-हासस्मरणं। अत्रान्तरे छिन्ननासायाः शूर्पणखाया रावणसमीपे स्वावस्थाप्रदर्शनं। रावणकर्तृकतत्समाश्वासनञ्च। इति उन्मत्तदशाननो नाम पञ्चमोऽङ्कः।

शूर्पणखामायामययोर्माल्यवता सह संवादः। अथैकदा कैकेय्या सममसुरानीक-विजयाय दशरथे पुरुहूतं समुपस्थितवति तद्रूपधारिणौ रामचन्द्रं सपदि-च्छलयितुमयोध्यां शूर्पणखा अहञ्च प्रापतुः। ततश्च मन्थरारूपधारिण्या शूर्प-णखया 'महाराज! अद्य कैकेयी त्वया प्रतिपन्नं वरद्वयं याचते' इत्युक्तेन मया निर्व्वासितो राजपुत्रः प्रवृत्तश्च गन्तुं वनायेति माल्यवत्समीपे मायामयस्य कथनं। अत्रान्तरे कैकेय्या सह दशरथस्य अयोध्याप्रवेशः। वामदेवप्रमुखाद् रामस्य निर्व्वासनं श्रुत्वा तयोर्मूर्च्छा। लब्धसञ्ज्ञयोस्तयोर्विलापादि च। सुमित्राया वामदेवप्रदत्तपत्रिकावाचनं। तत्र समागतस्य सुमन्त्रस्य सर्व्वेषां समीपे नर्म्मदा-परपारगमनपर्य्यन्तं रामवनवासवृत्तान्तकथनं। अनन्तरमागतस्य जटायुर्दूतस्य रत्नशिखण्डस्य तेषां पुरतः, 'रामकृतमायामृगानुसरण-सीताहरण-जटायुःपत-नादि'वृत्तान्तकीर्त्तनं। इति निर्दोषदशरथो नाम षष्ठोऽङ्कः।

वैतालिकयुगलप्रवेशमुखेन रामकृतखरदूषणबध-बालिनिग्रहादीनां हनूमत्कृत-समुद्रोल्लङ्घनाशोकवनदलनादीनाञ्च कीर्त्तनं। समुद्रकूलोपविष्टस्य रामस्य चेष्टावर्णनं। रामेण परित्यक्ते आग्नेयास्त्रे गङ्गायमुनाभ्यां सह समुद्रस्य तत्पुरतो विनयः। सेतुबन्धनं। तत्र राक्षसैः सह वानराणां युद्धं। रामलक्ष्मणादीनां पुरतो दशमुखस्य सीताशिरश्छेदनं। रामस्य विलापः। निर्झूनादपि तन्मुखात् समुल्लासमाकर्ण्य तेषां विस्मयः। सिंहनादेन सह रामस्य युद्धं। इति असम-पराक्रमो नाम सप्तमोऽङ्कः।

सुमुखदुर्मुखाभिधानराक्षसयोः संवादकथनव्याजेन सिंहनादबध-लक्ष्मणशक्ति-शेलादीनां कथनं। रामरावणादीनां पुरतः तुलाद्यूते ताराकुमारेण कुमारो राक्षसपतेर्निहत इति वर्णनं। करङ्ककङ्कालाभ्यां सह रावणस्य लक्ष्मणमेघना-दयोरन्योन्यं सम्प्रहारदर्शनं। कुम्भकर्णप्रवोधः। वानरैः सार्द्धं तस्य युद्धं। कुम्भक-र्णादीनां निधनं दृष्ट्वा रावणस्य मूर्च्छा। इति वीरविलासो नामाष्टमोऽङ्कः।

पुरुहूतसमीपे चित्रगुप्तस्य लङ्कालेख्यकवाचनं। रामरावणयोर्युद्धदर्शनाय चा-रणमिथुनाभ्यां समं देवराजदशरथयोस्तत्र प्रवेशः। तयोर्घोरसमरवर्णनं। संवृत्ते रावणबधे रामलक्ष्मणयोरुपरि पुष्पवृष्टिः। इति रावणबधो नाम नव-मोऽङ्कः।

विषयः। अलकया सह सशोकाया लङ्कायाः प्रवेशमुखेन सीताया वह्निशुद्धिः, भरतस्य पार्श्वं हनूमान् प्रेषितश्चेति सूचना। विमानमानेन रामलक्ष्मणादीनाम् अयोध्यायात्रा। तत्र सीतामुद्दिश्य रामस्य युद्धस्थलीप्रदर्शनं। पुरन्दरप्रेरितस्य विद्याधरस्य तेषां पुरतो रामदिव्यचरितकीर्त्तनं। सीतामुद्दिश्य तस्य हिमालयकैलासमानससरोवरादीनां वर्णनं। तत्र सुग्रीवादीनां समुद्रवर्णना। सिंहलस्य। समुद्रकुलस्य। माल्यवतः। मलयस्य। ताम्रपर्णीनद्याः। अगस्त्याश्रमस्य। तत्र रामलक्ष्मणप्रभृतीनामगस्त्येन समं साक्षात्कारः। द्रविड़देशस्य वर्णनं। सप्तगोदावरीतीरे परशुरामस्य। कावेर्य्याः। महाराष्ट्रदेशस्य। नर्म्मदायाः। लाटदेशस्य। उज्जयिनीस्थमहाकालनाथस्य। मालवदेशस्य। यमुनायाः। पञ्चालदेशस्य। महोदयनामकनगरस्य। कान्यकुब्जस्य। प्रयागस्य। वाराणस्याः। मिथिलायाश्च वर्णनं। अयोध्याप्राप्तिः। भरत-शत्रुघ्नपुरःसरेण वशिष्ठेन सह सर्व्वेषां सम्भाषणादिः। इति राघवानन्दो नाम दशमोऽङ्कः।

समाप्तोऽयं ग्रन्थः।

No. 1186. शब्दखण्डः।

Substance, country paper, 22 × 5 inches. Folia, 154. Lines, 9—12, on a page. Extent, 7,535 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭáchárya. Appearance, very old. Decayed. Prose. Correct.

S'abdakhaṇḍa—Being the last part of Gañges'a's *Tattva-chintámaṇi.* The work treats from a logical standpoint the value of Testimony as a proof. In the course of his dissertation, the author reviews at length the opinions of his predecessors. The MS. is a very old and remarkably correct one. Vide ante I. p. 295.

Beginning. अथ शब्दो निरूप्यते। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणं। ननु शब्दो न प्रमाणं। तथा हि, करणविशेषः प्रमाणं, करणञ्च तद् यस्मिन् सति क्रिया भवत्येव। न च शब्दे सति प्रमाणं भवत्येवेति नायं शब्दः प्रमाणं। इत्यादि।

End. ऐतिह्यञ्च आप्तोक्तत्वेन शब्द एव अन्तर्भवति। अर्थापत्त्यनुपलब्ध्योस्तु यथायथमन्तर्भावः प्रागेव चिन्तितः। अतः सिद्धं चत्वारि प्रमाणानीत्युपरम्यते।

धीराः कुशाग्रमतयो भवतः प्रणम्य
मौलौ निधाय करवारिरुहे समीहे ।
वाणीयमर्थरहितापि विशृङ्खलापि
सानुग्रहेण हृदयेन विलोकनीया ॥ शिवं ।

Colophon. इति महामहोपाध्यायगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ शब्दखण्डस्तुरीयः परिच्छेदः समाप्तः ॥०॥

विषयः । शब्दलक्षणं । तत्प्रामाण्ये सौगतमतं । वैशेषिकमतं । स्वीयमतं । जरन्मीमांसकमतं । प्राभाकरमतञ्च । आकाङ्क्षानिरूपणं । तत्र नव्यमतं । योग्यतानिरूपणं । आसत्तिनिरूपणं । तात्पर्य्याधीनं शब्दप्रामाण्यमिति कथनं । अत्र मीमांसकमतं । वेदस्य पौरुषेयत्वकथनं । वेदलक्षणं । पौरुषेयत्वलक्षणं । शब्दानित्यत्वकथनं । उच्छिन्नत्वेन अभिमतो वेदो नित्यानुमेय इति निर्णयः । वाक्यलक्षणं । स्मृत्याचारयोर्वेदमूलत्वमिति कथनं । प्रलयस्थापनं । प्रवर्त्तकज्ञाननिरूपणं । तत्र नव्यमतं । हिंसानिरूपणं । विधिविचारः । तत्र नव्यमतं । आचार्य्यमतं । गुरुमतं । विषयनिरुक्तिः । अपूर्ववादः । शक्तिवादे । कार्य्यान्विते । अन्विते । स्वर्गलक्षणं । देवतालक्षणं । पदार्थनिरूपणं । तत्र प्रभाकरमतं । जातौ शक्तिरिति । जातिविशिष्टव्यक्तावेव शक्तिरिति कथनञ्च । योगरूढविचारः । अत्र मीमांसकमतं । शब्दसाधुत्वविचारः । लक्षणा । तत्र नव्यमतं । समासविचारः । अत्र नव्यादीनां मतं । आख्यातविचारः । अत्र भट्टमतं । मण्डनाचार्य्यमतं । उपसर्गद्योतकताविचारः ।

No. 1187. श्रीकृष्णस्तोत्रं, क्वचित्२ व्याख्यायुक्तं ।

Substance, country paper, 13 × 3 inches. Folia, 16. Lines, 4 on a page. Extent, 168 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

S'ríkṛishṇa-stotra. A hymn in praise of the perfection of Krishṇa's person. By S'añkara Áchárya. There is no reason to believe that the great S'ivite Sannyási who commented on the Vedánta Sútras of Vyása wrote this hymn, and it is therefore to be inferred that either the work is a forgery, or the author is a homonymous person of a different and much later age.

Beginning. लक्ष्मीभर्त्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथविम्बं विभाति ।
पायाद् वः पाञ्चजन्यः स सकलदितिजत्रासनैः पूरयन् खै-
र्निध्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥ १ ॥

End. मोदात् पादादिकेशस्तुतिमिति रचितां कीर्त्तयित्वा विधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतमतिर्मस्तकेनानमेद् यः ।
उन्मुच्यैवात्मने नो निचयकवचतां पञ्चतामेत्य भानो-
र्विम्बान्तर्गोचरं स प्रविशति परमानन्दमात्मस्वरूपं ॥ ५ ॥

Colophon. इति श्रीशङ्कराचार्य्यविरचितं श्रीकृष्णस्तोत्रं समाप्तं ।

विषयः । श्रीकृष्णस्तोत्रव्याजेन तद्रूपमाहात्म्यवर्णनं ।

No. 1188. अद्वैतरहस्यं ।

Substance, country paper, 12 × 3 inches. Folia, 4. Lines, 4 on a page. Extent, 44 s'lokas. Character, Bengali. Date, ? Place of deposit, Kálidása Vidyávágís'a. Appearance, Fresh. Prose and verse. Correct.

Advaita-rahasya. A dissertation in support of the non-dual theory of the Vedánta. By Rámánanda Tírtha. The author was one of the foremost professors of this school of philosophy.

Beginning. इह किल प्रातीतिकभ्रमत्यागार्थमात्मज्ञानरहस्यं चातुर्य्याचेपमुद्रया नमस्कार-
व्याजेन दर्शयति ।
निराभासाय शान्ताय ज्ञानातीताय ते नमः ।
मह्यमज्ञेयरूपाय नित्यमुक्तचिदात्मने ॥ इत्यादि ।

End. अवस्व तात ! अवस्व निशामय निशामय ।
येनैव निर्वृतिः स्यात्तु तेनैव विहरानघ ! ॥
अथ वा यासि सङ्कोचं लोकदृष्ट्या तु मूढधीः ।
तदा नैव सुखं यासि लोकभ्रष्टोऽसि हे सुत ! ॥

Colophon. इति श्रीरामानन्दतीर्थकृताद्वैतरहस्यं समाप्तं ॥

विषयः । ब्रह्मणो लक्षणादिकथनपुरःसरमद्वैतवादसंस्थापनं ।

No. 1189. अवधूतषट्कं ।

Substance, country-made yellow paper, 11 × 4 inches. Folium, 1. Lines, 8. Extent, 19 s'lokas. Character, Nágara. Date, ? Place of deposit, S'ántipura. Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

Avadhúta-shaṭka. A hymn in six stanzas in praise of Avadhútas, a class of houseless hermits, to which its author S'aṅkara A'chárya belonged.

Beginning. न योगी न भोगी न वा मोक्षकाङ्क्षी
न वीरो न धीरो न वा साधकेन्द्रः ।
न शैवो न शाक्तो न वा वैष्णवो वाऽ-
वधूतश्चिदानन्दरूपोऽहमात्मा ॥ १ ॥

End. विभूतिं त्रिशूलं तथा रक्तवासो
दधानः कपालं गले नागहारं ।
प्रसन्नान्तरात्मा सदा हृष्टचेता
विरेजेऽवधूतो द्वितीयो महेशः ॥ ६ ॥

Colophon. इति शङ्कराचार्य्यविरचितमवधूतषट्कं समाप्तम् ।

विषयः । अवधूतप्रकृतिवर्णनं ।

No. 1190. आलोकः ।

Substance, Palm-leaf, 14 × 2 inches. Folia, 92. Lines, 6 on a page. Extent, 3,956 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old and decayed. Prose. Correct.

A'loka. A commentary on the Tattva-chintámaṇi of Gaṅges'a. By Gadádhara. The MS. comprises the first three books only, but it is very old and correct. (Vide ante I p. 295, and Hall's Contributions, p.)

Beginning. वस्त्राणि पद्म कुचयोः प्रतिविम्बितानि
दृष्ट्वा दशाननसमागमनभ्रमेण ।

भूयोऽपि शैलपरिवृत्तिभयेन गाढ-
मालिङ्गितो गिरिजया गिरिशः पुनातु ॥
अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्यमालोकोऽयं प्रकाश्यते ॥
प्रसङ्गान्मङ्गलस्य समाप्तिहेतुतां स्थापयितुं भूमिकामाचरति, इहेति । इह खलु वाक्यालङ्कारे एकवाक्यता अविप्रतिपत्तिस्तेन भ्रममूलकता निराकृतेत्यादि ।

End. अदण्डव्यावृत्तधीकरणतावच्छेदको दण्ड इति शब्दादकामेऽपि तद्वृत्त्यादण्ड-व्यावृत्त्यप्रतीतेः सर्व्वसिद्धत्वादिन्द्रियासन्निकर्षादिना प्रत्यक्षसामग्र्यभावात्, तस्माद् यथोक्तं विशेषणपदप्रवृत्तिनिमित्तं विशिष्टधीविषयस्तु विशेषण इत्यतः खण्डित-त्वात् शेषवाक्यं नास्ति ।

विषयः । चिन्तामणेः व्याख्यानं ।

No. 1191. आलोकरहस्यं ।

Substance, country paper, 17 × 4 inches. Folia, 26. Lines, 8 on a page. Extent, 1,518 s'lokas. Character, Bengali. Date, Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

A'loka-rahasya. A gloss on the last named work. By Mathurá-nátha Tarkavágís'a. The codex comprises only the third book.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षालोकफक्किकाः ॥
निर्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं स्तुतिपूर्व्वकभगवत्प्रार्थनारूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति, वक्त्राणीति । गिरिशो महादेवः पुनातु पवित्रं करोतु प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकं पापं नाशयतु इत्यादि ।

End. सामानाधिकरण्यविरहव्यभिचारादिनिश्चयात्मकघटादिव्यतिरेकज्ञानप्रतिबध्या-यां घटादिनिश्चयेति अतः खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । जयदेवकृतप्रत्यक्षखण्डालोकस्य व्याख्यानं ।

No. 1192. कृष्णभक्तिरसोदयः ।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 12. Lines, 5 on a page. Extent, 180 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rádhikánátha Gos'vamí. Appearance, new. Prose and verse. Correct.

Krishṇa-bhaktirasodaya. A treatise on the Bhakti system of the Vaishṇavas. By Rádhámohana S'armá. The MS. is incomplete.

Beginning. गोपीनयनचकोरी—स्वादितसुरसामृतामिताङ्गरुचिः ।
कोऽपि व्रजेन्द्रतनयो नीरदनीलो विधुर्जयति ॥
श्रीमदद्वैतवंशेन राधामोहनशर्म्मणा ।
क्रियते परमामोदः कृष्णभक्तिरसोदयः ॥
श्रीमद्रसामृताम्भोधिर्गोस्वामिभिरुदाहृतः ।
तस्मादुद्धृत्य यत्किञ्चिदन्यतश्च निवेद्यते ॥
क्षन्तव्यं मम चापल्यं तद्गन्धेरितचेतसः ।
वैष्णवैः कृष्णसम्बन्धगुणमात्रपरिग्रहैः ॥ तत्र भक्तिलक्षणमित्यादि ।

End. आनुगत्यञ्च शास्त्रादिप्रसिद्धास्तु रागात्मिकाङ्गश्रवणकीर्त्तनस्मरणपादसेवनवन्दनात्मनिवेदनप्रायतनपरिपाटीषु प्रवृत्त्या स्ववशीकरणमित्यतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । भक्तिलक्षणं । अनुशीलनस्वरूपप्रदर्शनं । उपवासस्य भजनाङ्गत्वकथनं । भक्तिलक्षणपरिष्क्रिया । भक्तिप्रयोजननिर्द्देशः । तद्विवरणकथनञ्च । रुचिलक्षणं । केवलयुक्तेरप्रतिष्ठता । साधनसाध्यभेदेन भक्तेर्द्वैविध्यकीर्त्तनं । साधनभक्तिलक्षणं । वैधीलक्षणं । रागलक्षणं । चतुःषष्टिसङ्ख्याकानि भक्त्यङ्गानि । सन्ध्योपासनादीनां कर्त्तव्यताकथनादिः । भक्त्यनुकूलवैराग्यलक्षणं । तत्प्रतिकूलवैराग्यलक्षणञ्च । रागानुगालक्षणं । अतः परं खण्डितं ।

No. 1193. तत्त्वचिन्तामणिप्रत्यक्षखण्डः ।

Substance, country paper, 17 × 4 inches. Folia, 49. Lines, 5—8 on a page. Extent, 1,650 s'lokas. Character. Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭácharya. Appearance, old. Prose. Correct.

Pratyaksha Khanḍa. The third book of Gaṅges'a's Tattva-chintamaṇi. This, like No. 1186, is a remarkably old and correct codex.

Beginning. गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-
स्त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्म्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥
आन्वीक्ष्यानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलं ।
तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिं ॥
यतो मणेः पण्डितमण्डनक्रिया प्रचण्डपाषण्डमतस्तिरस्क्रिया ।
विपक्षपक्षे न विचारचातुरी न च स्वसिद्धान्तवचो दरिद्रता ॥
इह खलु सकलशिष्टैकवाक्यतया अभिमतकर्म्मारम्भसमये तत्समाप्तिकामा मङ्गलमाचरन्ति । इत्यादि——

End. सविकल्पकज्ञानानां जात्यादियोजनया हीनानां इन्द्रियजानां प्रत्यक्षत्वापाकरणादितः परं खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । मङ्गलवादः । प्रामाण्यवादः । तत्र प्रामाण्यं स्वतो ग्राह्यमिति पूर्व्वपक्षः । प्रामाण्यं परतो ग्राह्यमिति सिद्धान्तः । प्राभाकरमतनिरासः । प्रामाण्यस्वरूपविचारः । अन्यथा-ख्यातिकथनं । प्रत्यक्षलक्षणं । तत्र सन्निकर्षविशेषस्य कारणतासंस्थापनं । विषयालोकसंयोगस्य विषयोद्भूतरूपस्य महत्त्वस्य च प्रत्यक्षकारणत्वकथनं वायुर्न प्रत्यक्षं मनोजन्य इति कथनं । सुवर्णं प्रत्यक्षं तैजसञ्चेति कीर्त्तनं । मन इन्द्रियमणु चेति निर्देशः । ज्ञानं मानसमिति कथनादि । सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षस्य च द्वैविध्यकथनञ्च इत्यतः खण्डितं ॥

No. 1194. प्रत्यक्षमणिफक्किका वा प्रत्यक्षखण्डटीका ।

Substance, country paper, 18 × 3½ inches. Folia, 28. Lines, 8 on a page. Extent, 1,710 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭáchárya. Appearance, old and decayed. Prose. Correct.

Pratyaksha-maṇi-phakkiká. A commentary on the last named work. By Mathuránátha Tarkavagís'a. *Vide ante* I, p. 295.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा॥
श्रीमता मथुरानाथतर्कवागीशधीमता।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षमणिफक्किकाः॥
निर्व्विघ्नं प्रारिप्सिततत्त्वचिन्तामणिनामग्रन्थसमाप्तिकामनया कृतं महादेवनमस्काररूपं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति, गुणातीत इतीत्यादि।

End. मङ्गलस्य सफलत्वं व्यवस्थाप्य मोक्षसाधनीभूततत्त्वज्ञानचिकीर्षावतां स्वीयग्रन्थोपादानप्रवृत्तये मोक्षसाधनीभूतफलवदान्वीक्षिकीप्रतिपादितप्रतिपादकत्वेन हेतुना मोक्षसाधनीभूततत्त्वज्ञानजनकतां स्वीयग्रन्थस्य प्रतिपादयितुं तादृशहेतुमत्त्वं स्वीयग्रन्थस्य दर्शयति अथेत्यादिना विविच्यते इत्यन्तेन। अथ मङ्गलस्य समाप्तिहेतुतानिरूपणानन्तरमित्यतः खण्डितत्वात् शेषवाक्यं नास्ति।

विषयः। प्रत्यक्षचिन्तामणिव्याख्यानं।

No. 1195. नारदस्मृतिः।

Substance, country-made, yellow paper, 22 × 4 inches. Folia, 30. Lines, 7 on a page. Extent, 997 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Bharatachandra S'iromaṇi. Appearance, old. Prose and verse. Generally correct.

Nárada Smṛiti. The Institutes of Hindu Law. By Nárada. In the preface, the work is described to comprise four thousand stanzas, but the codex contains only one thousand stanzas, and still professes to be complete. Contents: Chapter 1; Courts of law defined; 2, Jurisprudence; 3, Debts; 4, Documents; 5, Witnesses; 6 Fire ordeal; 7, Ordeal by drinks; 8, Ordeal by poisons; 9, Money; 10, Loans; 11, Rules of guilds and trades; 12, Gifts; 13 and 14, Wages; 15, Sales of property by persons whose right to it is questioned; 16, Payment of value of purchases; 17, Duties of purchasers; 18, Oaths; 19, Boundaries; 20, Connexion of the sexes; 21, Inheritance; 22 and 23, Punishments of various kinds, reprimands, &c.; 24, Venial offences.

Beginning. इति ह स्माह भगवान् मनुः प्रजापतिः सर्व्वभूतानुग्रहार्थमाचारस्थितिहेतुभूतं शास्त्रं चकार यत्रादौ लोकसृष्टिभूतप्रविभागस्तद्देशप्रमाणपरिषल्लक्षणं वेद-

वेदाङ्गयज्ञविधानमाचारो व्यवहारः कण्टकशोधनं राजवृत्तं वर्णधर्म्माश्रमप्रविभागो विवाहन्यायस्त्रीपुंसविकल्पो दायादनुक्रमः। श्राद्धविधावशौचकल्पो भक्ष्याभक्ष्यलक्षणं विक्रेयाविक्रेयमीमांसा। पातकभेदैः स्वर्गनरकानुदर्शनप्रायश्चित्तान्युपषदो रहस्यानीत्येवं चतुर्विंशतिप्रकरणानि तदेतत् श्लोकशतसहस्रमासीत् तेनाध्यायसहस्रेण मनुः प्रजापतिरुपनिबध्य देवर्षये नारदाय प्रायच्छत्। स च तस्मादधीत्य महत्त्वात् नायं ग्रन्थः सुकरो मनुष्याणां शक्यो धारयितुं इति द्वादशभिः सहस्रैः सञ्चिक्षेप। तच्च सुमतये भार्गवाय प्रायच्छत्। स च तस्मादधीत्य तथैवायुर्ह्रासादल्पीयसी मनुष्याणां शक्तिरिति ज्ञात्वा चतुर्भिः सहस्रैः सञ्चिक्षेप। तदेतत् सुमतिकृतं मनुष्या अधीयन्ते।

End. हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः।
एतानि सततं पश्येन्नमस्येदर्चयेत् स्वयं।
प्रदक्षिणञ्च कुर्वीत यथास्यायुः प्रवर्द्धते॥

Colophon. इति नारदीये धर्म्मशास्त्रे प्रकीर्णकं नाम व्यवहारपदमष्टादशं समाप्तम्॥

विषयः। अत्र १ अध्याये, परिषल्लक्षणं। २, व्यवहारलक्षणं। ३, ऋणशोधनं। ४, धनस्वामिसंशयोच्छेदकलिखनसाक्षिभोगरूपत्रिविधप्रमाणान्तर्गतलिखनप्रमाणकथनं। ५, साक्षिप्रमाणकथनं। ६, पापिपरीक्षार्थमग्निसंस्कारकथनं। ७, पापिपरीक्षार्थं पानीयविधिकथनं। ८, विषपानरूपपापिपरीक्षाकथनं। ९, परीक्षाविषये कोषविधिकथनं। १०, ऋणदानस्य विशेषनामकथनं। ११, वणिक्प्रभृतयः सम्भूय यत् कर्म्म कुर्व्वन्ति तत् सम्भूय समुत्थानं नाम तस्य विवरणं। १२, दत्ताप्रदानकथनं। १३, भृत्यानां वेतनदानादानविधिकथनं। १४, वेतनस्यानपाकर्म्मकथनं। १५, अस्वामिकृतविक्रयस्य सिद्धत्वासिद्धत्वकथनं। १६, विक्रेयपण्यस्यासम्प्रदानकथनं। १७, क्रयकर्त्तुरनुवादकथनं। १८, समयस्यानपाकर्म्मकथनं। १९, सेतुकेदारसीमाकथनं। २०, स्त्रीपुंयोगकथनं। २१, दायभागकथनं। २२, साहसकथनं। २३, वाक्पारुष्यदण्डपारुष्यकथनं। २४, द्यूतसमाह्वयकथनं। प्रकीर्णककथनं॥०॥

ग्रन्थादौ चतुर्भिः सहस्रैः सञ्चिक्षेप एतस्य उक्तत्वात् एतद्ग्रन्थस्य चतुःसहस्रश्लोकात्मकत्वं सूचितं, अस्मिन् ग्रन्थे किञ्चिदधिकसहस्रसङ्ख्यकश्लोकानां प्राप्तत्वेनास्य सखण्डत्वमनुमितं। समाप्तमित्यनेन यत् समाप्तिसूचकं वाक्यं तद्भ्रमपतितं॥

No. 1196. शब्दालोकः ।

Substance, country paper, 18 × 3 inches. Folia, 18. Lines, 6—7 on a page. Extent, 3,650 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Nṛis'iñhaprasáda Gos'vámí. Appearance, old. Prose. Correct.

S'abdáloka. A commentary on the last book of Gañges'a's *Tattra-chintámaṇi.* By Jayadeva. (*Vide ante* I, p. 295.)

Beginning. न जाने श्रीजाने विरचितमिह ग्रन्थगहने
समर्था नैवार्थानधिगमयितुं निर्म्मितिरपि ।
तथाप्येतावत्यामपि किल विगत्यामहमिह
प्रवृत्तो यत्तस्मिंस्तव चरणसेवैव शरणं ॥
अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
शब्दचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥
अथेति । इहाथशब्दस्य आनन्तर्य्यवचनत्वेन उपस्थितस्य उपमाननिरूपणस्यैव प्राप्तत्वात तस्येत्यादि ।

End. अन्वयव्यभिचारवारणाय येऽग्यतादीति लच्ये व्यभिचारवारणाय अनुपपत्तीत्यर्थः । अन्यथेति । अन्यलभ्येऽपि शक्तौ विशेषणद्वयं त्यक्ता पदात् । इत्यतः खण्डितम् ।

विषयः । गङ्गेशकृततत्त्वचिन्तामण्यन्तर्गतशब्दखण्डव्याख्यानं ।

No. 1197. शब्दखण्डटीका ।

Substance, country paper, 17 × 3½ inches. Folia, 9. Lines, 8 on a page. Extent, 400 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Nṛisiñhaprasáda Gos'vámí. Appearance, old. Prose. Correct.

S'abdakhaṇḍa ṭíká. A commentary on the last book of Gañges'a's Tattva-chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥

श्रीमता मथुरानाथतर्कवागीशश्रीमता ।
विषदीकृत्य दर्श्यन्ते तुरीयमणिफक्किकाः ॥
आन्वीक्षिकीपण्डितमण्डलीषु सत्ताण्डवैरध्ययनं विनापि ।
मदुक्तमेतत् परिचिन्त्य धीरा निःशङ्कमध्यापनमातनुध्वं ॥
प्रत्यक्षादिप्रमाणत्रयं निरूपितमिदानीं चरमप्रमाणं शब्दो निरूपणीयोऽतः शिष्यावधानाय प्रतिजानीते, अथेत्यादिनेत्यादि ।

End. विशेषणविशेष्यभावेति । परस्य विशेष्यविशेषणभावेन स्वार्थतावच्छेदकावाच्छिन्नानुभवजनितेत्यतः खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । गङ्गेशकृततत्त्वचिन्तामण्यन्तर्गतशब्दखण्डव्याख्यानं ।

No. 1198. विल्वमङ्गलं ।

Substance, country paper, 11½ × 3 inches. Folia, 15. Lines, 6 on a page. Extent, 281 s'lokas. Character, Bengali. Date, Sk., 1616. Place of deposit, S'ántipura, Rádhikánátha Gosvámí. Appearance, old. Verse. Generally correct.

Vilvamañgala. A hymn in praise of Krishṇa. By Vilvamañgala.

Beginning. यं वेदविदपि प्रियमिन्दिराया यन्नाभिनीरजगर्भगृहो न धाता ।
गोपालबाललना वनमालिनन्तं गोधूलिधूसरशरीरमरीरमंस्ताः ॥ इत्यादि ।

End. ददातु वः शं किल व्रजेशः पीताम्बरोऽसौ वृन्दावनेशः ।
मन्दारमाली वर्हावतंसी, सतां हृदिस्थोऽमरारिध्वंसी ॥
यात्यतो वेदवध्योऽसि चरणन्त्विदमुत्थित ।
अनेन मूलं खड्गेन पतितं वेत्स्यसि चित्तौ ॥

Colophon. इति विल्वमङ्गलं समाप्तं ।
ऋतुविधुरसपृथ्वी शाकके शुभ्रपक्षे
वृषगकमलबन्धौ पञ्चदश्यां पदाङ्कं ।
नगवरधर ते श्रीरामदेवः प्रणम्य
अलिखदघहविल्वमङ्गलं नाम काव्यं ॥

विषयः । श्रीकृष्णस्तवनं ।

No. 1199. भारतभावदीपः ।

Substance, country-made yellow paper, 12 × 4½ inches. Folia, 170. Lines, 10 on a page. Extent, 4,887 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, new. Verse. Generally correct.

Bhárata-bhávadípa. A perpetual gloss on the Mahábhárata. By Nílakaṇṭha Súri. The codex examined is very imperfect, containing only the commentary on the Gítá portion of the work. A complete and very correct MS. of the entire work exists in the Library of the late Rájá Pitámbar Mitra, Surá; copies more or less perfect also exist in the Libraries of the late Rájá Sir Rádhákanta Deva, of Rájá Komalkrishṇa Bahádur, of the Asiatic Society of Calcutta, and of the Sanskrit Colleges of Calcutta and Benares.

Beginning. ॐ नमो ब्रह्मवादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः ।

प्रणम्य भगवत्पादान् श्रीधरादींश्च सद्गुरून् ।
सम्प्रदायानुसारेण गीताव्याख्यां समारभे ॥
भारते सर्व्ववेदार्थो भारतार्थश्च कृत्स्नशः ।
गीतायां सन्ति तेनेयं सर्व्वशास्त्रमयी मता ॥
कर्म्मोपास्तिज्ञानभेदैः शास्त्रं काण्डत्रयात्मकं ।
अन्ये तूपासनाकाण्डस्तृतीयो नातिरिच्यते ॥
तदेव ब्रह्म विद्धि त्वं नेदं यत्तदुपासते ।
इति श्रुत्यैव वेद्यस्य ह्युपास्यादन्यतेरिता ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रिकेण हि ।
कर्म्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते ॥
तत्र युद्धोद्यमं श्रुत्वा चौत्सुक्यादग्रिमं वृत्तान्तं बुभुत्सुः धृतराष्ट्र उवाच ।
धर्म्मक्षेत्रेति ।

End. भूतिरैश्वर्य्यं सर्व्वनियन्तृत्वं, नीतिर्नयश्च, एतत् सर्व्वं तत्र तस्मिन् पक्षे ध्रुवमिति मम मतिः । अतः पाण्डवैः सह सन्धिरेव कर्त्तव्य इति भावः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणज्ञमर्य्यादाधुरन्धरवंशावतंसश्रीगोविन्दसूनोः श्रीनीलकण्ठसूरिवर्य्यस्य कृतौ भारतभावदीपे भीष्मपर्व्वणि गीतार्थव्याख्यानेऽष्टादशोऽध्यायः ॥

विषयः । भगवद्गीताव्याख्यानं ॥

No. 1200. लीलावतीप्रकाशः ।

Substance, country paper, 18½ × 3½ inches, Folia, 7. Lines 6 on a page. Extent, 212 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Lílávatí-prakás'a. A commentary on the Lílávatí of Vallabha Ácharya. By Vardhamána. The Lílávatí is an abridgment of the principal doctrines enunciated in the Chintámaṇí of Gaṅges'a. The work is of considerable repute, but rare in Bengal. Mr. Hall does not notice it in his *Contributions.*

Beginning. एकत्र शूलमपरत्र विषप्रसून-मन्यत्र कीर्त्तिरपत्र च पीतवासः ।
तत्पातु वर्ष्म शशलक्ष्मकलाकिरीट-निस्पिष्टकैटभहृदोर्मम वाञ्छितानि ॥
न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्र भवते नमः ॥
विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं मङ्गलं निबध्नाति,
नाथ इति ।

End. किञ्च । प्रतियोग्यधिकरणवद्योगव्यवच्छेदस्य न विचारसहत्वमित्याह, अपि चेति । अतः खण्डितम् ।

विषयः । न्यायलीलावतीव्याख्यानं ।

No. 1201. लीलावतीप्रकाशरहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 12. Lines, 19 on a page. Extent, 507 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidásá Vidyávagís'a. Appearance, old. Prose. Correct.

Lílávatí-prakás'a-rahasya. A commentary on the last named work. By Mathuránátha Tarkavágís'a.

Beginning. निर्व्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं हरिहरात्मकभगवत्प्रार्थनरूप मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति एकत्रेत्यादि ।

End. जातिमत्येव सत्त्वेत्यादौ अन्यस्मिन् लक्षणाव्यवच्छेदस्य शक्तिबललभ्य इत्याहुरिति सङ्क्षेपः । विस्तरस्त्वमस्मत्कृतदीधितिरहस्येऽनुसन्धेयः ॥

Colophon. इत्यन्तं प्रचरन्ती माथुरी समाप्ता ।

विषयः । वर्द्धमानोपाध्यायकृतलीलावतीटीकाया व्याख्यानं ।

No. 1202. लीलावतीरहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 21. Lines, 8 on a page. Extent 924 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Lílávatí-chintámaṇi-rahasya. A commentary on the *Lílávatí* of Vallabha A'chárya. By Mathuránátha Tarkavágís'a. This is a commentary on the original text of Vallabha, whereas No. 1201 is a gloss on the commentary of Vardhamána.

Beginning. श्रीमता मथुरानाथतर्कवागीशधीमता ।
विविच्यते फक्किकार्थो लीलावत्या विशेषतः ॥
निर्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं श्रीकृष्णनमस्काररूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति नाथ इति ।

End. द्रव्यत्वगुणत्वादीनां षणां यद्विच्छेदषट्कं तेन निवर्ज्जिता । अतःपरं खण्डितं ॥

विषयः । मूललीलावतीव्याख्यानं ।

No. 1203. लीलावतीदीधितिटिप्पनी ।

Substance, country paper, 17½ × 4 inches. Folia, 27. Lines, 8 on a page. Extent, 1039 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Prose. Correct.

Lílávatí-dídhiti-ṭippaní. A gloss on Raghunátha S'iromaṇi's commentary on the Lílávatí of Vallabha. By Jagadís'a Tarkálaṅkára.

Beginning. कर्पूरकुन्दकुमुदकैलासोदरसोदरं ।
विघ्नविध्वंसकं धाम नमामः शैवदैवतं ॥
कणभक्षमुनेः पक्षरक्षाविन्यस्तवासनाः ।
वचांसि जगदीशस्य चिन्तयन्तु विचक्षणाः ॥ इत्येत्यादि ।

End. यन्नद्तीयबाल्यदेहः तज्जन्यत्वस्यैव, यूनि यन्नदत्ते सत्त्वात् तद्व्यवच्छेदासम्भवः ॥
इत्यतः खण्डितं ।

विषयः । शिरोमणिकृतलीलावतीटीकाया व्याख्यानं ।

No. 1204. अभिधारहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 11. Lines, 7 on a page. Extent, 352 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidásá Vidyávagís'a. Appearance, old. Prose. Correct.

Abhidhá-rahasya. A gloss on Jayadeva's Abhidhá-vichára, or a commentary on the *Abhidhá* section of the last book of the Tattva-chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. ननु वेदः साक्षादेव प्रवर्त्तयतु किं द्वारेण भवतु वा द्वारं, अन्यदेव हि किञ्चिद्भविष्यति यदि चेच्छां विना न प्रवृत्तिः, विधिज्ञानानन्तरमिच्छा अनुभूयते। इत्यादि ।

End. यदुक्तं तद्बीजद्वयं स्वयमेवाह हेतुद्वयेत्यादिना ।

Colophon. इति अभिधारहस्यं समाप्तं ॥

विषयः । जयदेवमिश्रकृताभिधाविचारस्य टीका ।

No. 1205. नैषधटीका ।

Substance, country paper, 19½ × 3½ inches. Folia, 38. Lines, 7 on a page. Extent, 1,380 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭáchárya. Appearance, old. Prose. Incorrect.

Naishadha-ṭíká. A commentary on the well-known poem, the Naishadha. By Vaṅs'ivadana S'armá. The MS. is incomplete.

Beginning. श्रीरामचरणौ नत्वा वंशीवदनशर्म्मणा ।
नैषधीयप्रबन्धेऽस्मिन्नतिसङ्क्षिप्य लिख्यते ॥
अत्र द्वाविंशतिः सर्गाः श्रीहर्षकविना कृताः ।
नलभैम्यभिधाप्राप्तशिवदुर्गागुणैः प्रियाः ॥
प्रथमे भीमजारूपश्रवणाद् विरही मिषात् ।
गत्वा वनं सरस्तीरे धृत्वा हंसं नलोऽत्यजत् ॥ इत्यादि ।

End. सैरभातिशयमविन्दत लेभे। किन्तु,—इत्यतः खण्डितम् ।

विषयः । श्रीहर्षकृतनैषधचरितस्य व्याख्यानं ।

No. 1206. कुसुमाञ्जलिप्रकाशः ।

क्षेत्राण्यासाद्य चाभ्यर्च्य लिङ्गानि मुनिपुङ्गवः ॥
इह सन्निहितः श्रीमान् नारदो ब्रह्मणः सुतः ।
भवभक्तो भवांश्चैव वयं वै नारदस्तथा ॥
अस्याग्रतो मुनेः पुण्यं पुराणं वक्तुमर्हसि ।
सफलं साधितं सर्व्वं भवताप्यायितं भवेत् ॥
एवमुक्तः स हृष्टात्मा सूतः पौराणिकोत्तमः ।
अभिवन्द्याग्रतो धीमान् नारदं ब्रह्मणः सुतं ॥
नैमिषीयांश्च पुण्यात्मा पुराणं व्याजहार सः ।

रोमहर्षण उवाच ।

नमस्कृत्य महादेवं ब्रह्माणञ्च जनार्द्दनं ।
मुनीश्वरं तथा व्यासं वक्तुं लिङ्गं स्मराम्यहं ॥

End. भक्त्याथ योगेन शुभेन युक्ता विप्राः सदा धर्म्मरता विशिष्टाः ।
वदन्ति योगेशमजेशमीशं षड्सम्मध्ये भगवन्तमेव ॥
ये तत्र पश्यन्ति शिवं ++ग्निं त्रितत्त्वमध्ये त्रिगुणे च व्यक्तं ।
प्रयान्ति शैवं न च योगिनोऽन्ये तथा च देव्याः पुरुषं पुराणं ॥

Colophon. इत्यादिमहापुराणे श्रीलैङ्गे चतुःसप्ततितमोऽध्यायः । समाप्तश्चायं ग्रन्थः ॥

विषयः । १, २, ३, ४, ५ अध्याये,—सूतेन सह ऋषीणां संवादः । लिङ्गपुराणश्लोकसङ्ख्यादि-कीर्त्तनं । अनुक्रमणिका । शिवस्य लिङ्गालिङ्गमूर्त्तिकथनं । शैवीप्रकृतिः । सृष्टि-प्रक्रिया । कालपरिमाणं । मन्वन्तरादिसङ्ख्या । तिर्य्यक्स्रोत-ऊर्द्ध्वस्रोत-आदिसृष्टि-कथनं । मरीचादिब्रह्मपुत्रकथनं । दक्षादीनां वंशविस्तारकीर्त्तनं । धर्म्मपुत्रादि-कथनं । मेनाया जन्मादिकथनं ।

६, ७, ८, ९, १० अ०,—शिवमाहात्म्यं । प्रतिकल्पं व्याससमूहनामकथनं । चतु-

विषयः। ईशमन्वन्तरकथनं। सिद्धपाशुपतानां नामकीर्त्तनं। योगस्थानकथनं। योगलक्षणं। यमनियमादियोगकीर्त्तनं। एषां मूलकथनं। सत्यादिलक्षणं। सदाचारनिरूपणं। ब्रह्मचर्य्यस्वरूपं। अन्तःशौचादिनिरूपणं। विशेषेण प्रत्याहारादिलक्षणकीर्त्तनं। प्राणायामशब्दव्युत्पत्तिकथनं। तद्भेदनिरूपणं। प्राणापाननागकूर्म्मादिवायूनामन्वर्थताकथनं। प्राणायामादिफलश्रुतिः। योगानुष्ठानप्रक्रिया। योगव्याघातनिरूपणं। प्रतिभादिसिद्धिकथनं। धर्म्मादिनिरूपणं। त्रिविधदानकथनं। सन्यासव्युत्पत्तिः।

११, १२, १३, १४, १५, १६, १७, १८, १९, २० अ०,—सद्योजातस्य महादेवस्य ब्रह्मकृतप्रथमदर्शनविवरणं। विबाहु-विशोकप्रभृतीनामुत्पत्त्यादिकथनं। पीतवासस उत्पत्त्यादिकथनं। रुद्राण्या उत्पत्तिः। कृष्णपिङ्गलादीनामुत्पत्तिः। रुद्रगायत्रीमाहात्म्यं। विश्वरूपायाः सरस्वत्या आविर्भावादिकथनं। शिवब्रह्मसंवादः। सत्यादीनामुत्पत्तिः। ब्रह्मकृतवैष्णवयोगनिद्रापनयनविवरणं। हंसावतारकथनं। वराहावतारकथनं। लिङ्गोत्पत्तिकथनं। प्रणवव्युत्पत्त्यादिकथनं। विष्णुकृतमहादेवस्तोत्रं। विष्ण्वादिभ्यो महादेवस्य वरदानं। लिङ्गार्चाप्रारम्भः। ब्राह्मपाद्मादिकल्पविवरणं। विष्णोर्नाभिपद्माद् ब्रह्मण आविर्भावकथनं। ब्रह्मणो विष्णूदराभ्यन्तरभ्रमणविवरणं। शिवस्य जगद्बीजत्वकथनं।

२१, २२, २३, २४, २५, २६, २७ अ०,—नारायणकृतशिवस्तवनादिकं। ब्रह्मविष्णुभ्यां शिवस्य वरदानं। रुद्राणामुत्पत्तिकथनं। श्वेतकल्पविवरणं। सद्योजातनामकारणं। लोहितकल्पादिविवरणकीर्त्तनं। धर्म्मपादादिकीर्त्तनं। प्रथमद्वितीयादिषु द्वापरेषु व्यासकथनं। तत्र तत्र महादेवावतारश्वेतमुन्यादीनामुपाख्यानं। प्रतिकल्पीयद्वापरयुगे व्यासभेदादिकथनं। कलौ महादेवावतारादिकथनं। मन्वादिकृष्णपर्य्यन्तं अष्टाविंशयुगविवरणं। त्रिविधस्नानविधानकीर्त्तनं। अभिषेकादिविधिः। लिङ्गार्चनविधिः।

२८, २९, ३०, ३१, ३२, ३३, ३४ अ०,—षड्विंशतत्त्वध्यानादिकथनं। दिगम्बरस्य विकृतवेशेन देवदारुवनप्रवेशवृत्तान्तकीर्त्तनं। सुदर्शनद्विजोपाख्यानं। श्वेतमुनेरुपाख्यानं। ब्रह्मविष्णोः शिवमूर्त्तिकीर्त्तनं। लिङ्गनिर्म्माणप्रकारादिकथनं। मुनिगणकृतशिवस्तोत्रं। शिवमाहात्म्य। भस्ममाहात्म्य।

३५, ३६, ३७, ३८, ३९, ४०, ४१ अ०,—क्षुपदधीचयोरुपाख्यानं। महादेवप्रसादाद् दधीचस्य वज्रास्थित्वप्राप्तिकथनं। विष्णुना सह क्षुपस्य संवादः। विष्णुना सार्द्धं दधीचस्य समरसंरम्भकीर्त्तनं। स्थानेश्वरनामकतीर्थोत्पत्तिमाहात्म्यादिकीर्त्तनं। शिलादारुशक्रस्य वरदानवृत्तान्तकथनं। मेघवाहननामककल्पकथनं

विषयः। विष्णोर्मेघरूपेण शक्रवाहनत्वकथनं। सत्यत्रेतादियुगधर्म्मकीर्त्तनं। विशेषेण कलिधर्म्मकथनं।

४२, ४३, ४४, ४५, ४६, ४७ अ०,—अर्द्धनारीश्वराविर्भावकथनं। नीललोहितनामकारणकीर्तनं। ब्रह्मकृतशिवस्तुतिः। शिवस्य अष्टौ मूर्त्तयः। ब्रह्मणोऽश्रुविन्दुभ्यो भूतप्रेतादीनामुत्पत्तिः। ब्रह्मणः प्राणत्यागादिविवरणं। विष्णोरुत्पत्तिः। उमाया उत्पत्तिः। उमाया लक्ष्म्यादिसृष्टिः। ब्रह्मणः पुनर्जीवनप्राप्तिः। नन्दिजन्मादिकथनं। पञ्चनदनामकतीर्थस्य उत्पत्त्यादिकथनं। ब्रह्माण्डस्वरूपकथनं। सप्तद्वीपवर्णनं। जम्बूद्वीपस्थवर्षादिवर्णनं। भरतजन्मादिकथनं।

४८, ४९, ५०, ५१, ५२, ५३ अ०,—भारतवर्षस्थपर्वतादिस्थाननिर्द्देशः। तत्र तत्र च आम्रवन-निम्बवन-किंशुकवनाम्रकेश्वरप्रभृतितीर्थकीर्तनं। सप्तर्षिवसुप्रभृतीनां वासस्थानकथनं। हेमकूटस्थभूतवने महादेवावस्थानादिकथनं। कुवेरादीनां वासस्थानकथनं। सोमनामकादाकाशसमागरादाकाशगामिन्या नद्या उत्पत्तिकथनं। तस्य ज्योतिर्गणनिषेवितत्वकथनञ्च। (अनुमीयते, (छायापथस्यैव नदीत्वेन निरूपणमिति)। चन्द्रद्वीप-शक्रद्वीपादिविवरणं। इलावृतवर्षे चन्द्रसूर्य्यादीनामप्रकाशकीर्तनं। गन्धर्व्वनागप्रभृतीनां वासस्थाननिरूपणं। सङ्क्षेपतः सप्तद्वीपस्थवर्षकुलपर्वतादिकथनं। लोकालोकादिस्थानकथनं। आवह-प्रवहादिसप्तवायुस्कन्धकथनं।

५४, ५५, ५६, ५७, ५८ अ०,—चतुर्द्दशभुवनसंस्थानकीर्तनं। ज्योतिर्गणप्रचारादिनिरूपणं। मेघानां धूमोच्छ्रासादिजन्यत्वकथनं। मेघानां नामनिरुक्तिः। सूर्य्यकिरणेन जलाकर्षणकथनं। संवत्सरावयवैः सूर्य्यरथवर्णनं। नागगन्धर्व्वाप्सरःप्रभृतीनां नामकथनं। चन्द्ररथवर्णनं। निशाकरचयष्टद्योः सूर्य्यनिमित्तत्वकथनं। देवादिकर्तृकचन्द्रपानकीर्तनं। जीव-शुक्रप्रभृतीनां रथादिवर्णनं। सूर्य्यादीनां विष्कम्भादिकथनं। पृथ्वीच्छायायाः स्वर्भानुमण्डलत्वकथनं। सर्व्वेषां ग्रहनक्षत्रादीनां ध्रुवकीलकत्वकथनं। उदयास्तमयनिरूपणं। ग्रहाणां दूरत्वनिरूपणादिकं। तेषामुच्चनीचत्वकथनं। ग्रहौषधिजलादित्य-वसुप्रभृतीनामाधिपत्ये रवि-सोम वरुणविष्णुप्रभृतीनामभिषेककीर्तनं।

५९, ६०, ६१. ६२, ६३ अ०,—त्रिविधाग्न्युत्पत्तिकथनं। सूर्य्यरश्मीनां सङ्ख्याभेदेन वृष्ट्यादिजनकत्वकथनं। मासभेदेन सूर्य्यनामभेदकथनं। तत्र तत्र च रश्मिसङ्ख्याकीर्तनं वर्णनिरूपणञ्च। सूर्य्याचन्द्रयोः क्रमेण आग्नेयत्वौदकत्वकथन। सूर्य्यस्य प्रधानसप्तरश्मिनामादिकथनं। नक्षत्रनामनिरुक्तिः। तारकाग्रविचादिनामनिर्व्वचनं। सोमार्कग्रहादिषु तत्तदभिमानिदेवताकथनं। स्थानिनीनां

विषयः। देवतानां तत्र तत्र स्थानकथनं। मासर्तुप्रभृतिषु माघशीतादीनामाधिक्यकथनं। ध्रुवस्य जन्मादिविवरणं। देवदानवनागादीनामुत्पत्तिकथनं।

६४, ६५, ६६, ६७, ६८ अ०,—राक्षसकृतशक्तिभक्षणविवरणं। पराशरस्य उत्पत्तिकथनादिकं। तत्कृतरक्षोदाहनादिविवरणं। सूर्य्यवंशवर्णनं। वड़वागर्भे अश्विनीकुमारयोर्जन्मकथनं। रुद्रसहस्रनामस्तोत्रं। श्रुताम्बरपर्य्यन्तं सूर्य्यवंशशेषकथनं। चन्द्रवंशवर्णनं। तत्र विशेषेण पुरु-कुरु-यदुप्रभृतीनां सन्ततिकीर्तनं। कृष्णावतारकथनं। पुत्रकाम्यया श्रीकृष्णस्य पाशुपतयोगानुष्ठानादिकथनं। तस्य स्वस्थानगमनानन्तरं तन्महिष्यादीनामवस्थावर्णनं।

६९, ७० अ०,—(सेश्वरसाङ्ख्यमतेन) आदिसृष्टिकीर्तनं। ख्याति-चिति-स्मृति-मतिप्रभृतीनां व्युत्पत्तिकथनं। ब्रह्मादीनामुत्पत्तिकथनं। विष्णुभगवत्प्रभृतिशिवनामनिर्व्वचनं। प्रलयोत्तरसृष्टिकथनं। सनत्कुमारादीनामुत्पत्तिकथनं। राक्षस-व्याल-पन्नगादिनामनिर्व्वचनं। शतरूपाया उत्पत्तिपरिणयादिविवरणं। लक्ष्म्यादीनामुत्पत्तिकथनं। भद्रकालीस्तोत्रं। विद्युन्मालि-तारकाक्षप्रभृतिभ्यः तारकासुरपुत्रेभ्यो ब्रह्मणो वरदानकथनं। विष्णुशक्रप्रभृतीनां शिवसान्निध्यगमनविवरणं। विष्णुसृष्टपुरुषस्य मोक्षशास्त्रप्रणयनादिकथनं। तत्प्रसङ्गेन सङ्क्षेपात् भाविकलिधर्म्मकीर्तनं।

७१, ७२, ७३, ७४ अ०,—त्रिपुरविजयकाले शिवस्य रथनिर्म्माणप्रकारकथनं। देवानां पशुभावकथनं। पाशुपतयोगमाहात्म्यकीर्तनं। त्रिपुरदाहनकथनं। देवगणकृतत्रिपुरारिस्तोत्रं। विश्वकर्म्मकृतस्फाटिकमौक्तिकादिलिङ्गनिर्म्माणकथनं। अधिकारिविशेषे आयसादिलिङ्गपूजाविधानं। षड्विधलिङ्गकथनं। विद्याप्रशंसा। पुनः, वाह्याभ्यन्तरभेदेन द्विविधलिङ्गकीर्तनादिकं। इति॥

(अत्र अध्यायसङ्ख्यावैषम्यं दृश्यते)।

No. 1245. स्कन्दपुराणं।

Substance, country-made yellow paper, 13 × 8 inches. Folia, 346. Lines, 32—34—38—40 on a page. Extent, 6920 slokas. Character, Bengali. Date ? Place of deposit, Srírámpur College. Appearance, new. Verse. Incorrect.

Skanda Purána.—The thirteenth of the eighteen great Puráṇas by Vyása. According to the Nárada Puráṇa, the work in its entirety should comprise eighty-one thousand verses divided into seven parts or

khaṇḍas, viz. 1st, Máhes'vara khaṇḍa; 2nd, Vaishṇava khaṇḍa; 3rd, Brahma khaṇḍa; 4th, K'ás'í khaṇḍa; 5th, Avantí khaṇḍa; 6th, Nágara khaṇḍa; 7th, Prabhása khaṇḍa. Of these the MS. under notice includes only a portion of the first part. Both the Skanda and the Nárada have been named and their extent in verses given by Chánd in the Prithviráya Rayasá of the 12th century, and both have been quoted by Vallála Séna in his *Dánaságara.* The seven parts together would not make up more than 81,000 verses, and the bulk of these may be accepted to be considerably older than the 11th century. In the time of Professor Wilson, these facts were not known; he was therefore induced to take the Skanda Puráṇa or its different khaṇḍas to be much more modern. The following is his account of this work.

"The Skánda Puráṇa is that in which the six-faced deity (Skanda) has related the events of the Tatpurusha Kalpa, enlarged with many tales, and subservient to the duties taught by Maheswara. It is said to contain eighty-one thousand one hundred stanzas: so it is asserted amongst mankind.

"It is uniformly agreed that the Skanda Puráṇa, in a collective form, has no existence; and the fragments, in the shape of Samhitás, Khaṇḍas, and Máhátmyas, which are affirmed, in various parts of India, to be portions of the Puráṇa, present a much more formidable mass of stanzas than even the immense number of which it is said to consist. The most celebrated of these portions, in Hindustán, is the Kás'í Khaṇḍa, a very minute description of the temples of S'iva in or adjacent to Benares, mixed with directions for worshipping Mahes'wara, and a great variety of legends explanatory of its merits and of the holiness of Kás'í. Many of them are puerile and uninteresting; but some are of a higher character. The story of Agastya records, probably, in a legendary style, the propagation of Hinduism in the south of India; and, in the history of Divodása, king of Kás'í, we have an embellished tradition of the temporary depression of the worship of S'iva, even in its metropolis, before the ascendancy of the followers of Buddha. There is every reason to believe the greater part of the contents of the Kás'í Khaṇḍa anterior to the first attack upon Benares by Mahmud of Ghizni. The Kás'í Khaṇḍa alone contains fifteen thousand stanzas.

"Another considerable work ascribed, in Upper India, to the Skanda Puráṇa, is the Utkala Khaṇḍa, giving an account of the holiness

of Orissa, and Kshetra of Purushottama or Jagannátha. The same vicinage is the site of temples, once of great magnificence and extent, dedicated to S'iva, as Bhuvaneswara, which forms an excuse for attaching an account of a Vaishnava Tirtha to an eminently S'aiva Puráṇa. There can be little doubt, however, that the Utkala Khaṇḍa is unwarrantably included amongst the progeny of the parent work. Besides these, there is a Brahmottara Khaṇḍa, a Revá Khaṇḍa, a Siva Rahasya Khaṇḍa, a Himavat Khaṇḍa, and others. Of the Samhitás the chief are the Súta Samhitá, Sanatkumára Samhitá, Saura Samhitá, and Kapila Samhitá: there are several other works denominated Samhitás. The Máhátmyas are more numerous still. According to the Súta Samhitá, as quoted by Colonel Vans Kennedy, the Skanda Puráṇa contains six Samhitás, five hundred Khaṇḍas, and five hundred thousand stanzas; more than is even attributed to all the Puráṇas. He thinks, judging from internal evidence, that all the Khaṇḍas and Samhitás may be admitted to be genuine, though the Máhátmyas have rather a questionable appearance. Now, one kind of internal evidence is the quantity; and, as no more than eighty-one thousand one hundred stanzas have ever been claimed for it, all in excess above that amount must be questionable. But many of the Khaṇḍas, the Kás'í Khaṇḍa, for instance, are quite as local as the Máhátmyas; being legendary stories relating to the erection and sanctity of certain temples, or groups of temples, and to certain Lingas; the interested origin of which renders them, very reasonably, objects of suspicion. In the present state of our acquaintance with the reputed portions of the Skanda Puráṇa, my own views of their authenticity are so opposed to those entertained by Colonel Vans Kennedy, that, instead of admitting all the Samhitás and Khaṇḍas to be genuine, I doubt if any one of them was ever a part of the Skanda Puráṇa," (Vishṇu Puráṇa, Vol. I, p. lxxii.).

Beginning. श्रीकृष्णाय नमः। व्यास उवाच।

अस्तेऽप्युद्धृते तस्मिन् विष्णुनात्मस्वरूपिणा।
दैत्याश्च दानवाश्चैव किञ्चक्रुस्तदनन्तरं॥
सनत्कुमार उवाच।
ते क्रोधाद्दुश्चिताः सर्व्वे युद्धार्थं विष्णुमूचिरे।
विफलं धिक्कृते शौर्य्यं चक्रं धिक् ते पराक्रमं॥

विद्रव्य घातितो नित्यं पापचारस्य ते सदा ।
निहत्यैव त्वया पूर्व्वं हिरण्यकशिपुर्हतः ॥
हिरण्याक्षश्च दैत्येन्द्रो ह्यनृतं चेद+++ ।
न तवास्ति बलं युद्धे निहत्या हि बली भवान् ॥
युद्धे स्थितो भवानस्तु न मे मोक्षमवाप्स्यसि ॥
सनत्कुमार उवाच ।
ततः स दैत्यराट् क्रुद्धः++++++++ ।
रथेनाम्बुदनादेन विष्णुमेवाभिदुद्रुवे ॥
विप्रचित्तिस्तु दैत्येन्द्रो गजेन सज्जितस्तथा ।
समाक्रयत् सहस्राक्षं स गजो वज्रपाणिनं ॥
विरोचनस्तु संक्रुद्धं धनदं राक्षसाधिपं ।
स गजेनाभिदुद्राव जलदो भास्करं यथा ॥
बलेर्वैरोचनिश्चापि यमं पितृगणाधिपं ।
रथेनैवाभिदुद्राव विघ्नो विघ्नमिवापरं ॥
अनुह्रादश्च दैत्येन्द्रो हिरण्यकशिपोः सुतः ।
वरुणं प्रति दुद्राव नदीवेगो यथार्णवं ॥ इत्यादिः ।

End. वर्णत्रयस्य शुश्रूषां शुचिः शूद्रः करोति यः ।
स धर्म्मद इति ज्ञात्वा तस्य गृह्णाम्यहं बलिं ॥
विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि ।
गृह्णन् बलिं न तृप्यामि प्रियाणामिव दर्शनात् ॥
वस्त्र++++श्चैव ब्राह्मणस्य वरानने ।
चतुष्टयं समं पुण्यं पवित्रं परमं मम ॥

Colophon. इति स्कन्दपुराणेऽध्यायः । समाप्तश्चायं ग्रन्थः ॥

विषयः । (अत्र अध्यायाङ्कादिकं नास्ति ।) समुद्रमन्थनानन्तरं दैत्यादिभिः सह देवानां युद्धवर्णनं। आढिवकयुद्धवर्णनं । बलेस्त्रैलोक्यराज्याभिषेककथनं । तेन सह नारदस्य संवादः । अश्वतर्य्या उपाख्यानं । वामनप्रादुर्भावः। बलिनिग्रहणं । सुषुम्णेतिविख्याताया: पुष्करिण्या विवरणं । शुष्कवृक्षकोटरस्थशुकेन सह इन्द्रादीनां कथोपकथनं। वृक्षगुल्मादीनां चेतनत्वकथनं। वामनस्य तीर्थयात्रा । गौतमीपुत्रस्य कृष्णसर्पदंशनकथनं। तृणविन्दोरुपाख्यानं। अश्वखस्य उपाख्यानं । मृतपुत्रमङ्के निधाय श्मशाने विलपन्तं ब्राह्मणं प्रति गृध्रस्य उपदेशवाक्यानि । गौरीगिरिशयोरनुग्रहेण तज्जीवनप्राप्तिकथनं। आसुर्य्या उत्पत्तिकथनं । सैंहिकेय-

विषयः। बधकथनं। कालनेमिबधकथनं। नरनारायणयोरुपाख्यानं। देवगणकृतत्र्यम्बकवाहनस्तोत्रं। शिवस्य जामदग्न्याय धनुर्व्वेददानविवरणं। अप्सरोलोभेन दैत्यानां परस्परं निधनकीर्त्तनं। मन्दरपर्व्वतवर्णनं। निवातकवचबधवर्णनं। जम्भादिदैत्यनिधनं। भार्गवस्य शिवकुक्षौ परिभ्रमणकथनं। शुक्ररूपेण निःसरणात् शुक्रनामकीर्त्तनं। अन्धकासुरादिदमनकथनं। अन्धककृतशिवस्तोत्रं। ब्रह्मकृतशम्भुस्तोत्रं। श्राद्धकाले अन्धकासुरबधवृत्तान्तपाठे फलश्रुतिः। अन्धककृतभगवतीस्तुतिः। दशभ्यः कोष्ठजपुत्रेभ्यः पञ्चभूमिरुहाणां श्रेष्ठत्वकीर्त्तनं। दक्षशापेन तरूणां करणादिहीनत्वकथनं। तैः सार्द्धं ब्रह्मणः संवादः। पार्व्वत्याः पुत्रत्वेन अशोकतरुप्रतिष्ठावृत्तान्तवर्णनं। नियमप्रशंसा। काशीस्थस्य धावकाभिधानस्य विप्रस्य उपाख्यानं। महादेवस्य चन्द्रकलाधारणविवरणं। चन्द्रार्द्धोत्पत्तिकथनं। शिवस्य भस्मरजोविलेपनधारणवृत्तान्तकीर्त्तनं। भस्मस्नानमाहात्म्यकीर्त्तनं। शिवस्य रुद्रादिनामकारणकथनं। तस्य पुनः श्मशानवासनिमित्तकीर्तनं। पञ्चगव्येन शिवस्नानानुष्ठाने फलकीर्तनं। विश्वामित्रजन्मकथनं। तस्य वसिष्ठकामधेनुहरणोद्यमादिकथनं। विप्रत्वलाभाय तस्य च तपस्यादिवर्णनं। त्रिशङ्कूपाख्यानं। शिवायतननिर्म्माणमाहात्म्यकीर्तनं। भैरवीभैरवयोः उत्पत्तिकथनादिकं। शिवमानसादेव गजाननोत्पत्तिकथनं। कार्तिकेयोत्पत्तिकथनं। स्कन्दविशाखादिनामनिर्व्वचनं। इन्द्रकृतदितिगर्भभेदनकथनं। स्कन्देन सह इन्द्रस्य युद्धवर्णनं। विशाखनामोत्पत्तिः। नैगमेयशाखयोराविर्भावादिकथनं। स्कन्देन सह शक्रस्य सम्प्रीतिकथनं। देवसेना-दैत्यसेनयोरुत्पत्त्यादिकथनं। केशिनामधेयेन दानवेन सार्द्धं शक्रस्य युद्धवर्णनं। देवसेनया समं स्कन्दस्य विवाहादिवर्णनं। तस्य अभिषेककाले देवादिप्रदत्तोपहारविवरणं। बृहस्पतिकृतषड़ाननस्तोत्रं। स्कन्दाभिषेचने विनायकस्य वैरकथनं। तारकासुरस्य जन्मादिकथनं। तेन विप्रकृतानां देवानां ब्रह्मसमीपगमनादिवृत्तान्तकीर्तनं। अनलान्वेषणार्थं देवानां पातालगमनकथनं। मण्डूकान् प्रति वह्नेः शापदानं। पुनस्तान् प्रति देवानां वरदानं। अग्निशापेन गजानामूर्द्धजिह्वत्वकथनं। देवानां पुरतः वह्नेः शमीगर्भगतत्वकथनं। अग्निशापेन शुकानां वाक्यहीनत्वकीर्त्तनं। विशेषेण कार्त्तिकेयोत्पत्तिकथनं। तारकासुरबधकथनं। स्कन्दकृतमहिषासुरबधकीर्तनं। रुद्र-भवाज-हर-महादेव-महेश-पशुपति-प्रभृतिनामनिर्व्वचनं। श्वेतऋषेरुत्पत्त्यादिकथनं। श्वेतकृतशिवस्तोत्रं। मृत्युञ्जय-मृत्योः समरवर्णनं। कालञ्जरचेत्रोत्पत्तिकथनं। महाकालस्य उत्पत्त्यादिकथनं। शिवकोपाग्निना यमदाहनकथनं। ब्रह्मकृतशङ्करस्तोत्रं। यमस्य पुनर्जीवनलाभादिकथनं। चन्द्रप्रभादिलिङ्गकथनं। हिमालयशिखरस्थ-गौरीशिखर-पुत्रकुण्ड-

विषयः। शैलशिखरप्रभृतितीर्थकीर्तनं। भगीरथेन गङ्गानयनवृत्तान्तकीर्तनं। जप्येश्वरादि-लिङ्गकथनं। महाभैरवरूपवर्णनं। दिगम्बरस्य देवदारुवनप्रवेशविवरणं। शिव-लिङ्गोत्पत्तिकथनं। वाणमहादेवमाहात्म्यकीर्तनं। वाराणसीस्थश्मशानस्य ऋषि-मुक्तसञ्ज्ञाकीर्तनं। अविमुक्तेश्वरमाहात्म्यकीर्तनं। स्थानेश्वर-तत्रकेश्वरप्रभृतिलिङ्ग-कथनं। नन्दीश्वरस्य वानराननत्वकथनं। आम्रातकेश्वरस्य चन्द्रिकाभिरतत्व-कथनं। सिद्धक्षेत्रादिकथनं। रावणप्रतिष्ठितगोकर्णाभिधानशिवलिङ्गमाहात्म्यादि-कीर्तनं। पुण्यायतनकीर्त्तनादिमाहात्म्यकथनं। मयस्य विधिसान्निध्याद् वरलाभ-कथनं। त्रिपुरनिर्म्माणकथनं। ब्रह्मादीनां शिवसमीपे दानवदौर्ज्जन्यकीर्त्तना-दिकं। विशेषेण त्रिपुरदाहवृत्तान्तकीर्तनं। समरसंरम्भवर्णनञ्च॥ त्रिपुरकामिनीनां विलासादिवर्णनं। तारकाक्षविद्युन्माल्यादीनां निधनकथनं। क्रौञ्चगिरिप्रदक्षिण-काले षड़ाननसहस्राक्षयोर्विरोधवर्णनं। कुमारकृतक्रौञ्चगिरिवेधनकथनं। शिला-धारा-पाशा-कुञ्जरी-मदनाप्रभृतीनां क्रौञ्चकामिनीनां विलापादिवर्णनं। मैनाक-पुत्रस्य क्रौञ्चस्य निधनं निशम्य हिमालयादीनां तत्र गमनादिविवरणं। क्रौञ्च-सञ्जीवनकथनं। देवानां स्त्रीभावप्राप्तिकथनं। ब्राह्म्यादिमातॄणामुद्भवकथनं। शिवस्य तन्त्रशास्त्ररचनप्रतिज्ञाकथनं। शूलदण्डतीर्थोत्पत्तिकथनं। नरनाराय-णाभ्यां सार्द्धं प्रह्लादादीनां युद्धवर्णनं। हिमालयप्रह्लादयोः संवादः। सुमेरु-निषध-पारिपात्रप्रभृतीनां पर्व्वतानां हिमालयसमीपागमनवृत्तान्तकीर्त्तनं। प्रह्ला-दादेशेन गिरीणामितस्तत उड्डयनकथनं। इन्द्रकृतपर्व्वतपक्षच्छेदवृत्तान्तकीर्तनं। पुष्करावर्त्तकादिमेघानामुत्पत्तिकथनं। चतुर्थवायुस्कन्धे तेषामवस्थितिकीर्त्तनञ्च। पुनः प्रह्लादादिभिः सार्द्धं नरनारायणयोः युद्धवर्णनं। विमोहितयोः नरनारा-यणयोः शक्रादीनां प्रह्लादिभिः समं समरसंरम्भवर्णनं। प्रह्लादस्य तपश्चरणकथनं। इन्द्रनारदयोः संवादः। हिमालयादिभिः सार्द्धं शक्रस्य युद्धवर्णनं। मैनाकस्य समुद्रप्रवेशकथनं। नारदप्रह्लादयोः संवादः। नारदस्य ब्रह्मलोकगमनवृत्तान्त-कीर्त्तनं। क्षुधावृष्टिकथनं। तया अर्द्दितानां दानवानां विष्णुसमीपात् पराजय-कथनं। स्कन्देन पृथिव्यां शक्तिनिखातवृत्तान्तकथनं। कुमारेन्द्रयोरन्योन्यं सन्धि-कथनं। गणेशकार्त्तिकेययोः मन्दरपर्व्वतगमनवृत्तान्तकीर्तनं। द्विजमाहात्म्यकीर्तनं। श्राद्धप्रशंसादिकथनं। आर्ज्जवलभ्यधर्म्मकथनं। अत्र रुचिनामकस्य ब्राह्मणस्य उपाख्यानं। भृगूपाख्यानं। पुष्पकाभिधानविमानोत्पत्तिकीर्तनं। अन्धकसुतप्रयाण-कथनं। अर्चाविधिः। उमारूपपरिग्रहेण अन्धकसुतस्य शिवालयप्रवेशवृत्तान्त-कीर्तनं। शिवमन्त्रोपसाधनकथनञ्च। इति।

No. 1246. शिक्षापञ्चकं ।

Substance, country paper, 10 × 6 inches. Folium, 1. Lines 16. Extent, 13 s'lokas. Character, Bengali. Date ? Place of deposit, Srírámpur College. Appearance, new. Verse. Incorrect.

S'ikshá-panchaka.—A brief summary of the duties of Vedántins. By S'añkara A'chárya.

Beginning. वेदो नित्यमधीयतां तदुदितं कर्म्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामुपचितिः कामे मतिस्त्यज्यतां ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यतां ॥ इत्यादिः ।

End. एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां ।
प्राक्कर्म्म प्रविलाप्यतां+ + + + + + + + श्लिष्यतां
प्रारब्धन्त्विह भुज्यतामथ परात्मन्येव सुस्थीयतां ॥

Colophon. इति श्रीशङ्कराचार्य्यविरचितं शिक्षापञ्चकं समाप्तम् ।

विषयः । तत्त्वज्ञानोपदेशः ।

No. 1247. वाक्यसुधाप्रकरणं, सटीकं ।

Substance, country-paper, 10 × 6 inches. Folia, 20. Lines, 26 on a page. Extent, 487 s'lokas. Character, Bengali. Date ? Place of deposit, Srírámpur College. Appearance, new. Text, in verse, Commentary in prose. Incorrect.

Vákya-sudhá-prakarana.—A summary of the elements, of the Vedánta Philosophy. By S'añkara A'chárya. Hall's *Contributions, p.*

Beginning. मूलस्य,—रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक्तुमानसं ।
दृश्याधिवृत्तयः साक्षी दृगेव न तु दृश्यते ॥ इत्यादिः ।
टीकायाः,—नमो रामाय देवाय सच्चिदानन्दमूर्त्तये ।
कृष्णाय गुरवे व्यासशङ्कराचार्य्यमूर्त्तये ॥
नामरूपात्मविश्वाख्यं+ + + लग्नमीक्ष्यते ।
तद्वाक्यसुधयाप्लाव्य निष्पङ्कं तत्त्वमीक्ष्यतां ॥ इत्यादिः ।

End. मूलस्य,—प्रातिभासिकजीवस्य लये स्युर्व्यवहारिके ।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि ॥
टीकायाः,—साक्षिशब्दनिर्द्दिष्टे प्रत्यग्ब्रह्मणि पर्य्यवस्यन्ति शैत्यादय इव फेणतरङ्ग-
गतास्तयोर्लये समुद्रे + + + + सन्तीत्यर्थः ।

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं वाक्यसुधाप्रकरणं सटीकं सम्पूर्णं ॥

विषयः । त्वंपदार्थव्युत्पादनं । चक्षुरादीनामन्यदृश्यत्वसाधनं । अन्वयव्यतिरेकाभ्यामात्मनोऽसङ्गकूटस्थत्वादिप्रतिपादनं । तत्पदार्थशोधनं । मायाद्दत्त्यादिनिरूपणं । सृष्टिविषये विवर्तवादकीर्तनं । संसारिस्वरूपं निरूप्य संसारस्य मायामयत्वकथनं । तत्त्वंपदार्थयोरैक्यप्रतिपादनं । समाधिनिरूपणं । जीवात्मस्वरूपविचारः । अपवर्गादिकीर्तनञ्च ।

No. 1248. ब्रह्मवैवर्त्तीयप्रकृतिखण्डः ।

Substance, country-made yellow paper, 13 × 7 inches. Folia 258. Lines, 20 on a page. Extent, 5160 s'lokas. Character, Bengali. Date ? Place of deposit, Srírámpur College. Appearance, fresh. Verse. Incorrect.

Prakriti Khanḍa. The Brahma Vaivarta Puráṇa, of which the work under notice forms the second part, is the tenth of the eighteen Great Puráṇas of Vyása, and is that "which was related by Sávarṇi to Nárada, and contains the account of the greatness of Kṛishṇa, with the occurrences of the Rathantara Kalpa, where, also the story of Brahmavaráha is repeatedly told." (Wilson's *Vishṇu Puráṇa*, I. p. lxv.) The Nárada Puráṇa assigns to it eighteen thousand verses, and in Chand's time this was well known; the work may, therefore, be accepted as considerably older than the 12th century, though some of its Máhátmyas and episodes may be of doubtful authenticity. It is divided into four parts, *viz.*, the Brahma Khanḍa treating of Brahmá; 2nd, the Prakṛiti Khanḍa, treating of the female energy of the Deity; 3rd, Gaṇes'a Khanḍa, treating of Gaṇes'a; and 4th, Krishṇajanma Khanḍa, treating of Krishṇa. The work has been noticed by Weber in his Berlin Catalogue, by Aufrecht in the Bodleyan Catalogue, and by Wilson in the Journal of the Asiatic Society of Bengal for 1831. Though ostensibly devoted to the different manifestations of the female energy of the

Godhead, the main object of the second part is to establish the preeminence of Rádhá, and to assign to her a position similar to what the Tantras have assigned to Durgá, and this is done by narrating a great number of stories and anecdotes, some of which occur in other Puráṇas in an abbreviated or modified form, but most are quite new.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
श्रीनारद उवाच । गणेशजननी दुर्गा राधा लक्ष्मी सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता ॥
आविर्बभूव सा केन सा वा का+ + +वरा ।
किं वा तल्लक्षणं सा च बभूव पञ्चधा कथं ॥
सर्व्वासां चरितं पूजा विधानं गुणमीप्सितं ।
अवतारं कुतस्तस्यास्तन्मां व्याख्यातुमर्हसि ॥
श्रीनारायण उवाच । प्रकृतेर्लक्षणं वत्स को वा वक्तुं क्षमो भवेत् ।
किञ्चित्तथा प्रवक्ष्यामि यच्छ्रुतं धर्म्मवक्त्रतः ॥ इत्यादिः ।

End. न तस्य मृत्युर्भवति जले वह्नौ विले ध्रुवं ।
जीवन्मुक्तो भवेत् सोऽपि सर्व्वसिद्धेश्वरो भवेत् ॥
यदि स्यात् सिद्धकवचो विष्णुतुल्यो भवेद् ध्रुवं ।
कथितं प्रकृतेः खण्डः सुधाखण्डात् परं मुने ॥
या एव मूलप्रकृतिर्यस्याः पुत्रो गणेश्वरः ।
कृत्वा कृष्णव्रतं या च लेभे गणपतिं सुतं ॥
स्वांशेन कृष्णो भगवान् बभूव च गणेश्वरः ।

Colophon. इति श्रीब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदसंवाद त्रिषष्टितमोऽध्यायः ।
श्रुत्वा च प्रकृतेः खण्डं शुश्रूषेश्च सुधोपमं ।
भोजयित्वा च दध्यन्नं तस्मै दद्याच्च काञ्चनं ॥
सवत्सां सुरभिं रम्यां ददाति भक्तिपूर्व्वकं । इति प्रकृतिखण्डः समाप्तः ॥

विषयः । १, २, अध्याये ।—पञ्चधाप्रकृतिकथनं । प्रकृतिसञ्ज्ञानिरुक्तिः । तत्स्वरूपादिकथनं । राधैव प्रकृतिरितिकथनं । देवानां पत्नीनिरूपणादिकं । सर्व्वासां राधाकलारूपत्वकथन । प्रकृतिचरित्रकथनं । गोलोकादीनां नित्यत्वकथनं । कृष्णस्य साकारत्वेऽपि निराकारत्वकथनं । श्रीकृष्णस्य स्वेद-निश्वासादिभ्यो जलपवनादी-

नामुत्पत्त्यादिकथनं। अण्डोत्पत्तिवृत्तान्तकथनं। अनपत्या भवेति राधां प्रति श्रीकृष्णस्य शापदानकथनं। सरस्वत्यादीनामुत्पत्तिः। देवादीनामुत्पत्तिः।

३, ४, ५, अ०।—असङ्ख्यब्रह्मविष्णुशिवकथनं। ब्रह्माण्डसंस्थानादिकथनं। विराज-उत्पत्त्यादिकथनं। विश्वनिर्णयवर्णनं। सरस्वत्याः पूजाविधानं। सरस्वतीकवचं। सरस्वतीस्तोत्रं। नदीरूपायाः सरस्वत्या माहात्म्यकथनं। गङ्गासरस्वत्योर्विरोधवर्णनं। वृक्षरूपा नदीरूपा च भवेति पद्मां प्रति सरस्वत्याः शापदानविवरणं। गङ्गासरस्वत्योरन्योन्यशापेन नदीभावप्राप्तिकथनं। स्त्रीजितस्य पुरुषस्य निन्दा। एकभार्य्यस्य सुखित्वकथनं। कलेः पञ्चसहस्रे वर्षे गते सति पद्मागङ्गासरस्वतीनां पुनर्विष्णुलोकगमनं भावीति कथनं। तासां माहात्म्यकथनं।

६, ७ अ०।—कलेर्दशसहस्रवर्षपर्य्यन्तं शालग्राम-जगन्नाथयोः पृथिव्यामवस्थितिकथनं। तावत्कालं वेदपुराणश्राद्धतर्पणादीनामवस्थानकथनं। अतः परं कलिधर्म्मकीर्त्तनं। तत्र सन्ध्या-यज्ञसूत्रादीनां विलोपकथनं। वृक्षाणां ह्रस्वपरिमाणत्वकथनं। नराणाञ्च अङ्गुष्ठप्रमाणकथनादिकं। कल्क्यवतारकथा। प्रलयकथनञ्च। विशेषेण राधाया माहात्म्यकथनं। मेदिन्या उत्पत्तिकथनं। मेदिनीनिरुक्तिः। वराहकृतपृथिव्युद्धारकथनं। तत्पूजाविधानं। मङ्गलस्य उत्पत्तिः। पृथिव्या ध्यानादिकथनं। पृथिवीस्तोत्रादिकथनं। भूमिदानादिमाहात्म्यं। भूमौ दीपशङ्खादिस्थापने दोषकथनं।

८, ९ अ०।—सगरवंशवर्णनं। भगीरथकृतगङ्गानयनविवरणं। तिथ्यादिविशेषे गङ्गास्नानमाहात्म्यकथनं। गङ्गाया ध्यानादिकथनं। गङ्गास्तोत्रं। कार्त्तिकपूर्णिमायां श्रीकृष्णस्य रासोत्सवकथनं। तत्र ब्रह्मादीनां तत्पूजनादिवृत्तान्तकथनं। तुलस्या रूपवर्णनं। कलौ पृथ्वीत्यागानन्तरं गङ्गायां श्रीकृष्णसान्निध्यगमनविवरणं। शुष्ककण्ठोष्ठानां ब्रह्मविष्णुशिवादीनां श्रीकृष्णेन सह संवादकीर्त्तनं। पुनः श्रीकृष्णपदाङ्गुष्ठाद् गङ्गाया आविर्भावकथनं।

१०, ११, १२ अ०।—हरिणा सार्द्धं गङ्गाया विवाहकथनं। वृषध्वजभक्तस्य वृषध्वजाभिधानन्रृपतेरुपाख्यानं। भगवता सह महादेवस्य संवादः। धर्म्मध्वजकुशध्वजयोरुपाख्यानं। वेदवत्या जन्मादिविवरणं। तस्यास्तपस्यादिवर्णनं। तां कामयमानस्य रावणस्य वृत्तान्तकीर्त्तनं। दशमुखं प्रति तस्याः शापदानं। जनकात्मजारूपेण तस्याः पुनर्जन्मग्रहणादिविवरणं। परीक्षासमये पुनस्तुभ्यं जानकीं दास्यामीति रामं प्रति वह्निवचनं। रावणकृतच्छायासीताहरणकथनं। रावणबधानन्तरं पुष्करतीर्थे तपस्यन्त्याश्छायासीतायाः लक्ष्मीत्वप्राप्तिकथनं। पुनस्तस्या द्रौपदीरूपेण जन्मवृत्तान्तकथनं। महादेवान्तिके पतिं देहीति पञ्चवारं सीताया

विषयः। प्रार्थनया रसिकचूड़ामणेर्गौरीशस्य पञ्च ते प्रिया भविष्यन्तीति वरदानं, तेन च द्रौपद्याः पञ्चपतिपत्नीत्वकथनं।

१३, १४, १५, १६, १७, १८, १९ अ०।—धर्म्मध्वजपत्न्या माधव्या गर्भे तुलस्या जन्मादिविवरणं। तुलस्यै ब्रह्मणो वरदानवृत्तान्तकथनं। शङ्खचूड़ेन सह तस्याः संवादः। स्त्रीचरित्रकीर्त्तनं। तयोर्विवाहकथनं। वैकुण्ठधामवर्णनं। तुलसीशङ्खचूड़योर्विलासवर्णनं। महादेवेन सह शङ्खचूड़स्य संवादः। दम्भदानवस्य उपाख्यानं। दानवैः सह देवानां युद्धवर्णनं। नारायणस्य शङ्खचूड़रूपमास्थाय तुलसीसमीपगमनवृत्तान्तकथनं। पाषाणमयो भवेति कृष्णं प्रति तुलस्याः शापदानं। गण्डकीनद्या उत्पत्तिः। तुलसीशिलाचक्रयोर्माहात्म्यकीर्त्तनं। श्रीधर-दामोदरादिशिलाचक्रलक्षणं। तुलसीनामाष्टकादिकथनं।

२०, २१, २२, २३, २४, २५, २६, २७, २८, २९, ३०, ३१ अ०।—मद्रदेशाधिपतेरश्वपतेरुपाख्यानं। गायत्रीजपप्रकार-माहात्म्यादिकथनं। सावित्रीध्यानस्तोत्रादिकथनं। सावित्र्या जन्मकथनं। सत्यवतः काष्ठाहरणादिवृत्तान्तकथनं। यमेन सह सावित्र्याः संवादः। कर्म्मफलप्रदर्शनं। कर्म्मविपाककथनं। येन येन कर्म्मणा स्वर्गादिलाभो भवति तत्कीर्त्तनं। यमाष्टककीर्त्तनं। नरककुण्डवर्णनं। नरा येन येन कर्म्मणा यादृशं नरकं प्राप्नुवन्ति तत्कथनं। अवश्यकर्त्तव्याकर्त्तव्यनिरूपणं। पापनिरूपणं। तत्त्वज्ञानकथनं। लौहकुण्डादिलक्षणकीर्त्तनं। श्रीकृष्णमाहात्म्यादिकीर्त्तनं।

३२, ३३, ३४, ३५, ३६ अ०।—महालक्ष्म्या राधायाश्च उत्पत्तिकथनं। तयोः परिणयकथनं। स्वर्गमर्त्यादिषु महालक्ष्म्या नामभेदादिकथनं। भाद्रशुक्लाष्टम्यादिषु तस्याः पूजाविधानं। इन्द्रं प्रति दुर्व्वाससः शापदानविवरणं। पद्मायाः समुद्रकन्यात्वकथनं। शूद्रश्राद्धान्नादिभोजनप्रतिषेधः। वैष्णवमन्त्रग्रहणफलकीर्त्तनं। सन्न्यासिनां ग्राम्यधर्म्मादिनिषेधकथनं। पुत्रकन्याजननादिकारणकीर्त्तनं। कालधर्म्मकथनं। शक्रगीष्पतिसंवादः। लक्ष्मीचरित्रकीर्त्तनं। लक्ष्मीपूजाविधिः। तत्र ध्यानस्तोत्रादिकीर्त्तनं।

३७, ३८, ३९, ४०, ४१, ४२, ४३ अ०।—स्वाहाया उत्पत्तिकथनं रूपवर्णनञ्च। तस्यास्तपस्या, वह्निपत्नीत्वकथनञ्च। तद्गर्भे दक्षिणाग्न्यादीनां जन्मकथनं। स्वाहामन्त्रादिकथनं। स्वधाया जन्म, रूपवर्णनञ्च। स्वधापूजामन्त्रादिकथनं। दक्षिणाया उत्पत्तिः, रूपवर्णनञ्च। भर्तृप्रशंसा। भर्तृ-पतिप्रभृतिनामनिर्व्वचनं। दक्षिणया सह यज्ञस्य विवाहः। तद्गर्भे फलस्य जन्म। अदक्षिणस्य कर्म्मणो निन्दादिकीर्त्तनं। दक्षिणाया ध्यानादिकथनं। षष्ठीनामनिरुक्तिः। तस्याः कार्त्तिकपत्नीत्व-

कथनं। प्रियव्रतोपाख्यानं। षष्ठ्या सार्द्धं क्रोड़ीकृतमृतपुत्रस्य तस्य संवादकीर्त्तनं। पुत्रजनने एकविंशतिदिने वटमूलादौ षष्ठीपूजावश्यकताकीर्त्तनं। षष्ठीध्यान-स्तोत्रादिकथनं। मङ्गलचण्डीनामनिरुक्तिः। तस्या आविर्भाव-पूजनादिकथनं। मनसानामनिरुक्तिः, तस्याः पूजादिकथनं।

४४, ४५, ४६ अ०।—जरत्कारुणा सह तस्या विवाहादिवृत्तान्तकीर्त्तनं। राधया सह विहरमाणस्य श्रीकृष्णस्य वामपार्श्वतो गवामधिष्ठात्र्याः सुरभ्या उत्पत्त्यादि-कथनं। (अत्र च पाठान्तरे राधाया वामपार्श्वतः सुरभ्या उत्पत्तिरवधेया)। तस्या ध्यानस्तोत्रादिकथनं। राधिकाया उत्पत्तिकथनं। द्विधारूपस्य भगवतो दक्षिणा-र्द्धात् श्रीकृष्णस्य वामार्द्धाच्च राधिकाया आविर्भावादिकथनं। राधानामनिरुक्तिः। राधालोमकूपेभ्यो गोपीनामुत्पत्त्यादिकथनं। राधाया वामभागात् महालक्ष्म्या उत्पत्तिकथनं। तया सार्द्धं वैकुण्ठाधिपतेश्चतुर्भुजस्य दाम्पत्यकथनं। राजलक्ष्म्या-दीनामुत्पत्त्यादिकथनं। ब्रह्मादिस्तम्बपर्य्यन्तं जगतो मिथ्यात्वकथनं। विरजाया नदीभावप्राप्तिविवरणं। राधायाः शापेन श्रीदाम्नः शङ्खचूड़दैत्यरूपेण जन्मादि-कथनं। "गोपकन्या भव किन्तु शतं समास्ते कृष्णविच्छेदो भविष्यतीति" राधां प्रति श्रीदाम्नः शापदानं। वृषभानुगृहे अयोनिजायाः राधाया जन्मवृत्तान्तकी-र्त्तनं। श्रीकृष्णस्य अवतारकथनं। कलावत्यादीनामुत्पत्तिकथनं।

४७, ४८, ४९, ५०, ५१ अ०।—राज्ञ उत्कलस्य ब्रह्मकृतसुयज्ञेतिनामकरणं। सुयज्ञं प्रति 'कुष्ठी भवेति' कस्यचिद् ब्राह्मणस्य शापदानवृत्तान्तः। अतिथिं ब्रा-ह्मणं दृष्ट्वा अभ्युत्थानाद्यकरणे प्रत्यवायादिकथनं। कर्म्मविपाककथनं। सुतपासु-यज्ञसंवादः। सुतपसो जन्मादिविवरणं। नारायणादीनामाश्रयकथनं। काल-परिमाणकीर्त्तनं। युगादिपरिमाणकथनं। स्वायम्भुवमनुकृतयज्ञसङ्ख्यादिकथनं। चतुर्द्दशमनुविवरणं।

५२, ५३, ५४, ५५ अ०।—श्रीकृष्णस्य योगनिद्राकथनं। शिवस्य मृत्युञ्जयनाम-कारणकथनं। राधाया गर्भधारणादिकथनं। महाविराज उत्पत्तिकथनं। राधायाः श्रीकृष्णप्राणाधिष्ठातृत्वकथनं। राधासेवनमाहात्म्यं। विप्रपादोदकमाहात्म्यं। राधातन्त्रदानकथनं। राधाया ध्यानादिमन्त्रकथनं। राधिकास्तोत्रकीर्त्तनं। रा-धिकाकवचकथनं। शिवकृष्णयोरभेदकीर्त्तनं। शिवनामनिरुक्तिः। एवं महादेवादि-नाम्नामपि। दुर्गानारायणीशानाप्रभृतिषोड़शनामधेयानामर्थादिकथनं। सर्व्वादौ केन दुर्गा पूजितेति कथनं। सुरथवैश्ययोः कथनं।

५६, ५७ अ०।—चन्द्रकृतताराहरणवृत्तान्तकीर्त्तनं। चन्द्रस्य कलङ्कोत्पत्तिकथनं। शत्रोरपि गुणा वक्तव्या इत्यादिकथनं। शुक्रकृतचन्द्रपापापनयनविवरणं। अम्बु-

वाप्यां भूमिखननादिषु पापकथनं। एवं कन्याविक्रय-एकादशीभोजन-मातापितृपालनदैवसिकनिष्ठुवन-परस्त्रीमुखस्तन-श्रोणीप्रभृतिदर्शन-नरघातनादिपापकीर्तनं। बृहस्पतेर्विलापवर्णनादिकं। ब्रह्मेन्द्रादीनां संवादः। सम्बर्त्तकृतोतथ्यपत्नीहरण-कथनं। अङ्गिरसो भार्य्यायाः पुंसवनव्रतानुष्ठानवृत्तान्तकीर्तनं। बृहस्पतेरुत्पत्ति-कथनं। शिवेन सह तस्य संवादः। वैष्णवमाहात्म्यं। भक्तानां श्रीकृष्णे भक्तिं विना मोक्षाभिलाषो नास्तीतिकथनं। श्वेतद्वीपाद् विष्णोरागमनादिकथनं।

५८, ५९ अ०—शुक्रालयवर्णनं। तत्र ब्रह्मादीनां गमनविवरणं। ताराभिक्षा-कथनं। बलात्कारेण स्त्रीणां सतीत्वहानिर्न जायते, वस्तुतः प्रायश्चित्तानुष्ठानेन शुद्धिर्भवतीति कथनं। बुधस्य जन्मकथनं। तेन सह चित्रायाः पाणिग्रहणकथनं। अधिरथादीनां जन्मादिकथनं। सुरथस्य शरत्कालीनमहापूजाद्यनुष्ठानादि-कथनं। ध्रुवगोत्रस्य नन्दैः सुरथराजधानी-कोलारोधविवरणं।

६०, ६१, ६२, ६३ अ०।—सुरथवैश्ययोः प्रकृतिसन्दर्शनकथनं। नवधाभक्तिल-क्षणकीर्तनं। मूलप्रकृतिध्यानादिकथनं। षोड़शोपचारमन्त्रादिकथनं। बलि-दानयोग्यछागादिलक्षणकथनं। बोधनादिकालकथनं। स्नानकथनं। मधुमा-सादौ श्रीकृष्णकृतदुर्गापूजाकथनं। दुर्गास्तोत्रकथनं। ब्रह्माण्डमोहनाभिधान-दुर्गाकवचकीर्तनं। प्रकृतिखण्डफलश्रुतिः। समाप्तिः।

No. 1249. धातुदीपिका।

Substance, country-made yellow paper, 11 × 6 inches. Folia 102. Lines 24 on a page. Extent, 2,907 s'lokas. Character, Bengali. Date ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Dhátu-dípiká. A commentary on the Kavikalpadruma, of Vopadeva. By Durgádása. The Kavikalpadruma is a list of Sanskrit roots arranged under the ten heads of Sanskrit conjugation. The work of course belongs to the school of Vopadeva, and differs from others in having its own peculiar symbols and technical terms.

Beginning. नत्वा शङ्करचरणसरोजं श्रीदुर्गादासेन धीमता।

विदधे धातुदीपिका नाम टीका कविकल्पशाखिनः॥

कति कति सन्ति ये सन्तः सन्तोषं नो + + +इतरगुणे।

ये परगुणमनुलुब्धा दुर्गादासश्रमो भवेत्तेभ्यः॥

सुखाय च्छात्रवर्गाणामचेति परिभाष्यते ।
अन्तस्थाः सुर्यवरला श्राद्या इत्यादयः स्वराः ॥
ऊष्मसञ्ज्ञाः शषसहा अन्त्यात् प्रागुपधा भवेत् । श्रीवोपदेवो धातुपाठं चिकीर्षितप्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति,—शब्दाकरकरग्राममर्थमित्यादिः ।

End. सर्व्वेषं + + + + + मन्येषां हेमराशिवत् ।
कविकल्पद्रुमस्य प्रदीप्यते धातुदीपिका ॥

Colophon. इति श्रीदुर्गादासविरचिता + ———— कविकल्पद्रुमटीका समाप्ता ।

विषयः । वोपदेवविरचितकविकल्पद्रुमाभिधेयधातुपाठस्य व्याख्यानं ॥

No. 1250. माध्यन्दिनशतपथब्राह्मणभाष्यं ।

Substance, country-made yellow paper, 14 × 8 inches. Folia, 487. Lines, 24—25—26—27—28 on a page. Extent, 18,201 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

S'atapatha-bráhmaṇa-bháshya. A commentary on the S'atapatha Bráhmaṇa of the White Yajur Veda. By Mahidhara. Large extracts from this work have already been printed in Dr. Weber's edition of the Bráhmaṇa. See also Weber's Catalogue of the Berlin Collection, and Max Müller's *Ancient Sañskṛit Literature.*

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
तत्कटाक्षेण तद्रूपं दधतो बुक्कभूपतेः ।
कृते चेतर+क्षीरसागरादिव चन्द्रमाः ॥
विजेता राजते जातो वीरः श्रीरक्षमा+नः ।
धर्म्मब्राह्मणयान्यः समादिशन् सायणाचार्य्यः ॥
ऋग्यजुःसामशाखानामेकैका व्याकृता त्वया ।
तावता तत्समानार्थं ज्ञातुं शक्या ++परा; ॥
वासना + + + + + मन्त्रार्थानामशेषतः ।

प्रायेणाध्वर्य्यवं कर्म्म पू+ ++न्नरैर्विना ॥
करतलामलक+ परं तत्त्वं प्रकाशितं ।
सका+सदृशी शाखा लया व्याख्यायतामिति ॥
सर्व्वतः सायणाचार्य्यो विद्वद्भिरोदीरिता+ + ।
माध्यन्दिने शतपथे ++ व्याख्यां करोति + ॥
सञ्चारः पदवाक्यार्थन्यायानां दर्शितः पुरा ।
वेदानामर्थवत्त्वादि यच्चान्यदुपयुज्यते ॥
सर्व्वशाखासु यत्नेन विज्ञेयं तदिहाखिलं ।
यच सन्दिग्धमज्ञातमच तद्विचरिष्यते ॥
सम्मत्या कल्पसूत्राणां ब्राह्मणानाञ्च सङ्ग्रहात् ।
इह हि चरमे चतुर्द्दशे काण्डिके करतलामलकवत् परं तत्त्वं प्रकाशितं । ततः प्राकृतैश्च + + + + + काण्डैः त्रेताग्निसाधर्म्म्यप्राधान्येन । इत्यादिः ।

End. यदा मलिम्लुचो भवति, तदा त्रयोदश, अतोऽस्या इष्टेर्द्वादशकपालसंस्कृतहविर्युजत्वात् संवत्सरसम्मितत्वं । अतः संवत्सररूपाया इष्टेर्द्वादश त्रयोदश वा दक्षिणा युक्ता इत्यर्थः । इति पञ्चमं ब्राह्मणं ।
वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon. इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीबुक्कभूपालसाम्राज्यधुरन्धरसायणाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणे पञ्चमकाण्डे पञ्चमोऽध्यायः । समाप्तञ्च पञ्चमकाण्डं ।

विषयः । शुक्लयजुर्वेदीयमाध्यन्दिनशतपथब्राह्मणस्य व्याख्यानं ।

No. 1251. गङ्गावाक्यावली ।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 137. Lines, 25 on a page. Extent, 3,211 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose and verse. Generally correct.

Gañgá-vákyávalí. A treatise on the religious merits of the River Ganges, including directions for visiting, saluting, and worshipping the river, for bathing in it on different auspicious occasions, consecrating gifts, performing s'ráddhas, special merits of Gañgáságara and Prayága,

&c., &c. By Vidyápati. The author was a distinguished poet, and, according to tradition current in Tirhoot, lived during the reign of Rájá S'iva Siñha of Tirhoot, who granted him a patent conveying a small plot of land in the year two hundred and ninety-three of Lakshmaṇa Sena's-era, which would be equal to the Christian era 1400. The Sadukti-karṇámrita (*ante* No. 1180) however, quotes from the works of a Vídyápati, and the Sadukti itself was completed in the year 1205, A. Ç., or nearly two hundred years before S'iva Siñha. Thus we have two Vidyápatis, and it is doubtful who wrote the work under notice. Tirhoot tradition assigns it to the second.

Beginning. स्वस्त्यस्तु वस्तुहिनरश्मिरतः प्रमादादेकं वपुः श्रितवता हरिणा समेत्य ।
तन्नाभिपङ्कजसरोत्यमृणाललीलामाविष्करोति हृदि यस्य भुजङ्गराजः ॥
यावद्गङ्गा विभाति त्रिपुरहरजटामण्डलं मण्डयन्ती
मल्लीमाला सुमेरोः शिरसि सितमहावैजयन्ती जयन्ती ।
याता पातालमूलं स्फुरदमलरुचिः शेषनिर्म्मोकवल्ली
तावद्विश्वासहेव्या जगति विजयतां गाङ्गवाक्यावलीयं
अथ भक्तिश्रद्धापुरःसरमेव सर्व्वकर्म्मविशेषमाह । अतो भक्तिश्रद्धे अवश्यमेव कर्त्तव्ये, तथा च यमः ।——
श्रद्धा भक्तिश्च काम्यानां दृद्धिचेतकरे हि ते । इत्यादिः ।

End. गङ्गातीरं परित्यज्य येऽन्यतीर्थाभिलाषिणः ।
तोयान्तरे रतिर्येषां ते वै रौरवगामिनः ॥
यावत् स्वर्गतरङ्गिणी हरजटाभ्रष्टान्तरा लम्बते
यावद्विश्वविशालविस्तृतकरः सूर्य्योऽयमुज्जृम्भते ।
यावन्मण्डलमैन्दवं वितनुते शम्भोः शिरोमण्डलं
तावत् कल्पलतेयमस्तु सफला देव्याः सतां श्रेयसि ॥
कियन्निबन्धमालोक्य श्रीविद्यापतिसूरिणा ।
गङ्गावाक्यावली देव्याः प्रमाणैर्विमलीकृता

Colophon. इति श्रीविद्यापतिविरचिता गङ्गावाक्यावली समाप्ता ।

विषयः । गङ्गानामस्मरणप्रकरणं । तत्र भक्तिश्रद्धादिलक्षणं । स्मरणप्रयोगः । (एवं परत्रापि प्रयोगो बोद्धव्यः) । नामसङ्कीर्त्तनादिमाहात्म्यकथनं । यात्राप्रकरणं । गङ्गावासमाहात्म्यं । यात्रापूर्व्वदिने केशवपनादिकर्त्तव्यता । श्राद्धविधानं । श्रवणमाहात्म्यादिकथनं । गमनप्रकरणं । वीक्षणप्रकरणं । नमस्कारप्रकरणं । स्पर्शनकरणं । सामान्यतः सर्व्वतीर्थप्राप्तिश्राद्धप्रकरणं । मुण्डनादिकथनं ।

श्राद्धोत्तरकर्म्मकथनं। गङ्गाभक्त्यादिमाहात्म्यकथनं। अभयप्रकरणं। क्षेत्रप्रकरणं। अवगाहनादिप्रकरणं। स्नानप्रकरणं। सामान्यकालस्नानादिविधानं। आचमनादिकथनं। गङ्गावाहनध्यानादिमन्त्रकथनं। पुण्यकालस्नानप्रकरणं। तत्र तिथिस्नानं। विशेषेण माघसप्तमीस्नानकीर्त्तनं। नन्दास्नानं। युगाद्यास्नानं। दिनक्षयस्नानं। नक्षत्रस्नानं। एवं योग-दशहरा-सङ्क्रान्तिस्नानकथनं। सङ्क्रान्तिनिरूपणं। माघ-ग्रहण-मध्याह्न-वारुण्यादि-महाज्यैष्ठी-शिवसन्निहित-पश्चिमवाहिन्यादिगङ्गास्नानकथनं। तर्पणप्रकरणं। नीलीरक्तादिवस्त्रपरिधानेन तर्पणाद्यनुष्ठाननिषेधः। मृत्तिकाप्रकरणं। जपप्रकरणं। पूजाप्रकरणं। मृत्तिकानिर्म्मितशिवलिङ्गपूजनादिविधानं। पितृलोकानुद्दिश्य देवस्नानादिविधानं। दानप्रकरणं। तत्र दानादिस्वरूपकथनं। द्रव्यदैवतनिरूपणं। प्रतिषिद्धदानं। सामान्यदानं। घृतधेनु-सुवर्णधेनु-भूमिप्रभृतिदानविधानं। तत्र भूमिदाने परिमाणादिकथनं। व्रतफलादिकथनं। गङ्गास्तोत्रकीर्त्तनं। दशहरागङ्गापूजाविधिः। श्राद्धे विहिताविहितद्रव्याणि। जलप्रकरणं। तत्पानप्रकरणं। आश्रयप्रकरणं। मृत्युप्रकरणं। प्रायश्चित्तप्रकरणं। अस्थिस्थितिप्रकरणं। गङ्गासागरसङ्गमादिप्रकरणं। प्रयागमाहात्म्यादिप्रकरणं। तत्र मुण्डनमरणादिप्रकरणं। विघ्नप्रकरणं। प्रतिषिद्धप्रकरणं। गङ्गामाहात्म्यकीर्त्तनं। इति।

No. 1252. ब्रह्मवैवर्त्तीयब्रह्मखण्डः।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 94. Lines, 22 on a page. Extent 2,068 s'lokas. Character, Bengali. Date ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Generally correct.

Brahma-khaṇḍa. The first part of the Brahma-vaivarta Puráṇa, being the tenth of the eighteen great Puráṇas attributed to Vyása (Vide ante p. 227): It is thoroughly sectarial in character, and treats of the preeminence of Kṛishṇa as the supreme Deity. Náráyaṇa is assumed to be a part manifestation of Kṛishṇa, and legends are over and over introduced to illustrate the subordinate character of S'iva, Durgá, and the other gods and goddesses. The seat elect of Kṛishṇa is described to be Goloka, the highest heaven of the Vaishṇavas. The MS. comprises thirty chapters, and professes to be complete.

Beginning. गणेशब्रह्मेशसुरेशशेषाः सुराश्च सर्व्वे मुनयो मुनीन्द्राः ।
सरस्वती श्रीगिरिजादिकाश्च (यं) नमन्ति देवाः प्रणमामि तं विभुं ॥
स्थूलात् स्थूलतमां तनूं विदधतं विराजं विश्वानि लोमविवरेषु महान्तमाद्यं ।
सृष्ट्युन्मुखः स्वकलयापि ससर्ज्ज सूक्ष्मां नित्यां समेत्य हृदये तमजं भजामि ॥
ध्यायन्ते ध्याननिष्ठाः सुरनरमनवो योगिनो योगरूढाः
सन्तः स्वप्नेऽपि सन्तं कतिकतिजनिभिर्यं नमस्यन्ति नम्रा ।
ध्याये स्वेच्छामयं तं त्रिगुणपरमहो निर्व्विकारं निरीहं
भक्तध्यानैकहेतोर्निरुपममचिरं श्यामरूपं दधानं ॥
वन्दे कृष्णं गुणातीतं परं ब्रह्माच्युतं यतः ।
आविर्बभूवुः प्रकृतिब्रह्मविष्णुशिवादयः ॥
ॐ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ॐ नमः सर्व्वविघ्नविनाशकाय ।
अन्तपरमपूर्व्वं भारतीकामधेन्वाः श्रुतिगणकृतवत्सो व्यासदेवो दुदोह ।
अतिरुचिरपुराणं ब्रह्मवैवर्त्तमेतत् पिवत पिवत मुग्धा दुग्धमत्यन्तमिष्टं ॥
भारते नैमिषारण्ये ऋषयः शौनकादयः ।
नित्यां नैमित्तिकीं कृत्वा क्रियामूषुः कुशासने ॥
एतस्मिन्नन्तरे सौतिमागच्छन्तं यदृच्छया ।
प्रणतं सुविनीतं तं विलोक्य ददुरासनं ॥
तं सम्पूज्यातिथिं भक्त्या शौनको मुनिपुङ्गवः ।
संपप्रच्छ कुशलं शान्तः शान्तं पौराणिकं मुदा ॥
वर्त्मायासविनिर्मुक्तं वसन्तं सुस्थिरासने ।
सस्मितं सर्व्वतत्त्वज्ञं पुराणानां पुराणवित् ॥
परं कृष्णकथोपेतं पुराणं श्रुतिसुन्दरं ।
मङ्गलं मङ्गलार्हञ्च मङ्गल्यं मङ्गलालयं ॥
सर्व्वमङ्गलवीजञ्च सर्व्वदा मङ्गलप्रदं ।
सर्व्वामङ्गलविघ्नघ्नं सर्व्वसम्पत्करं परं ॥
हरिभक्तिप्रदं शश्वत् सुखदं मोक्षदं भवेत् ।
तत्त्वज्ञानप्रदं दारापुत्रपौत्रविवर्द्धनं ॥
पप्रच्छ सुविनीतश्च विनीतो मुनिसंसदि ।
यथाकाशे तारकाणां द्विजराजो विराजते ॥

शौनक उवाच ।

प्रस्थानं भवतः कुत्र कुत आयासि ते शुभं ।
किमस्माकं पुण्यदिनमद्य त्वद्दर्शनेन च ॥
वयमेव कलौ भीता विशिष्टज्ञानवर्ज्जिताः । इत्यादिः ।———

End. दिव्या स्त्रीपूजिता येन पतिपुत्रवती सती ।
प्रकृतिः पूजिता तेन सर्व्वमङ्गलदायिनी ॥
मूलप्रकृतिरेका सा पूर्णब्रह्मस्वरूपिणी ।
सृष्टौ पञ्चविधा सा च विष्णुमाया सनातनी ॥
प्राणाधिष्ठात्री देवी या श्रीकृष्णस्य परात्मनः ।
सर्व्वासां प्रेयसी कान्ता सा राधा परिकीर्त्तिता ॥
नारायणप्रिया लक्ष्मी सर्व्वसम्पत्स्वरूपिणी ।
रागाधिष्ठात्री देवी या सा च पूज्या सरस्वती ॥
सावित्री वेदमाता च पञ्चरूपा विधेः प्रिया ।
शङ्करस्य प्रिया दुर्गा तस्याः पुत्रो गणेश्वरः ॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे नारायणनारदसंवादे त्रिंशत्तमोऽध्यायः ।
समाप्तश्चायं ब्रह्मखण्डः ।

विषयः । १, २, ३ अध्याये ।—सूतेन सह ऋषीणां संवादः । गोलोकादिवर्णनं । परब्रह्मनिरूपणं । महदादिसृष्टिकथनं । नारायणाविर्भावकथनं । नारायणकृतश्रीकृष्णस्तोत्रं । शम्भोराविर्भावकथनं । तत्कृतश्रीकृष्णस्तोत्रं । विधातुराविर्भावकथनं । तत्कृतश्रीकृष्णस्तवनं । धर्म्मस्य प्रादुर्भावः । तत्कृतश्रीकृष्णस्तुतिः । भारत्या आविर्भावः । तत्कृतश्रीकृष्णस्तोत्रं । महालक्ष्म्या आविर्भावः । तत्कृतश्रीकृष्णस्तोत्रं । एवं दुर्गादीनामाविर्भावादिकथनं ।

४, ५, अ० ।—साविव्या आविर्भावादिकथनं । रतिमदनादीनामाविर्भावादिकथनं । सङ्क्षेपेण ब्राह्म-वाराह-पाद्मकल्पविवरणकीर्त्तनं । अत्रान्तरे भगवतो रासमण्डलवर्णनं । राधिकाया आविर्भावकथनादिकं । तस्या लोमकूपेभ्यः गोपाङ्गनानामुद्भवकथनं । श्रीकृष्णस्य लोमविवरेभ्यः गोपानामाविर्भावकथनं । कामधेनूनामाविर्भावादिकथनं ।

६ अ० ।—श्रीकृष्णस्य अङ्गविशेषेण सृष्टिप्रक्रियाकथनं । तस्य नारायणादिभ्यो लक्ष्म्यादिदानवृत्तान्तकथनं । तत्समीपे शिवस्य दास्यप्रार्थना । सालोक्यादिषड्विधमुक्तिकथनं । श्रीकृष्णार्चनमहिमा । शिवनामोच्चारणमाहात्म्य । शिवेन

प्रत्याख्यातायाः सिंहवाहिन्या गोलोके अवस्थानादिकथनं। शिवस्तन्त्रशास्त्रं रचयिष्यतीति कथनं।

७, ८, ९ अ०।—ब्रह्मकृतसृष्टिविवरणं। शिवस्य तामसत्वं नास्तीतिकथनं। रुद्रनामकथनादिकं। नारदं प्रति ब्रह्मणः शापदानकथनं। अष्टुरआदीनामुत्पत्तिकथनं। भूमिगर्भे मङ्गलस्य जन्मवृत्तान्तकीर्त्तनं। कद्रुवंशादिकथनं। दनुवंशादिकथनं। अश्विन्यादीनां चन्द्रपत्नीत्वकथनं। चन्द्रस्य क्षयरोगोत्पत्तिविवरणं। हरिहरयोः संवादः।

१०, ११ अ०।—कुबेरादीनां जन्मादिकथनं। सच्छूद्रकथनं। वर्णसंकरकथनं। घृताचीविश्वकर्म्मणोः संवादः। मातृपित्रादीनां गुरुतरागुरुतरत्वादिकथनं। मातृसम्बोधनेनैव मातृतुल्यता भवतीति कथनं। कामार्त्तस्य त्वष्टुः शापेन घृताच्याः शूद्रगृहे जन्मादिकथनं। तस्याः शापेन विश्वकर्म्मणोऽपि कारुरूपेण जन्मग्रहणकथनं। प्रयागक्षेत्रे मिलितयोः जातिस्मरयोस्तयोः संलापादिकथनं। तद्गर्भे कुण्डकारादीनामुत्पत्तिकथनादिकं। सङ्कराणामुत्पत्तिकथनं। गोदावर्य्या उत्पत्तिकथनं। गणकदैवज्ञादीनामुत्पत्तिकथनं। सम्बन्धनिरूपणं। कल्याणमित्रस्य मुनेरुत्पत्तिः। तन्नामस्मरणेन वज्रभीतिर्नास्तीति कथनं। सूर्य्यकृतविप्रस्तोत्रं। विप्रपादोदकमाहात्म्यं। वैष्णवब्राह्मणप्रशंसा।

१२, १३, १४ अ०।—नारदशापेन ब्रह्मणोऽपूज्यताकथनं। गन्धर्व्वराजस्य शिवाराधनावृत्तान्तः। तत्प्रसङ्गेन नारदस्य जन्मादिकथनं। षट्चक्रकथनं। इड़ापिङ्गलादिषोड़शनाड़ीकथनं। नारदस्य पुनः शूद्रगृहे जन्मादिकथनं। उपवर्हणनामकेन नारदेन विना कृताया मालावत्या विलापादिवर्णनं। तत्समीपे ब्राह्मणरूपेण श्रीकृष्णस्य आगमनं। कृष्णभक्तिमाहात्म्यं।

१५, १६, १७, १८ अ०।—मालावतीसमीपे स्वामिना सह मृत्युकन्याया आगमनादिविवरणं। कालादीनां रूपवर्णनं। मालावतीकालपुरुषसंवादः। आयुर्वेदागमविवरणं। धन्वन्तरि-दिवोदासादीनां ग्रन्थकथनं। ज्वरादिलक्षणचिकित्सादिकथनं। विष्णुना सह असुराणां संवादः। मालावतीकृतश्रीकृष्णस्तोत्रं। उपवर्हणस्य शरीरे श्रीकृष्णस्य अधिष्ठानकथनं।

१९, २०, २१ अ०।—महापुरुषब्रह्माण्डपावननामककवचकथनं। शङ्करकवचकथनं। शङ्करस्तवराजकथनं। कान्यकुब्जदेशे नारदस्य जन्मवृत्तान्तकथनं। द्रुमिलस्य उपाख्यानं। मातुर्मरणे अप्राप्तप्रागल्भ्यस्य नारदस्य श्रीकृष्णमन्त्रप्राप्तिविवरणं। नारदशापमोचनवृत्तान्तकीर्त्तनं।

२२, २३, २४, २५ अ०।—नारदनामनिरुक्तिः। एवं प्रचेतोदक्ष-कर्दम-मरीचि-

प्रभृतीनां नामनिर्व्वचनं । ब्रह्मनारदसंवादेन वेदसारकथनं । कृष्णभक्तिमाहात्म्यं । गार्हस्थ्याश्रमप्रवेशे नियमादिकीर्त्तनं । दारपरिग्रहप्रकारः । संसारस्य अनित्यताकथनादिकं । नारदस्य शिवसान्निध्यगमनविवरणं ।

२६. २७ अ०।—शिवस्य नारदाय कृष्णमन्त्रादिदानपूर्व्वकं द्विजानामाह्निकाचारकथनं । गुरुमाहात्म्यकथनं तिलकावश्यकता । शालग्रामादौ हरेरर्चनविधानं । शिलाचक्रमाहात्म्यं । श्रीकृष्णार्चनप्रकारकथनं । गृहि-द्विज-यति-वैष्णवादीनां भक्ष्याभक्ष्यकथनं । विष्णोरनिवेदितान्नजलादीनां विष्ठामूत्रसादृश्यादिकथनं । मांसादिभोजननियमकथनं ।

२८, २९, ३० अ०।—तत्त्वज्ञानकथनं । जीवस्य ब्रह्मप्रतिविम्बत्वकथनं । ब्रह्मणो निर्गुणत्वादिकथनं । प्रकृतिलक्षणादिकथनं । वैष्णवमते ब्रह्मस्वरूपकथनं । तत्र गोलोकधामवर्णनं । गोपीकदम्बवेष्टितस्य श्रीकृष्णस्य राधया आलिङ्गितस्य परब्रह्मत्वकथनं । कृष्णनामनिर्व्वचनं । नारायणक्षेत्राश्रमवर्णनं । नारायणनारदसंवादः । भगवत्तत्त्वकथनं । राधायाः पूजने श्रीकृष्णस्य प्रीत्याधिक्यकथनं । इति ।

No. 1253. ब्रह्मवैवर्त्तीयगणपतिखण्डः ।

Substance, country-made yellow paper, 12 × 7 inches. Folia 134. Lines, 20 on a page. Extent, 2,680 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Generally correct.

Gaṇapati Khaṇḍa alias *Gaṇes'a Khaṇḍa.* The third part of the Brahma-vaivarta Puráṇa. According to the Nárada Puráṇa it should comprise s'lokas; the MS. under notice contains 2680 s'lokas, divided into forty-six chapters, and professes to be complete. The work is devoted to the birth, attibutes, and worship of Gaṇes'a, and forms the scriptures of the followers of that god. It is to be noted, however, that, though the praise of the elephocephalic divinity is its main object, the Vaishṇavite character of the Puráṇa is nowhere lost sight of, and ever and anon the preeminence of Kṛishṇa is prominently brought forward.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

श्रुतं प्रकृतिखण्डं तदमृतार्णवमुत्तमं।
सर्व्वोत्कृष्टमीप्सितञ्च मूढानां ज्ञानवर्द्धनं॥
अधुना श्रोतुमिच्छामि गणेशखण्डमीश्वर।
तज्जन्मचरितं नृणां सर्व्वमङ्गलमङ्गलं॥
कथं जज्ञे सुरश्रेष्ठः पार्व्वत्या उदरे शुभे।
देवी केन प्रकारेण लेभे तादृशं सुतं॥
स चांशः कस्य देवस्य कथं जन्म ललाभ सः।
अयोनिसम्भवः किंवा किंवाऽसौ योनिसम्भवः॥
किंवा तद्ब्रह्मतेजो वा कियानेव पराक्रमः।
का तपस्या च किं ज्ञानं किमु+विमलं यशः॥
अथ तस्य पुरः पूजा विश्वेषु निखिलेषु च।
स्थिते नारायणे शम्भौ जगदीशे च ब्रह्मणि॥ इत्यादिः।

End. कार्त्स्न्याच्च ब्रह्मवैवर्त्तं श्रुत्वा यल्लभते फलं।
तत्फलं लभते मर्त्यः श्रुत्वेदं खण्डमुत्तमं॥
वाञ्छां कृत्वा तु मनसि शृणोति परमास्तिकः।
तस्मै ददाति सर्व्वेष्टं सुरश्रेष्ठो गणेश्वरः॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखण्डे षट्चत्वारिंश-त्तमोऽध्यायः। इति गणपतिखण्डः समाप्तः॥

विषयः। १ प्रथमाध्याये।—पार्व्वत्या सह स्मरहरस्य विलासमविरामं निर्व्वर्ण्य ब्रह्मादीनां नारायणसमीपगमनादिविवरणं। निधुवनप्रवृत्तस्य पुरारेः पुरद्वारस्थितानामिन्द्र चन्द्रप्रभृतिदेवानां शिवस्तवनं। भूमौ शिववीर्य्यपातकथनं। नारायणनारद-संवादः।

२, ३ अ०।—पलायितान् देवान् उद्दिश्य पार्व्वत्याः शापदानकथनं। शिवकृत-पार्व्वतीस्तोत्रं। कामिनीनां दुःखवर्णनं। साध्वीलक्षणादिकथनं। पुण्यकाभिधान-व्रतप्रशंसा।

४, ५, ६, ७ अ०।—पुण्यकविधानं। पुण्यकव्रतकथा। पार्व्वत्या व्रतानुष्ठानमहो-त्सववर्णनं। हरकृतहरिस्तुतिः। गणेश-लम्बोदर-गजाननप्रभृतिनामधेयानां कारणकथनं। सर्व्वाग्रे गणेशादिपञ्चदेवतापूजाविधानं। दक्षिणादानावश्यकता। तत्र पार्व्वत्या सह ब्रह्मादीनां वादानुवादकीर्त्तनं। पार्व्वतीकृतश्रीकृष्णस्तोत्रं।

८, ९ अ०।—गिरिजागिरिशयोः पुरतः वृद्धरूपेण श्रीकृष्णस्य गमनवृत्तान्तकथनं। पञ्चविधपितृकथनं। नानाविधमातृकथनं। पञ्चविधपुत्रकथनं। हरिभक्तप्रशंसा।

गणेशजन्मकथनं। शिवयोः समीपे आकाशवाणीविवरणं। तयोः पुत्रमुखदर्शन-वृत्तान्तकीर्त्तनञ्च।

१०, ११, १२ अ०।—गणेशाय ब्रह्मविष्णुकुवेरादीनां यौतुकदानादिकथनं। मङ्गलमहोत्सववर्णनं। मुद्रितनयनेन शनैश्चरेण सह पार्व्वत्याः संवादः। शनैश्चरस्य स्ववृत्तान्तवर्णनं। तद्दृष्टिपातेन गणेशस्य शिरोरहितत्वकथनं। गजशिरश्छेदनविवरणं। गणेशस्य मस्तकहीनदेहे गजशिरःसंयोजनं। दुर्गायाः शनैश्चराय वरदानं।

१३, १४, १५, १६ अ०।—गणेशनामाष्टककथनं। गणेशपूजास्तवकवचादिकथनं। भूपतितशैववीर्य्यनिक्षर्वविवरणं। कार्त्तिकप्रवृत्तिप्राप्तिकथनं। कार्त्तिकानयनार्थं वीरभद्रादिप्रेरणकथनं। तैः सार्द्धं कार्त्तिकस्य संवादः। स्तनदात्र्यादिषोड़शमातृकथनं। पार्व्वतीप्रेरितरथेन कार्त्तिकस्य कैलासागमनकथनं। पुरीप्रवेशकाले तस्य पूर्णकुम्भवेश्यादिरूपमङ्गलचिह्नसन्दर्शनं। आनन्दोत्सववर्णनञ्च।

१७, १८, १९, २० अ०।—कुमाराभिषेकमहोत्सववर्णनं। विघ्नेशस्य शिरोनाशरूपविघ्नकारणकथनं। शङ्करप्रभाकरयोर्विरोधकीर्त्तनं। शङ्करं प्रति कश्यपस्य शापदानकथनं। मालि-सुमालिनोः कथा। व्याधिनाशनसूर्य्यकवचादिकथनं। गणेशस्य गजास्ययोजने विशेषकारणकथनं। पुष्पभद्रानदीतीरे रम्भया सह कामिनः शक्रस्य संवादकथनं। तयोर्जलक्रीड़ादिवर्णनं। तत्र दुर्व्वासस आगमनादिविवरणं।

२१, २२, २३, २४, २५ अ०।—इन्द्रस्य पुनः लक्ष्मीप्राप्तिविवरण। लक्ष्मीस्तवकवचपूजादिविधानं। शक्र-सनक-सनन्द-सनातनप्रभृतीनां क्षीरसागरगमनपूर्व्वकं महालक्ष्मीसन्दर्शनवृत्तान्तकथनं। लक्ष्मीचरित्रकीर्त्तनं। गजाननस्य एकदन्तधारणकारणकथनं। जमदग्निसमीपे कार्त्तवीर्य्यार्ज्जुनस्य आतिथ्यग्रहणवृत्तान्तकीर्त्तनं। कामधेनुशरीरात् सैन्योत्पत्तिकथनं। जमदग्निकार्त्तवीर्य्यार्ज्जुनयोर्युद्धवर्णनं।

२६, २७, २८, २९, ३० अ०।—तयोर्विधातृकृतसन्धिसंस्थापनकथनं। पुनस्तयोर्युद्धवर्णनं। जमदग्निनिधनकथनादिकं। अग्निदगरदायेकादशविधबधार्हकथनं। रेणुकाभृगुसंवादः। सहमरणकथनं। ब्रह्मोपदेशात् भृगोः शिवलोकगमनादिवृत्तान्तकथनं। तत्कृतशिवस्तोत्रं। तस्य महादेवात् दिव्यास्त्रादिलाभकथनं।

३१, ३२, ३३, ३४ अ०।—त्रैलोक्यविजयश्रीकृष्णकवचकथनं। श्रीकृष्णपूजादिविधानं। श्रीकृष्णस्तोत्रकीर्त्तनं। परशुरामस्य प्रयाणकाले मङ्गललक्षणसन्दर्शनविवरणं। तस्य स्वप्नदर्शनविवरणं। कार्त्तवीर्य्यार्ज्जुन-रामदूतयोः संवादः। रुनोरमासमीपे कार्त्तवीर्य्यार्ज्जुनस्य निजदुःस्वप्नवृत्तान्तकथनं।

३५, ३६, ३७, ३८, ३९ अ०।—कार्त्तवीर्य्यस्य दैववाणीश्रवणविवरणं। यात्राकाले अनिष्टसूचकचिह्नकथनं। ब्राह्मणलक्षणं। मुनिलक्षणं। योगिलक्षणं। हरिभक्तलक्षणं। रामार्ज्जुनयोः सङ्ग्रामवर्णनं। शिवकवचकथनं। रामकृतकालीस्तोत्रं। दशाक्षरमहाविद्याकवचकथनं। रामस्य क्षत्रियकुलनाशनप्रतिज्ञादिकथनं। तस्य वृद्धब्राह्मणेन सह संवादः। महालक्ष्मीकवचादिकीर्त्तनं।

४०, ४१, ४२ अ०।—रामकृत-पद्माक्ष-पुष्कराक्षनाशनकथनं। परशुरामस्य मूर्च्छादिकथनं। अर्ज्जुननिपातनं। राधा-लक्ष्मी-सावित्रीप्रभृतीनां श्रीकृष्णशक्तिविशेषत्वकथनं। परशुरामं प्रति ब्रह्मणो जनकादिषु पूज्यतरपूज्यतमादिनिर्द्देशेन वन्दनाकरणोपदेशः। रामस्य शिवसमीपगमनादिविवरणं। कैलासवर्णनं। गणेशरामयोः संवादः। ज्ञानस्वरूपनिरूपणं।

४३, ४४, ४५, ४६ अ०।—गणेशदन्तभङ्गादिविवरणं। दुर्गायाः खेदवर्णनं। रामं प्रति तस्याः कोपादिकथनं। गणेशस्य परमरूपवर्णनं। पुत्रनामाष्टकस्तुतिः। विष्णूपदेशेन रामकृतदुर्गास्तोत्रं। गणेशस्य कृष्णरूपत्वेऽपि तुलस्या पूजननिषेधः। तुलसीगणेशयोः संवादकीर्त्तनं। एतत्पाठादिफलश्रुतिः॥ इति।

No. 1254. अमृतसागरी, वा लीलावतीविवृतिः।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 68. Lines, 23 on a page. Extent, 1,607 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Prose. Incorrect.

Amrita-ságari alias *Líláratí-virriti.* A commentary on the *Líláratí* section of the *Siddhánta S'iromaṇi.* By Gaṅgádhara, son of Govardhana, and grandson of Divákara, of the Vastu race, an inhabitant of the town of Jambusara, which had been established by the renowned sage Yájṇavalkya. The *Siddhánta S'iromaṇi* was written by Bháṣkara Ácharya, son of Mahes'vara.

Beginning. ॐ नमो गणेशाय। श्रीसूर्य्याय नमः।

आदित्यं जगदुद्भवस्थितिविभुं+ + + + + +
ध्येयं ब्रह्म षडूर्म्मिदोषरहितं पश्यन्ति ये हृद्गतं।
भक्तानाञ्च मनोरथार्थफलदं क्लेशान्वयच्छेदकं
गीतं सश्रुतिभिः सदोदयमहं वन्दे जगद्भास्करं॥

गुरोरङ्घ्रिपद्मद्वयञ्च प्रणम्य प्रसीदन्मुखं सिन्धुरास्यं गणेशं ।
जगद्बोधरूपां मतिं विश्वमायां गिरां चेश्वरीं ब्रह्मपुत्रीं प्रसन्नां ॥
महेश्वरोऽभूच्च महेश्वरस्य प्रसादलब्धोदयबुद्धिवृद्धिः ।
तस्यात्मजो भास्करलब्धबोधः श्रीभास्कराचार्य्य इति प्रसिद्धः ॥
वेदोपवेदवेदाङ्गवेत्ता विश्वैककोविदः ।
गणितज्ञो गुणाग्रीयो गणनायां द्विजोत्तमः ॥
ब्रह्मादिर्जगदादिकालकलना पञ्चप्रकारागणिः
खेटानाञ्च सवासनाञ्च दिवि यद् गोलप्रपञ्चस्थितिः ।
यन्त्राणि द्विविधञ्च यन्त्रगणितं तेन क्रमाद्विस्तृतं
तत्सिद्धान्तशिरोमणौ तु कविना श्रीभास्करेण स्फुटं ॥
विष्णुस्वरूपं गणितं रहस्यं व्यक्तमिति द्विधा यतः+ + + ।
गुरुप्रसादाभ्यसनैर्विदित्वा + + +श्रीमान् महतोऽपि मोहात् ॥
अव्यक्तवीजभूतत्वाद् गणितं वीजसञ्ज्ञितं ।
व्यक्तञ्च पाटीगणितं प्राहुर्गणितवित्तमाः ॥
तत्र लीलावती नाम गणकोत्तमपाटिका ।
रचिता भास्करेणान्यपाटिकोक्तस्वरूपिणी ॥
श्रीयाज्ञवल्क्यमुनिवर्य्यकृतप्रतिष्ठं जम्बूसरो नगरमस्ति सुतीर्थरम्यं ।
धीमांस्तु वस्तुकुलजोऽत्र दिवाकर+ज्ञानाद्दिवाकर इति प्रथितो द्विजोऽभूत् ॥
श्रीगोवर्द्धनपादपद्मशरणेनान्तःपवित्रात्मवान्
सद्वृत्तः सुयशाः परोपकृतिकृद्दीने दयालुः कृती ।
श्रीगोवर्द्धनसञ्ज्ञितो द्विजवरः ख्यातोऽस्ति भूमण्डले-
+ + + + + + + + + + ॥
तत् सूनोरनुजो+ + धीमान् लक्ष्मीधरोऽङ्गुतात् ।
गङ्गाधरकृपालब्धो दयागङ्गाधराह्वयः ॥
तेन ख्यातदिवाकरात्प्रसुधिया विद्वत्सुखप्रीतिदा
सन्देहार्त्तिविनाशिनी गणकधीवृद्धिप्रदारभ्यते ।
श्रीगोवर्द्धननन्दनेन विमला लीलावतीपाटिका-
टीका चामृतसागरीति सरला गङ्गाधरेण स्फुटं ॥
श्रीभास्कराचार्य्य इष्टदेवताप्रणामपूर्व्वकमित्यादिः ।

End. लब्धं दीपोच्चमुभयतोऽपि तुल्यमेव १५६ हस्ताः १२, एवं पञ्चसप्तराशिकाद्यखिलं त्रैराशिकेन सिद्धं, सूचार्थं स्वयमेव निगदितं तथा तत्रोक्तमिति ।

Colophon. श्रीगणकगङ्गाधरकृता लीलावतीविवृतिः समाप्ता ।

विषयः । भास्कराचार्य्यकृतसिद्धान्तशिरोमण्यन्तर्गत-लीलावत्या व्याख्यानं ।

No. 1255. नाममाला ।

Substance, country-made yellow paper, 12 × 7 inches. Folia, 32. Lines, 25 on a page. Extent, 900 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose and verse. Generally correct.

Námamálá. A dissertation on the merits of repeating the names of Hari, Hara, &c. as a means of salvation. Author's name not known.

Beginning. यन्नामकीर्त्तनादेव सद्यः पापक्षयो भवेत् ।
तमहं संस्मरामीशं शिवं कृष्णं विमुक्तये ॥
ननु नामकीर्त्तनात् सद्यः पापक्षयप्रतिपादकमन्त्रार्थवादेतिहासपुराणोपपुराण-संहितागमादीनां कर्म्मानुष्ठानादिपराणां स्वार्थेऽपि प्रामाण्यं नास्तीति चेत्। इत्यादिः ।

End. तत्र क्षतिशयाधानं पूर्णत्वेनैव निराकृतं । माला-करणं वारयति निरञ्जन इति निर्म्मलः ।

Colophon. इति नाममाला ।

विषयः । हरिहरादिनामकीर्त्तनात् पापक्षयप्रतिपादकवाक्यानामपि मानान्तरसंवादवि-संवादयोरभावात् स्वार्थेऽपि प्रामाण्यमस्तीति मतसंस्थापनादिकं । अर्थवादवि-चारः । नामकीर्त्तनमाहात्म्यकथनं । हरिहरनाम्नां मोक्षसाधनज्ञानसाधनत्व-प्रदर्शनं । तेषां चतुर्व्वर्गसाधनत्वकथनञ्च । नामविशेषकीर्त्तने फलविशेष-कथनं । नाममाहात्म्यस्तोत्रकथनादिकं ।

No. 1256. मन्त्रमहोदधिः ।

Substance, country-made yellow paper, 12 × 7 inches. Folia, 122. Lines, 26 on a page. Extent 3,766 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Some parts have been destroyed by worms. Prose and verse. Generally correct.

Mantra-mahodadhi. A compendium of the various mystic formulas and mantras used in worshipping Hindu divinities, and the routine of worship. By Mahidhara, the commentator of the White Yajur Veda. The mantras are all taken from the Tantras, the ritual is throughout Tántric, and the writer evinces a leaning for the S'ákta cult, but the mantras of Vishṇu, Gaṇes'a, Gopála, &c. are all included in the work.

Beginning. प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुं ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिं ॥
प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजं ।
आवश्यकं विनिर्व्वर्त्य स्नातुं यायात् सरित्तटे ॥
श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत् ।
स्मार्त्तसन्ध्यां मन्त्रसन्ध्यां कृत्वा देवं विचिन्तयेत् ।
गृहद्वारमथागत्य द्वारपूजां समारभेत् ।
द्वारमस्त्राम्बुना प्रोक्ष्य गणेशं चोर्द्ध्वतो यजेत् ॥
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीं ।
पुनर्दक्षे यजेद्विघ्नं गङ्गाञ्च यमुनामपि ॥
पुनर्वामे क्षेत्रपालं ससिन्धुयमुने अपि ।
पुनर्दक्षे तु धातारं विधातारन्तु वामतः ॥ इत्यादिः ॥

End. प्रयोगानपि तत्रोक्तान् प्रकुर्य्यादिष्टसिद्धये ।
एवं यो भजते नित्यं श्रीमद्गोपालसुन्दरीं ।
सर्व्वान् कामानवाप्यान्ते सायुज्यं ब्रह्मणो व्रजेत् ॥

Colophon. इति श्रीमहीधरविरचिते मन्त्रमहोदधौ द्वाविंशस्तरङ्गः ॥ २२ ॥ हरये नमः ।

विषयः । प्रथमतरङ्गे ।—प्रातःकृत्यादिकथनपूर्व्वकं सामान्यतो भूतशुद्ध्यादिनिरूपणं । २ तरङ्गे ।—गणेशमन्त्रनिरूपणादिकं । ३ तरङ्गे ।—कालीसुमुखीमन्त्रादिकथनं । ४ तरङ्गे ।—तारामन्त्रादिनिरूपणं । ५ तरङ्गे ।—तारामन्त्रभेदकथनं । ६ तरङ्गे ।—छिन्नमस्तामन्त्रादिकथनं । ७ तरङ्गे ।—यक्षिण्यादिमन्त्रप्रजादिनिरूपणं । ८ तरङ्गे ।—बालालघुश्यामामन्त्रादिनिरूपणं । ९ तरङ्गे ।—अन्नपूर्णामन्त्रादिकथनं । १० तरङ्गे ।—वगलामुखीमन्त्रादिनिरूपणं । शकटाभिधमहाविद्याकथनं । फलादिनिरूपणञ्च । ११ तरङ्गे ।—श्रीविद्यादिनिरूपणं । १२ तरङ्गे ।—श्रीविद्यायाः परिवारपूजनादिप्रकारकथनं । १३ तरङ्गे ।—हनूमन्मन्त्रादिकथनं । १४ तरङ्गे ।—विष्णुमन्त्रादिनिरूपणं । १५ तरङ्गे ।—सूर्य्यादिमन्त्रादिनिरूपणं । १६ तरङ्गे ।—शिवादिमन्त्रनिरूपणादिकं । १७

तरङ्गे ।—कार्त्तवीर्य्यमन्त्रादिकथनं । १८ तरङ्गे ।—कालरात्रि-चण्डिकादि-मन्त्रकथनं । १९ तरङ्गे ।—ताम्रचूड़ादिमन्त्रकथनं । २० तरङ्गे ।—यन्त्रनिरूपणं । २१ तरङ्गे ।—नित्यपूजाप्रकारादिकथनं । २२ तरङ्गे ।—गोपालसुन्दर्य्यादिपूजादिनिरूपणं । (अत्र तरङ्गसङ्ख्यावैषम्यं दृश्यते) ।

No. 1257. पद्मपुराणीयसृष्टिखण्डः ।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 295. Lines, 20 on a page. Extent 7,006 s'lokas. Character, Bengali. Date, Sk. 1725. Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Very incorrect.

*Padma Puráṇa, Srísh*ṭ*i Khaṇḍa.* The Padma is the second of the eighteen great Puráṇas; it comprises 55,000 s'lokas, divided, according to its own statement, into five khaṇḍas or parts, each of which may be looked upon as a separate work. A sixth part, the *Kriyáyogasára* is usually added, and it is, perhaps, the most popular of all, being met with more frequently than the others (*ante* p. 113), but as it is not included in the abstracts of the different Puráṇas given in the Nárada Puráṇa, it is obvious that it originally formed no part of the Padma Puráṇa, and can only be looked upon as an apocryphal work; in fact according to native opinion this and the Brahma-vaivarta are the least trustworthy of Puráṇas. Professor Wilson has published a detailed account of the whole of the Padma Puráṇa (*Journal R. A. S.*, V. pp. 280 *et seq. Miscellaneous Essays*, I, pp. 21 *et seq.* Preface to the Vishṇu Puráṇa, pp. xxix *et seq)*; and the following is his remark on the character of the part (the first) under notice:—

"The Paushkara, or *Sr'ish'ti Khaṇḍa* consists of forty-six chapters and about 8500 stanzas. Lomaharshaṇa, the disciple of Vyása, sends his son Ugras'ravas the Súta to Naimisháran'ya, to relate the Puráṇas to S'aunaka and other R'ishis assembled at that place. At S'aunaka's request he communicates to them that Purána, which, from its containing an account of the lotus (Padma), whence Brahmá appeared in order to create the world, is termed the Pádma Puráṇa. Súta, in replying, proclaims also his right by birth and profession to narrate the Puráṇas, which were in the present Kalpa imparted by Vishṇu in

the Matsya avatára to Brahmá, and by him to the gods in the first instance, and in the second to Lomaharshaṇa, by Vyása, who was a form of Brahmá. We have here also the assertion that the Puráṇas consisted originally of 100 kot'ís, a thousand million of stanzas, of which 400,000 were thought sufficient for the instruction of man—the rest being preserved by the gods. Súta then recapitulates all that he purposes to narrate to the R'ishis, the whole of which he says was formerly imparted by Brahmá to his will-begotten son, the patriarch Pulastya, by whom it was related at Gañgádwára to Prince Bhíshma; in fact, therefore, Pulastya is the person to whom this portion of the Pádma Puráṇa is properly to be ascribed."

It may be noted here that, for reasons already referred to in different parts of these "Notices," I do not subscribe to the date assigned to the different Puráṇas by the learned Professor. The fact of the extent of the whole work, 55,000 verses, being noticed by Chand in the 12th century, is of itself enough to show that the work existed long before that poet. Quotations from the work are frequently met with in works of the 9th, 10th and 11th centuries. I should add, however, that the work has been very carelessly preserved, and there are unmistakable interpolations in different parts of it.

Beginning. स्वस्थं चन्द्रावदातं करिकरमकरक्षोभसञ्जातफेनं
ब्रह्मोद्भूतं प्रसक्तैर्व्रतनियमपरैः सेवितं विप्रमुख्यैः ।
ॐकारालङ्कृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टिपूतं
सम्भोगाभोगरम्यं जलमशुभहरं पौष्करं वः पुनातु ॥

सूतमेकान्तमासीनं व्यासशिष्यं महामतिं ।
लोमहर्षणनामा वै उग्रश्रवसभाषत ॥
ऋषीणामाश्रमांस्तात गत्वा धर्म्मान् समासतः ।
पृच्छतां विस्तराद् ब्रूहि यन्मत्तः श्रुतवानसि ॥ इत्यादिः ।

End. ततस्तु दानवा भीष्मा ऊचुः सर्व्वगुरुं वचः ।
दीचास्तु च महाभाग भूतः कालाग्रतःस्थितान् ॥
तथाह्लत्वोषना + ह समता + पुरोहितः ।
प्रमाणं वान्यदेवेषु कर्त्तव्यं न कदाचन ॥
एकस्य चैव + भक्तं भोक्तव्यं कर + पुटैः ।

Colophon. इत्यादिमहापुराणे पाद्मे सृष्टिखण्डः समाप्तः ।

विषयः। शरद्युग्मागेन्दुशाके वृषराशौ महीतुते।
सम्पूर्णं स्यात् पूर्व्वभाद्रपदे कृष्णतृतीयके॥

१ प्रथमाध्याये,—सूतेन सह ऋषीणां संवादः। सूतस्य जन्मादिविवरणं। पुराणावतारविवरणञ्च।

२ अ॰,—प्रतिसञ्चारादिकथनप्रश्नः। अष्टाङ्गार्घ्यकथनं। ब्रह्मपुलस्त्यसंवादः। पुलस्त्यभीष्मयोः संवादः। महत्तत्त्वादिसृष्टिप्रकारकीर्त्तनं।

३ अ॰,—कालपरिमाणादिकथनं। पृथ्वीकृतवराहस्तुतिः। चतुर्व्विधसृष्टिकीर्त्तनं। विशेषेण ब्राह्मणक्षत्रियादीनामुत्पत्तिकथनं। तेषामाचारादिकथनं। ब्रह्मणो भृगुपुलस्त्यप्रभृतिनवसङ्ख्यकमानसपुत्रसर्ज्जनादिकथनं। पुष्टितुष्टिमेधादीनां पुत्रादिकथनं। शिवस्य अष्टमूर्त्तिस्थानादिकथनं।

४, ५ अ॰,—ख्यातिगर्भजाताया लक्ष्म्याः समुद्रकन्यात्वप्राप्तिविवरणं। दुर्व्वासस इन्द्रं प्रति शापदानादिवृत्तान्तः। समुद्रमन्थनविवरणं। नारदकृतविष्णुस्तोत्रं। सतीकृतदक्षयज्ञवर्णनं। सतीपुरतो दक्षस्य शिवनिन्दादिकरणं। सतीदेहत्यागः। दक्षकृतशिवस्तुतिः।

६, ७ अ॰,—दक्षप्रजापतेर्व्वंशकथनं। वस्वादीनामुत्पत्तिकथनं। काश्यपानामुत्पत्तिकीर्त्तनादिकं। ज्येष्ठपूर्णिमाव्रतविधानादिकथनं। गर्भिण्या नियमादिकथनं। ऊनपञ्चाशन्मारुतानामुत्पत्तिः। मन्वन्तरवर्णनं।

८, ९ अ॰,—पृथिवीनामनिर्व्वचनं। पृथोरुपाख्यानं। सावर्णिकमनोरुत्पत्तिकथनादिकं। यमयमुनयोरुत्पत्तिकथनं। यमस्य तपस्यादिवर्णनं। मनुवंशकीर्त्तनं। इलोपाख्यानं। सूर्य्यवंशकथनं। पितृवंशकथनं। नर्म्मदाया उत्पत्तिकथनं। श्राद्धे वर्ज्यावर्ज्यकथनं। श्राद्धविधानं। मन्वन्तरकथनं। साधारणादिश्राद्धभेदकथनं।

१०, ११ अ॰,—एकोद्दिष्टश्राद्धविधिः। मृताहे पार्व्वणनिषेधः। विश्वामित्रपुत्राणामुपाख्यानं। योगिनां चक्रवाकत्वप्राप्तिकथनादिकं। पिपीलिकोपाख्यानं। त्रिधिधर्म्मविन्दुजातपुरुषभयात् शिवस्य विष्णुभवनपलायनादिविवरणं। अर्ज्जुनस्य त्रिपुरुषजातत्वविवरणकीर्त्तनं। नरनारायणसम्भवकथनादिकं। बालिसुग्रीवप्रभृतीनां जन्मकारणादिकीर्त्तनं। गार्हपत्यादिवह्निविवरणं। ब्रह्ममुखाद् वेदप्रवृत्तिकथनं। ब्रह्मशिरश्छेदनादिकथनं।

१२ अ॰,—ब्रह्मणो यज्ञानुष्ठानविवरणं। तेन सह तरूणां संवादः। पुष्करतीर्थोत्पत्तिविवरणं। ब्राह्मी दीक्षा। म्लेच्छादीनामपि पुष्करतीर्थे मरणे ब्रह्मलोकावाप्त्यादिकथनं। आश्रमधर्म्मकथनं। गोपकुमारीवेशधारिण्या कयाचित् कामिन्या सह इन्द्रस्य संवादः। गायत्रीतिसमाख्यया तया सह ब्रह्मणो विवाहकथनं।

विषयः। १३ अ०,—ब्रह्मयज्ञानुष्ठानकाले (युष्माकं कुले ऽवतरिष्याम्यहं) इति गोपान् प्रति विष्णोर्वरदानविवरणं। तत्र कपर्दिना सह ब्राह्मणानां संलापः। सावित्रीगृहे लक्ष्मीसतीप्रभृतीनामागमनविवरणकथनं। इन्द्रोपेन्द्रादीन् प्रति सावित्र्याः शापदानकथनं। लक्ष्मीसत्यादिकमुद्दिश्य तथा तस्याः शापदानञ्च। विष्णुकृतदुर्गाशतनामस्तोत्रकीर्त्तनं। कार्त्तिकपौर्णमास्यां ब्रह्मपूजनादिफलकथनं।

१४, १५, १६, १७ अ०,—सरस्वतीमाहात्म्यं। उत्तर-पश्चिमवाहिन्योर्गङ्गासरस्वत्योर्विशेषेण माहात्म्यकीर्त्तनं। ज्येष्ठकुण्डमाहात्म्यादिकथनं। सरस्वत्या नन्देतिनामकारणकथनं। राज्ञा सह हरिण्याः संवादः। तत्प्रति तस्याः शापदानं। व्याघ्ररूपेण तेन सह नन्दायाः सवत्सायाः संवादः।

१८ अ०,—पुष्करतीर्थस्य परिमाणादिकथनं। कालेयेतिनामधेयदानववृन्दविप्रकृतानां देवादीनां चेष्टादिवर्णनं। अगस्त्यविन्ध्ययोरुपाख्यानं। अगस्त्यस्य समुद्रपानविवरणं। तत्र स्थितैः कालेयसञ्ज्ञकैः दानवैः सार्द्धं देवानां युद्धवर्णनं। अगस्त्यकुण्डमाहात्म्यकथनं। सप्तर्षीणामाश्रमकथनं। दानदमादिप्रशंसा। अनृतक्रोधादिनिन्दनं। कात्यायनजमदग्निप्रभृतीनां विषस्तोत्रकथनं।

१९, २० अ०,—लावण्यवतीपुष्पप्रवाहयोरुपाख्यानं। तालव्रत-प्रीतिव्रत-गौरीव्रत-सरस्वतीव्रतप्रभृतिनानाविधव्रतविधानं। धर्म्मनित्यमहिष्या भानुमत्याः पुरतः वशिष्ठस्य लक्ष्मीलाभोपायकथनादिकं। लीलावतीतिनामधेयाया वेश्याया उपाख्यानं। विशोकद्वादशीव्रतविधानं। गुड़धेनुक्षीरधेनुसुवर्णधेनुदानप्रभृतिव्रतकथनं। लवणाचल-धान्याचलादिदानविधानं। सौरव्रतविधानं। सकलसप्तमीसंसारसप्तमीप्रभृतिव्रतविधानञ्च।

२१, २२ अ०,—अगस्त्यस्य जन्मादिविवरणं। अनन्तफलदतृतीयाव्रतविधानं। गौरीव्रतादिविधानं। द्वारकायाः कुशस्थलीतिपूर्व्वनामकथनं। भगवतो द्वैपायनरौहिणेय-कृष्णेति त्रिविधावतारप्रयोजनादिकीर्त्तनं। भीमद्वादशीविवरणं। नारायणमेव पतित्वेन लब्धुं नारीणां तपस्यादिवर्णनं। मन्मथव्रतविधानं। भार्गवविरोचनसंवादकीर्त्तनं। अङ्गारकचतुर्थीव्रतविधिः।

२३, २४, २५ अ०,—आदित्यशयनकथनं। तड़ागारामकूपादिप्रतिष्ठादौ वेद्यादिनिर्म्माणविधिः। रोहिणीचन्द्रशयनव्रतविधानं। तड़ागादिप्रतिष्ठाविधिः। अश्वत्थादिवृक्षरोपणादिविधिः। सौभाग्यशयनव्रतविधिः। वसन्तशुक्लतृतीयायां शिवाशिवयोर्विवाहोत्सवविधिकीर्त्तनं।

२६, २७ अ०,—भगवतो वामनलीलादिवर्णनं। विष्णुपदोत्पत्तिविवरणं। नागतीर्थकथनं। ब्रह्मनागगणसंवादः। सर्पभयनिराकरणोपायकथनं। हरनामक-

दैत्येन सह देवानां युद्धवर्णनं। शिवदूत्या आविर्भावादिविवरणं। केन कर्म्मणा प्रेतत्वमुपजायते तत्कथनादिकं।

२८ अ॰,—मार्कण्डेयोत्पत्तिविवरणं। अत्रिणा सह राघवस्य समागमवृत्तान्तादिकथनं। रामचन्द्रस्य स्वप्नविवरणं। स्वप्ने दृष्टस्य मृतस्य श्राद्धकर्त्तव्यता। ब्राह्मणभोजनकाले सीताया अपमानवृत्तान्तकीर्त्तनं। रामचन्द्रादीनां पुष्करतीर्थगमनकथनं। श्रीरामकृतशङ्करस्तोत्रं। मार्कण्डेयाश्रमवर्णनं।

२९, ३० अ॰,—यज्ञानुष्ठानकाले ब्रह्मणा प्रेरितस्य विष्णोः सावित्रीसमीपगमनवृत्तान्तकथनं। सावित्र्या सह गौर्य्यादीनां कथोपकथनं। विष्णुकृतब्रह्मस्तुतिः। क्षेमङ्कर्य्या उत्पत्तिकथनादिकं। पञ्चपातकनाशनादिकथनं। वशिष्ठश्वेतराजसंवादः। विनीताश्वराजोपाख्यानं। ब्रह्माण्डदानविधानं। दैत्यसैन्यवर्णनं।

३१, ३२, ३३ अ॰,—दानवैः सह देवानां युद्धवर्णनं। और्व्वस्य जननादिविवरणं। वज्राङ्गकृतशत्रुबन्धनकथनं। तारकासुरजन्मकीर्त्तनं। सुरतारकयोः सङ्ग्रामवर्णनं। देववृन्दकृतब्रह्मस्तोत्रं। विभावरीब्रह्मसंवादः। पार्व्वत्या उत्पत्तिकथनादिकं। नारदहिमालयसंवादः। पिनाकपाणेः समाधिभङ्गाय कुसुमशरस्य प्रयाणादिवर्णनं। रतिकृताशुतोषस्तवनादिकं। पार्व्वत्यास्तपस्यादिवर्णनं। गौरीविवाहकथनं। पार्व्वतीगात्रमलात् गणानामुत्पत्तिकथनं।

३४, ३५, ३६ अ॰,—कुमारसम्भवकथनं। पितृमाहात्म्यकथनं। केदार-गङ्गासागर-ब्रह्मसरः-कुरुक्षेत्र-रामेश्वरप्रभृतितीर्थकथनं। श्राद्धकालनिरूपणादिकं। सोमोत्पत्तिकथनं। ताराहरणविवरणं। राजपुत्रापराभिधेयस्य बुधस्य जन्मादिकथनं। यदुवंशकथनं।

३७ अ॰,—क्रोष्टुवंशवर्णनं। मायामोहकर्तृकदैत्यमोहनवृत्तान्तकीर्त्तनं। मणिहरणोपाख्यानं। चार्व्वाकमतसूत्रपातः। कृष्णादीनां जन्मकथनादिकं। सङ्क्षेपेण दशावतारप्रयोजनकीर्त्तनं। शुक्रस्य तपस्यादिकथनं। इति समाप्तिः।

No. 1228. कथासरित्सागरसारः।

Substance, country-made paper, 14 × 6 inches. Folia, 914. Lines 30 on a page. Extent, 27,420 s'lokas. Character, Bengali. Date, Samvat 1682. Place of deposit, S'rírámpur College. Appearance, new. Verse. Incorrect.

Kathásaritságara alias *Vrihatkathá-ságara*, or *Vṛihatkathá.* "The Watery Ocean of Stories," a large collection of entertaining stories.

By Bhaṭṭa Somadeva. The character of this work is already well known to European scholars through the notices published by Wilson and others; and the whole of the text has been brought out, partly in Sanskrit and partly in Roman type, by the learned Professor Weber (*Abhandlungen* II to IV.); it is not necessary therefore to enter at length into its history. The headings of the stories are given below in Sanskrit. The MS. is dated Samvat 1682, and is nearly two hundred and fifty years old.

Beginning. श्रियं दिशतु वः शम्भोः श्यामः कण्ठो मनोभुवा ।
अङ्कस्थपार्व्वतीदृष्टिपाशेनेव विचेष्टितः ॥
सन्ध्यानृत्योत्सवे धारा + + + डूय विघ्नजित् ।
शीत्कारशीकरै रत्याः सत्पयन्निव पातु वः ॥
प्रणम्य वाचं निःशेषपदार्थद्योतदीपिकां ।
बृहत्कथासागरस्य सङ्ग्रहं रचयाम्यहं ॥
आद्यमत्र कथापीठं कथामुखमतः परं ।
ततो लावणको नाम तृतीयो लम्बको भवेत् ॥
नरवाहनदत्तस्य जननञ्च ततः परं ।
स्याच्चतुर्द्दारिका चाथ ततो मदनमञ्जुका ॥
ततो रत्नप्रभा नाम लम्बकः सप्तमो भवेत् ।
सूर्य्यप्रभाभिधानश्च लम्बकश्चाष्टमो भवेत् ॥
अलङ्कारवती नाम ततः शक्तियशा भवे ।
वेलालम्बकसञ्ज्ञश्च भवेदेकादशस्ततः ॥
शशाङ्कवत्यपि ततस्ततश्च मदिरावती ।
महाभिषकनामा च ततः स्यात् पञ्चलम्बकः ॥
ततः सुरतमञ्जर्य्यप्यथ पद्मावती भवेत् ।
ततो विषमशीलाख्यो लम्बकोऽष्टादशो भवेत् ॥
यथा मूलं तथैवैतन्न मनागप्यतिक्रमः ।
ग्रन्थविस्तरसङ्क्षेपमात्रं भाषा च विद्यते ॥
औचित्यान्वयरक्षा च यथाशक्त्या विधीयते ।
यथा रसाभिघातेन काव्यांशस्य च योजना ॥
वैदग्ध्यख्यातिलोभाय मम नैवायमुद्यमः ।
किन्तु नानाकथाजालस्मृतिसौकार्य्यसिद्धये ॥ इत्यादिः ।

End. एवं मद्वचनोद्गतां पठति यो यो वा शृणोत्यादराद्
यश्चैतां + कथां बिभर्त्ति न चिरात् सोऽध्वस्तपापः कृतः ।
सद्विद्याधरतामवाप्य नियतं लोकं मम प्राप्नुयाद्-
इत्यस्याश्च वरं तदा गिरिसुता कान्तः कथा + ददौ ॥

Colophon. इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे विषमशीललम्बके पञ्चमस्तरङ्गः ॥
आदितश्चतुर्विंश + रशतं, समाप्तश्चायं बृहत्कथासागरसङ्ग्रहः ॥
इदं गुरुगिरीन्द्रजाप्रणयमन्दरान्दोलनात्
पुरा किल कथामृतं हरमुखाम्बुधेरुद्गतं ।
प्रसह्य रसयन्ति ये विगतविघ्नलब्ध + यो
धुरन्दधति वैबुधीं भुवि भवप्रसादेन ते ॥०॥
श्रीसातवाहनकुलाम्बुधिपारिजातः सङ्ग्रामराज इति भूमिपतिर्बभूव ।
येनावतीर्य्य विविधैर्विबुधैः श्रितेन काश्मीरमण्डलमनीयत नन्दनत्वं ॥०॥
तस्यात्मजो + + शेषमहीशमौलिमाणिक्यरत्ननिकषीकृतपादपीठः ।
श्रीमाननन्त इति तत् + + + + + + शौर्य्यैकराशिरुदपद्यत चक्रवर्त्ती ॥०॥
द्वाराग्रसीमनि च यस्य विकृत्तकण्ठः चित्रोदरं नरपतेर्लुठति स्म मूर्द्धा ।
सेवागतो जितमहाहरिचक्रचारु—कीर्त्तिः शरेण परितोषमिवैत्य राज्ञः ॥
सोऽथ त्रिगर्त्ताधिपतेस्तनूजां राजेन्दु + + वहति स्म देवीं ।
तमोपहां सूर्य्यवत् + प्रजानां विभातसन्ध्यामिव विश्ववन्द्यां ॥
(आम्नायैरिव नानादेशसमुद्गतविप्रशतसेव्यैः,
अ + भिरिव रत्नस्त + + + ति भृतां भूभृतामपि शरण्यैः ।
कल्पद्रु + रिवान्वाहमाशेयगतार्त्तिहारिभिरुदारैः,
देव्या यया विरचितैः काश्मीरमण्डितमठप्रवरैः ।)
यत्र + सितान्यमलतोयबृहद्वितस्ता विस्तीर्णतीरभुवि सौधसुधासितानि ।
व्योमापगा परिगतान्तहिमाद्रिशृङ्ग + + + + + + सुतरां सुरमन्दिराणि ॥०॥
द + रसह्यमणिहेमसहाश्वहार—कृष्णाजिनद्रविणपर्व्वतगोसहस्रः ।
विश्वम्भरा रचना + पिष्ट + + + विश्वं सदा भगवती किल या बिभर्त्ति ॥
क्ष्मामण्डलैकतिलकोऽप्यनली + + म—यस्याननान्यतमपो गुणि + + + + ।
+ + शिवोऽपि शिवावतारः श्रीमान् सुतः कलसदेव इति क्षितीशः ॥
उर्व्वीभृतो नमयितुं निखिलानुदग्रान् या + चमस्वजलधीनपि सप्त धीरः ।
सृष्टः सुरैरभिनवः कलसोद्भवो यः श्रीहर्षदेव इति नप्तृवरः स यस्या ॥
तस्याः सदैव गिरिशार्च्चनहोममकर्म्म—यानप्रधानविधिबद्धसमुद्यमायाः ।

शास्त्रेषु नित्यविहितश्रवणश्रमाया देव्याः क्षणं कमपि चित्तविनोदहेतोः॥
नानाकथामृतमयस्य बृहत्कथायाः सारस्य सज्जनमनोऽम्बुधिपूर्णचन्द्रः।
सोमेन विप्रवरभूरिगुणाभिरामरामात्मजेन विहितः खलु सङ्ग्रहोऽयं॥
(प्रविततनरभङ्गिकथासरित्सारा + × + विरचितोऽयं।)
सोमेनामलरुचिना हृदयानन्दाय भवतु सताम्॥

संवत्॥ १६८२॥ भाद्र २४॥

विषयः। १ पीठलम्बकस्य प्रथमतरङ्गे,—अनुक्रमणिका। कैलासगिरिवर्णनादिप्रस्तावः। २ त०,—वररुचिभूतपुष्पदन्तस्य काणभूतिप्राप्तिविवरणं। वर्षाचार्य्यकथा च। ३ त०,—काणभूतिं प्रति वररुचिवाक्यं। ४ त०,—वररुचेरात्मपत्नीत्राणाद्विवरणं। ५ त०,—योगानन्दशकटारयोरुपाख्यानादिकं। ६ त०,—गुणाढ्यस्य विन्ध्यवासिनीस्थानगमनादिवृत्तान्तः। ७ त०,—सर्व्ववर्म्माणं प्रति कार्त्तिकेयप्रसादकथनं। व्याकरणोत्पत्त्यादिप्रश्नः। ८ त०,—गुणाढ्यस्य काणभूतिप्रमुखात् कथाश्रवणपुरःसरं पैशाचभाषया ग्रन्थशतरचनादिप्रस्तावः। इति पीठलम्बकः समाप्तः॥ १॥

२ कथामुखलम्बकस्य प्रथमतरङ्गे,—ग्रन्थप्रशंसानन्तरं विद्याधरकथाप्रकाशानुक्रमणिकादिवर्णनं। २ त०,—सहस्रानीकस्य मृगावत्यन्वेषणार्थं गमनादिप्रस्तावना। ३ त०,—तस्य पुनः उदयनाभिधेयपुत्रराज्याभिषेकविवरणं। ४ त०,—वासवदत्ताविवाहार्थं वत्सराजानयनाय महागजप्रेरणादिविवरणं। ५ त०,—वत्सराजस्य बन्धनं। तं प्रति वासवदत्ताया अनुरागादिवर्णनञ्च। ६ त०,—तया सह वत्सेशस्य विवाहादिवर्णनादिकं। इति कथामुखलम्बकः समाप्तः॥ २॥

३ लावणकलम्बकस्य प्रथमतरङ्गे,—मगधेशदुहित्रा पद्मावत्या सह वत्सराजस्य विवाहार्थं यौगन्धरायणरुमण्वतोर्वासवदत्ताकृत्रिमदाहमन्त्रणादिकीर्त्तनं। २ त०,—पद्मावतीं भर्त्तुर्वक्ष्मतां निर्व्वर्ण्य वासवदत्तायाः प्रकृताग्निप्रवेशकरणनिश्चयादिविवरणं। ३ त०,—उर्व्वश्या सह पुरूरवसः सङ्गमनविवरणं। विहितसेनस्य राज्ञ उपाख्यानं। पाटलिपुत्रस्थधर्म्मगुप्तादीनामुपाख्यानं। ४ त०,—वत्सराजस्य कौशाम्बीप्रवेशविवरणं। गोपालकसंवादः। आदित्यसेनादीनामुपाख्यानं। विदूषकस्य विवाहः। ५ त०,—देवदासादीनामुपाख्यानं। वत्सराजदिग्विजयवर्णनं। ६ त०,—अग्निदत्तपुत्रादीनामुपाख्यानं। कार्त्तिकेयजन्मविवरणं। सुन्दरकोपाख्यानं। इति लावणकलम्बकः समाप्तः॥ ३॥

४ नरवाहनदत्तजननलम्बकस्य प्रथमतरङ्गे,—वत्सराजस्य चक्रवर्त्तित्वेन पृथिव्युपभोगवर्णनादिकं। तेन सह नारदस्य संवादः। २ त०,—जीमूतवाहनस्य उपा-

विषयः। ख्यानं। वासवदत्ताया गर्भवृत्तान्तः। ३ त०,—वासवदत्तायाः स्वप्नवृत्तान्तः। विक्रमचण्डाख्यकाशीराजस्य उपाख्यानं। नरवाहनस्य जन्मादिविवरणं।
इति नरवाहनदत्तजननलम्बकः समाप्तः।

५ चतुर्दारिकालम्बकस्य प्रथमतरङ्गे,—कनकरेखाया उपाख्यानं। बालकभद्रकस्य उपाख्यानं। २ त०,—राजकन्यालाभार्थं वर्द्धमानपुरात् कनकपुरीं प्रति प्रस्थितस्य सत्यव्रतस्य उपाख्यानं। गोविन्दस्वामिन उपाख्यानं। नूपुरानयनार्थमशोकदत्तस्य श्मशानगमनादिविवरणं। ३ त०,—अर्णवमार्गेण गच्छतोः सत्यव्रतशक्तिदेवयोरावर्त्तमध्ये प्रवहणनिमज्जनाद् वृत्तमेकमन्वासाद्य लब्धजीवितयोः पक्षिसाहाय्येन अभीष्टस्थानगमनादिवृत्तान्तकथनं। इति चतुर्दारिकालम्बकः समाप्तः।

६ मदनकञ्चुकालम्बकस्य प्रथमतरङ्गे,—नरवाहनदत्तस्य विद्याभ्यासादिकथनं। तक्षशिलाधिपस्य कलिङ्गदत्तस्य उपाख्यानं। २ त०,—चित्रकूटाधिपतेः सुषेणस्य उपाख्यानं। कलिङ्गसेनाया उपाख्यानं। ३ त०,—कलिङ्गसेनासमीपे सोमप्रभाया निजपूर्व्वजन्मवृत्तान्तकीर्त्तनं। ४ त०,—कलिसेनां पश्यतो मदनवेगाख्यविद्याधरकिशोरस्य चेष्टावर्णनादिकं। स्वभर्त्तुः प्रवयस्तया दुःखितायाः सोमप्रभायाः प्रमुखात् वत्सराजगुणान् आकर्ण्य कलिङ्गसेनायास्तं प्रति अनुरागादिकीर्त्तनं। विक्रमादित्योपाख्यानं। ५ त०,—पित्रा अन्यस्मै प्रदेयामात्मानं निश्चित्य तस्याः सोमप्रभया सह कौशाम्बीगमनोपायादिचिन्तनं। उषानिरुद्धयोरुपाख्यानं। ६ त०,—यौगन्धरायणोद्योगेन तया सह वत्सराजस्य विवाहप्रस्तावादिकथनं। ७ त०,—वासवदत्तापद्मावत्यादीनां वत्सराजेन समं संलापः। गोकर्णाधिपस्य श्रुतसेनस्य उपाख्यानं। ८ त०,—निशीथसमये कलिङ्गसेनासमीपे उपस्थितस्य वत्सेशस्य तया सार्द्धं कथोपकथनादिकं। इन्द्रदत्तस्य उपाख्यानं। नरवाहनदत्तस्य यौवराज्याभिषेकः। मदनकञ्चुकाया रूपं निरीक्ष्य तस्य चेष्टादिवर्णनं। तया सह तस्य परिणयवर्णनञ्च। इति मदनकञ्चुकालम्बकः समाप्तः॥

७ रत्नप्रभालम्बकस्य प्रथमतरङ्गे,—एकदा उपवनं गतस्य नरवाहनस्य समीपे अशोकपादपमूलस्थिताया अदृष्टचरायाः कामिन्या निजपरिचयदानविवरणं। हेमप्रभनामकविद्याधरस्य उपाख्यानं। विक्रमतुङ्गराजस्य उपाख्यानं। रत्नप्रभया सह नरवाहनस्य विवाहः। २ त०,—रत्नकूटद्वीपाधिपतेरुपाख्यानं। ३ त०,—उज्जयिनीस्थवणिक्कुमारस्य उपाख्यानं। ४ त०,—पाटलिपुत्रस्थविक्रमादित्यस्य उपाख्यानादिकं। ५ त०,—वर्द्धमानपुरस्थवीरभुजन्टपस्य उपाख्यानादिकथनं। ६ त०,—यौगन्धरायणपुत्रेण मरुभूतिना सह गोमुखनामधेयस्य वत्सराजमन्त्रिणो वाक्कलहवर्णनं। प्रतिष्ठानपुरस्थस्य तपोदत्तनामकद्विजस्य उपाख्यानादिकथनं।

विषयः। ७ त०,—चिरायुरिति नामकस्य राज्ञ उपाख्यानादिकीर्त्तनं। ८ त०,—मृगयार्थं वनप्रविष्टेन नरवाहनदत्तेन सह तापस्याः संवादः। कर्पूरिकाया उपाख्यानं। ९ त०,—गोमुखसमीपे नरवाहनदत्तस्य स्वप्नवृत्तान्तकथनं। स्वप्नदृष्टदेशमुद्दिश्य चलितस्य गोमुखमात्रसहायस्य तस्य पुरतः पथिककर्तृकं काञ्चीपुरस्थबाहुबलनामकभूपालस्य उपाख्यानादिकीर्त्तनं। कर्पूरिकापरिणयानन्तरं पुनस्तस्य स्वदेशागमनविवरणं। इति रत्नप्रभालम्बकः समाप्तः॥

८ सूर्य्यप्रभालम्बकस्य प्रथमतरङ्गे,—वज्रप्रभनामकविद्याधरस्य उपाख्यानादिकथनं। चीनदेशाधिपतिपौरवनामकनृपतेः कन्याया वीरभटादिराजकुमारीणाञ्च उपाख्यानं। २ त०,—चन्द्रप्रभस्य राज्ञः पुरतो भूमिं विदार्य्य मयासुरस्य उद्गमनविवरणं। सूर्य्यप्रभ-सुनीथप्रभृतीनामुपाख्यानं। ३ त०,—सूर्य्यप्रभाय प्रह्लादस्य यामिनीनामिकाकन्यादानविवरणं। ४ त०,—श्रुतशर्म्माणमभियोधयितुं मयेन सह सूर्य्यप्रभस्य प्रयाणवर्णनं। ५ त०,—तयोर्युद्धविवरणं। ६ त०,—उज्जयनीस्थमहासेनस्य राज्ञ उपाख्यानादिकीर्त्तनं। ७ त०,—महादेवाज्ञया तयोः सन्धिकरणपुरःसरं सूर्य्यप्रभश्रुतशर्म्मणोः स्वस्थानगमनादिविवरणं। सूर्य्यप्रभस्य कामचूड़ामणितनयापाणिग्रहणादिवृत्तान्तकथनं। इति सूर्य्यप्रभालम्बकः समाप्तः॥

९ अलङ्कारवतीलम्बकस्य प्रथमतरङ्गे,—महारण्यमध्ये नरवाहनदत्तस्य दिव्यवीणारवोन्मिश्रसङ्गीतश्रवणविवरणं। श्रीसुन्दरपुरवासिनोऽलङ्कारशीलनामकविद्याधरस्य उपाख्यानं। अलङ्कारवत्या सह नरवाहनस्य विवाहः। २ त०,—पितुरनुज्ञया वसन्तकेन समञ्चालङ्कारवत्या तस्य श्वशुरालयगमनादिविवरणं। ३ त०,—लक्षपुरस्थस्य लक्षदत्तनामकस्य नृपस्य उपाख्यानं। विक्रमपुरस्थविक्रमतुङ्गनरपतेरुपाख्यानादिकथनं। ४ त०,—नारिकेलद्वीपवासिनां रूपसिद्धिप्रमाणसिद्धिप्रभृतीनामुपाख्यानं। ५ त०,—कनकपुराधिपतेरुपाख्यानादिकं। ६ त०,—कमलपुराधिवासिचन्द्रस्वामिद्विजस्य उपाख्यानं। सुरपुराधिनाथस्य शूरसेनस्य उपाख्यानादिकथनं। इति अलङ्कारवतीलम्बकः समाप्तः॥

१० शक्तियशोलम्बकस्य प्रथमतरङ्गे,—उदयनराजनामाङ्कितरत्नकटकापहारवृत्तान्तकथनं। पाटलिपुत्रस्थशुभदत्तनामकवाहकस्य उपाख्यानं। चित्रकूटनगरस्थरत्नवर्म्मनामकधनपतेरुपाख्यानं। २ त०,—प्रतिष्ठानगराधिपतेः विक्रमसिंहस्य उपाख्यानं। बलवर्म्मण उपाख्यानादिकीर्त्तनं। ३ त०,—नरवाहनस्य अकस्माद् विद्याधरीगणदर्शनविवरणं। काञ्चनपुरीमहीन्द्रस्य सुमनस उपाख्यानादिकथनं। ४ त०,—शूरवर्म्मण उपाख्यानं। पिङ्गलनामकसिंहस्य उपाख्यानादिकथनं। ५ त०,—वाणिजकपुत्रस्य मुग्धबुद्धेरुपाख्यानं। लघुपातीतिनामककाकस्य उपा-

विषयः। ख्यानं। अजागरस्य उपाख्यानादिकथनञ्च। ६ त०,—काकराजस्य मन्त्रिणाम् उड्डि-याड्डिप्रभृतीनामुपाख्यानं। ७ त०,—यशोधरलक्ष्मीधरनामकयोः यमजयोः सहोदरयोरुपाख्यानं। ८ त०,—देवशर्म्मण उपाख्यानं। घट-कर्पटनामकयोश्चौरयोरुपाख्यानादिकं। ९ त०,—पित्रा निराकृतस्य सभार्य्यस्य कस्यचिद् वणिज उपाख्यानं। वज्रवेगाभिधानविद्याधरस्य उपाख्यानादिकथनं। १०त०,—काश्मीरीयविजयक्षेत्रस्थस्य परिव्राजकस्य उपाख्यानं। दक्षिणापथस्थस्य पृथ्वीपतेरुपाख्यानं। हेमप्रभाप्रव्राजिकयोरुपाख्यानं। इति शक्तियशोलम्बकः समाप्तः॥

११ वेलालम्बकस्य प्रथमतरङ्गे,—रुचिरदेव-पोतकयोरुपाख्यानं। चन्द्रसारस्य उपाख्यानं। इति वेलालम्बकः समाप्तः॥

१२ शशाङ्कवतीलम्बकस्य प्रथमतरङ्गे,—नरवाहनदत्तस्य अद्भुतस्वप्नदर्शनवृत्तान्तकथनं। कान्यकुब्जस्थशूरदत्तनामकद्विजतनयस्य उपाख्यानं। ललितलोचनया सह नरवाहनस्य विवाहः। २ त०,—अयोध्याधिपस्य मृगाङ्कदत्तस्य उपाख्यानं। ३ त०,—विसूचिकारोगाक्रान्तस्य अमरदत्तस्य पुत्रकृतोऽयमभिचार इति मन्यमानस्य निजतनयमृगाङ्कदत्तनिर्व्वासनादिविवरणं। निर्व्वासितस्य मृगाङ्कदत्तस्य शशाङ्कवतीं प्रति अनुरागादिवर्णनञ्च। ४ त०,—शशाङ्कदत्तस्य जलमानुषहृतशावरभूपालोद्धरणं। तत्समीपे मयूररूपस्य भीमपराक्रमाभिधानस्य मन्त्रिणो निजवृत्तान्तकीर्त्तनं। कनकमञ्जर्य्या उपाख्यानादिकथनं। ५ त०,—तत्पुरतो गुणाकरस्य निजवृत्तान्तकथनं। विन्ध्यपर्व्वतस्थवराहस्य उपाख्यानादिकं। पाञ्चालदेशस्थितस्य देवभूतिद्विजस्य उपाख्यानं। केदारगिरिस्थस्य शुभनयमुनेरुपाख्यानादिकञ्च। ६ त०,—त्रिगर्त्तनगरीस्थस्य द्विजकिशोरस्य उपाख्यानं। भूनन्दस्य भूपतेरुपाख्यानं। पद्मिष्ठाया उपाख्यानं। वेतालसाधकस्य उपाख्यानं। श्रीदर्शनस्य अनङ्गमञ्जरीपरिणयादिविवरणं। ७ त०,—मृगाङ्कदत्तस्य स्वभृत्येन गजरूपधारिणा शक्तिना सह साक्षात्कारादिविवरणं। अयोध्यापतेः श्रुतधरस्य उपाख्यानं। भीमभटेन सह मृगाङ्कस्य मित्रतादिकथनं। ८ त०,—तत्समीपे विक्रमकेशरिणो निजवृत्तान्तवर्णनं। गोदावरीतीरस्थदेशाधिपतेः विक्रमसेनस्य शान्तशीलाख्यभिक्षूपदेशेन वेतालानयनादिविवरणं। अत्र, १ प्रथमवेताले,—वाराणसीराजतनयस्य वज्रमुकुटस्य उपाख्यानं। ९ त०, २ वेताले,—मन्दारवत्या उपाख्यानं। १० त०, ३ वेताले,—पाटलिपुत्रस्थविक्रमकेशरिण उपाख्यानं। ११ त०, ४ वेताले,—शूद्रकनृपतेरुपाख्यानं। १२ त०, ५ वेताले,—सोमप्रभाया उपाख्यानं। १३ त०, ६ वेताले,—मदनसुन्दर्य्या उपाख्यानं। १४ त०, ७ वेताले,—सत्त्वशीलस्य उपाख्यानं। १५ त०, ८ वेताले,—विष्णुस्वामिपुत्राणामुपाख्यानं। १६

विषयः। त०, ९ वेताले,—वीरदेवन्टपतेरुपाख्यानं। १७ त०, १० वेताले, —मदनसेनाया उपाख्यानं। १८ त०, ११ वेताले,—धर्म्मध्वजभूपालस्य उपाख्यानं। १९ त०, १२ वेताले,—अङ्गदेशाधिपस्य यशःकेतोरुपाख्यानं। २० त०, १३ वेताले,—विद्याधरकर्तृकहरिस्वामिकामिनीहरणोपाख्यानं। २१ त०, १४ वेताले,—रत्नदत्तसुताया रत्नावल्या उपाख्यानं। २२ त०, १५ वेताले,—यशःकेतुतनयायाः शशिप्रभाया उपाख्यानं। २३ त०, १६ वेताले,—जीमूतवाहनस्य उपाख्यानं। २४ त०, १७ वेताले,—उन्मादिन्या उपाख्यानं। २५ त०, १८ वेताले,—चन्द्रस्वामिन उपाख्यानं। २६ त०, १९ वेताले,—धनवत्या उपाख्यानं। २७ त०, २० वेताले,—चित्रकूटाधिपस्य चन्द्रलोकस्य उपाख्यानं। २८ त०, २१ वेताले,—अनङ्गमञ्जर्य्या उपाख्यानं। २९ त०, २२ वेताले,—कुसुमपुरस्थविष्णुस्वामिकुमाराणामुपाख्यानं। ३० त०, २३ वेताले,—शोभावतीनगरीस्थयज्ञसोमकुमारस्य वेदसोमस्य उपाख्यानं। ३१ त०, २४ वेताले,—चन्द्रवतीलावण्यवत्योरुपाख्यानं। ३२ त०, २५ वेताले,—विक्रमसेनस्य सन्न्यासिशिरश्छेदनादिविवरणं। ३३ त०,—मृगदत्तेन सह श्रुतशीलद्विजस्य कथोपकथनादिकं। गणाधिपप्रसादेन निद्रासमये मृगाङ्कस्य शशाङ्कवतीलाभोपायादिपरिज्ञानविवरणं। ३४ त०,—तत्समीपे व्याघ्रसेनस्य निजवृत्तान्तकथनादिकं। ३५ त०,—मृगाङ्कस्य उज्जयिनीप्रवेशविवरणं। उज्जयिनीपतेः कर्म्मसेनस्य समीपे तत्कृतदूतप्रेरणादिकञ्च। ३६ त०,—शशाङ्कवतीपरिणयादिविवरणं। इति शशाङ्कवतीलम्बकः समाप्तः॥

१३ मदिरावतीलम्बकस्य प्रथमतरङ्गे,—मदनकञ्चुकाभिलाषव्याकुलस्य नरवाहनदत्तस्य मलयाचलपरिभ्रमणादिविवरणं। तत्र ब्राह्मणकुमारयोरुपाख्यानं। इति मदिरावतीलम्बकः समाप्तः॥

१४ पञ्चलम्बकस्य प्रथमतरङ्गे,—अङ्गिरस उपाख्यानादिकं। नरवाहनस्य गन्धर्व्वनगरप्रयाणादिकथनं। २ त०,—वीणादत्ताभिधानगन्धर्व्वकर्तृकं कूपपतितनरवाहनदत्तोद्धरणं। गन्धर्व्वदत्ताया उपाख्यानं। तया सह नरवाहनस्य विवाहादिवर्णनं। ३ त०,—ऋष्यमूकगिरिस्थितस्य नरवाहनस्य समीपे प्रभावत्या आगमनादिविवरणं। तत्र विद्याधरसुन्दर्य्योरागमनवृत्तान्तकथनं। नरवाहनस्य विद्याप्राप्तिः। सुलोचनापरिणयानन्तरं तस्य पुनः चक्रवर्त्तित्वलाभविवरणं। ४ त०,—नागस्वामिन उपाख्यानादिकथनं। इति पञ्चलम्बकः समाप्तः॥

१५ महाभिषेकलम्बकस्य प्रथमतरङ्गे,—विद्याधरमात्रसहायस्य नरवाहनस्य वामदेवमुनेराश्रमगमनादिविवरणं। २ त०,—नरवाहनस्य कनकवत्यादिपाणिग्रहणविवरणं। ऋषभपर्व्वते तस्य महाभिषेकविवरणं। वासवदत्ता-वत्सेश-यौगन्धरायणप्रभृ-

विषयः। तीनां तत्र गमनादिवृत्तान्तकथनं। इति महाभिषेकलम्बकः समाप्तः॥

१६ सुरतमञ्जरीलम्बकस्य प्रथमतरङ्गे,—वसन्तकाले नरवाहनस्य मन्दाकिनीतीर-परिभ्रमणविवरणं। शूरसेनराजपत्न्याः सुषेणाया उपाख्यानं। २ त०.—सुरत-मञ्जर्य्या उपाख्यानादिकथनं। ३ त०,—नरवाहनं प्रति कश्यपमुनेरुपदेशदानं। चन्द्रालोकनामकस्य शिवराजस्य उपाख्यानं। इति सुरतमञ्जरीलम्बकः समाप्तः॥

१७ पद्मावतीलम्बकस्य प्रथमतरङ्गे,—सार्द्धं स्त्रीभिः कश्यपाश्रममधिवसतो नरवाहनस्य मदनकञ्चुकाविरहखिन्नस्य पुरतो मुनीनां विविधोपन्यासकथनादिकं। बुधदत्तस्य वाराणसीपतेरुपाख्यानं। २ त०,—विद्युत्प्रभनामकस्य दैत्येन्द्रस्य उपाख्यानादि-कथनं। ३ त०,—विद्युद्ध्वजेन सह देवानां युद्धवृत्तान्तकथनं। गन्धर्व्वराजकुमार्य्याः पद्मावत्या उपाख्यानकथनादिकं। ४ त०,—पद्मावत्या विरहवर्णनादिकं। सख्या सह तस्याश्चन्द्रपुरगमनादिविवरणं। पद्मावत्याः स्वप्नदर्शनादिवृत्तान्तकथनं। ५ त०,—शिवमर्चयन्त्यास्तस्या दैववाणीश्रवणादिविवरणं। मेरुध्वजपुत्रयोः मुक्ता-फलध्वजमलयध्वजयोरुपाख्यानं। ६ त०,—तयोः पद्मावतीस्वयम्प्रभाभ्यां सह विवाहवर्णनं। इति पद्मावतीलम्बकः समाप्तः॥

१८ विषमशीललम्बकस्य प्रथमतरङ्गे,—अवन्तिदेशाधिपस्य महेन्द्रादित्यस्य उपाख्याना-दिकथनं। २ त०,—दुन्दुभिनामकयक्षराजदुहितुर्मदनमञ्जर्य्या उपाख्यानं। टि-ण्टाकरालोपाख्यानादिकं। ३ त०,—उज्जयिनीनाथस्य विक्रमादित्यस्य सिंहले-श्वरकन्यापरिणयादिविवरणं। तस्य पुनः मलयवती-चन्द्रावत्यादिपाणिग्रहणवर्ण-नञ्च। ४ त०,—विक्रमादित्यसमीपे राज्ञा अनङ्गवत्याः कार्पटिकोपाख्यानकथ-नं। कटाहद्वीपाधिपतेरश्वत्थनामकस्य नृपस्य उपाख्यानादिकथनं। विषमशीलो-पाख्यानं। ५ त०,—विक्रमादित्यसमीपे कस्यचित् मृतभार्य्याजीवनप्राप्तिविवरण-कथनं। कलिङ्गाधिपतेरुपाख्यानं। नरवाहनेन सह मदनकञ्चुकासमागमविव-रणञ्च। कविपरिचयः। समाप्तिः॥

No. 1259. आदिकाण्डमनोहरा।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 25. Lines, 9 on a page. Extent, 900 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

A'dikáṇḍa-manohará. A commentary on the first book of Válmíki's Rámáyaṇa. By Lokanátha Chakravartí. The most approved commen-

tary is that by Nílakaṇṭha, and an edition of it is now in course of publication by Hemachandra Bandyapádhyáya.

Beginning. नत्वा रघूत्तममयं परमं महस्तत्क्लेशबन्धुनिचयान्धतमोनुनोदं ।
श्रीलोकनाथबुध एष मनोहराख्यां रामायणस्य विदुषां प्रमुदे तनोति ॥
आस्ते यदा विमलबोधसुबोधटीका सर्व्वज्ञसज्जरचिता च मनोज्ञरूपा ।
अत्रापि सारपरमस्य विमत्सरस्य श्रीलोकनाथरचितैव मनो विधत्ते ॥
प्रतिकल्पं श्रीरामायणपुराणेतिहास+ + +मनोनैर्म्मल्यद्वारा श्रवणद्वारा मननादिद्वारा वा तत्त्वज्ञानोपपादकाः सन्त्येव यद्यपि, तथापि तास्तपोविद्याविमर्षशीलिनो भगवतः कस्यापि स्वकर्त्तृत्वेन यशोऽर्पयन्त्यः प्रतिकल्पं विलसन्तीति अस्मिन् कल्पे अखिलभुवनभवनानेकचित्रनिर्म्माणचतुरेण ब्रह्मणा तदर्थे+पि ताभिस्ताभिस्च भगवान् वाल्मीकिरेव यशोभागीकृतः, तत्र काण्डसप्तकश्रीरामायणकर्त्ता वाल्मीकिस्तत्र प्रवृत्त्यवधिकबालचरितवर्णन एव आदिकाण्डस्य प्रवृत्तिः, तत्र सर्गाश्चतुःषष्टिरेव वृत्तान्ताः, द्व्यशीतिरिति अस्मदङ्कतोऽपि वृत्तान्तानुक्रमेणैव, तत्र भगवतो वाल्मीकस्य करतलायितभुवनतदाश्रयवृत्तान्तस्य यद्युपदेशापेक्षापि नापेक्षिता, तथापि विनोपदेशं तत्पुनर्युगस्य अवैदिकत्वेन श्रीमद्भगवन्नारदोपदेशस्यापि वृत्तत्वेन प्रथमं भगवता नारदेन सप्तकाण्डार्थ उपदिष्ट इति।
प्रथमसर्गे स एव प्रस्तूयते भगवता वाल्मीकेन । तत्र,—
"नमस्तस्मै मुनीन्द्राय श्रीयुताय तपस्विने ।
शान्ताय वीतरागाय वाल्मीकाय नमो नमः ॥"
इति प्रथमतो विमलबोधाः सम्प्रदायविरुद्धमपि पठन्ति, व्याचक्षते च इत्यादिः ।

End. श्रिततरो विनीततरः ॥ १४ ॥ देवान् यौवराज्ये अभिषेचनं याचन्ते प्रार्थयन्ते।

Colophon. इति लोकनाथचक्रवर्त्तिकृतायामादिकाण्डमनोहरायां रामाभिषेकव्यवसायः ।

विषयः। वाल्मीकिकृतरामायणादिकाण्डस्य व्याख्यानं ।

No. 1260. अयोध्याकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 48. Lines, 10 on a page. Extent, 1,909 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Ayodhyákáṇḍa-manohará. The second book of the work noticed in the preceding No. 1259.

Beginning. श्रीरामो जयति । अश्रुन्निमालाः अश्रुलिशेणीः । प्रतिगृह्य दर्शनेन स्वीकृत्य ॥ १ ॥

End. व्यतिक्रमादिति अड़ागमाभाव आर्षः । व्यत्यक्रामदिति वा पाठः ॥ ६ ॥

Colophon. इति श्रीलोकनाथचक्रवर्त्तिकृतायाम् अयोध्याकाण्डमनोहरायां नन्दिग्राम-निवासः । अयोध्याकाण्डं समाप्तं ॥

विषयः । वाल्मीकिकृतरामायणायोध्याकाण्डस्य व्याख्यानं ।

No. 1261. आरण्यकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 43. Lines, 9 on a page. Extent, 1,644 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Áraṇyakáṇḍa-manohará. The third book of the work noticed under No. 1259.

Beginning. ॐ नमो रामाय । तपोवनं तपोवने वा पाठः ॥ १ ॥ तापसो वानप्रस्थ आश्रमो येषां ते, राममाश्रित्य अवलम्ब्य दृष्ट्वा इत्यर्थः । इत्यादिः ।

End. आसनानां स्वस्तिकपद्मादीनां, नियमः नियमासनं तत्रैव पूजाकाले अर्पितं प्राप्तं सुखमारम्भो यैः, न पुनरनियतासनैरित्यर्थः ।

Colophon. इत्यारण्यकाण्डस्य श्रीलोकनाथचक्रवर्त्तिकृता मनोहरा समाप्ता ।

विषयः । वाल्मीकिकृतरामायणारण्यकाण्डस्य व्याख्यानं ।

No. 1262. किष्किन्ध्याकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 48. Lines, 10 on a page. Extent, 1,665 s'lokas. Character, Bengal. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Kishkindhyákáṇḍa-manohará. The fourth book of the work noticed under No. 1259.

Beginning. नत्वा रघूत्तममयं परमं महस्सत्कृष्णवभुनिचयान्वतमोनुनोदं ।
श्रीलोकनाथबुध एष मनोहराख्यां रामायणस्य विदुषां प्रमुदे तनोति ॥

किष्किन्ध्याकाण्डपदानां व्याख्यानमधुनादरात् ।
कलयन्तु बुधाः काममुत्सार्य्य परमत्सरं ॥
तत्र किष्किन्ध्याशब्दो नियकारः सयकारस्य, मूर्द्धन्यमध्यमः । इत्यादिः ।

End. प्रवदन्तमङ्गदं, तथेत्यब्रुवन् सचान्वितः सत्वरं जगाम इत्यन्वयः ॥ १४ ॥ पितृराजः, धर्म्मराजः ॥ १५ ॥

Colophon. इति श्रीलोकनाथचक्रवर्त्तिकृता किष्किन्ध्याकाण्डमनोहरा समाप्ता ।

विषयः । वाल्मीकिकृतरामायणकिष्किन्ध्याकाण्डस्य व्याख्यानं ।

No. 1263. पद्मपुराणीयपातालखण्डः ।

Substance, country-made yellow paper, 7 × 5 inches. Folia, 165. Lines, 31 on a page. Extent, 5,115 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Verse. Generally correct.

Pátála khaṇḍa of the Padma Puráṇa. This is the fourth part of the second great Puráṇa by Vyása. It comprises nine thousand slokas, divided into one hundred and two chapters. (*Ante*, p. 247). Its principal subject is a new and very diffuse version of the Rámáyaṇa. Professor Wilson has given a full analysis of this work, (*Essays* I, pp. 45ff.) and to it I must refer the reader for information on the subject. The contents of the different chapters have been detailed below in Sanskrit.

Beginning. कदाचिन् नैमिषारण्ये सूतं परमकोविदं ।
कोविदाः सर्व्वधर्म्मेषु सर्व्वयज्ञेषु कोविदाः ॥
श्रुतिस्मृतिपुराणज्ञाः सदाचारपरायणाः ।
अनूचानाः सदस्याश्च सर्व्वदा धर्म्मवादिनः ॥
केचित् स्वाध्यायनिरताः केचिद्वेदार्थतत्पराः ।
केचिदध्यात्मतत्त्वज्ञाः केचिद् योगविशारदाः ॥
तर्केषु निपुणाः केचिन् मीमांसायां विचक्षणाः ।
वेदान्तज्ञानसिद्धान्ताः सोऽहमस्मि जपे रताः ॥
वेदाभ्यासेऽतिनिपुणास्तपसा सूर्य्यवर्च्चसः ।
त्रिकालज्ञा महात्मानः स्वधर्म्मनिरताः सदा ॥

चतुःषष्टिकलाभिज्ञास्तेजसा सूर्य्यवर्चसा ।
त्रिकालध्याननिरताः सर्व्वशास्त्रविशारदाः ॥
हिमवन्निलयाः केचिन्महेन्द्रनिलयाः परे ।
विन्ध्याद्रिनिलयाश्चान्ये सह्याद्रिनिलयास्तथा ॥
श्रीशैलनिलया ये च कुरुक्षेत्रस्थिताश्च ये ।
पम्पानिवासिनो ये च कुमाराचलवासिनः ॥
मलयाचलगाः केचिन्निषिध्याचलवासिनः ।
माल्यवन्निलयाः केचित् त्रिकूटाचलवासिनः ॥
दण्डकारण्यनिलया नक्षारण्यवासिनः ।
चम्पकारण्यगा केचिद्दीचारण्यनिवासिनः ॥
धर्म्मारण्यरताः केचिद् गुहारण्यरतास्तथा ।
ब्रह्मारण्यरताश्चान्येऽर्बुदारण्यनिवासिनः ॥
एते चान्ये च मुनयः सशिष्या बहवो मताः ।
सन्तः ++ धना दक्षा जितमाया जितेन्द्रियाः ॥
अहङ्कारविहीनाश्च निर्म्ममाः कामवर्ज्जिताः ।
भगवद्ध्याननिरता लोकानुग्रहतत्पराः ॥
निर्म्मोहाः क्रोधनिर्मुक्ताः शान्ता निर्लोभमत्सराः ।
शमादिगुणसम्पन्ना दृढभक्ता दयालवः ॥
नारायणं जगन्नाथं सर्व्वाध्यक्षमनामयं ।
यजन्तः परया भक्त्या तत्पदाविष्टमानसाः ॥
कृष्णाजिनप्रावरणा जटिला ब्रह्मचारिणः ।
गृणन्तः परमं ब्रह्म जगच्चतुरनामयं ॥
जितनिद्रा जिताहारा द्वन्द्वदुःखसहिष्णवः ।
पश्यन्तो विष्णुरूपेण चराचरमिदं जगत् ॥
अब्भक्ष्या वायुभक्ष्याश्च शीर्णा पर्णाशनाः सदा ।
निराहारास्तथा चान्ये कन्दमूलफलाशनाः ॥
कृच्छ्रातिकृच्छ्रपाराकैस्तप्तकृच्छ्रैस्तथैन्दवैः ।
नित्यं संशोधितात्मानस्तथा सान्तपनादिभिः ॥
धर्म्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ।
एकदा मिलिताः सर्व्वे पप्रच्छुरिदमादरात् ॥

ऋषय ऊचुः । सूत सूतविदां श्रेष्ठ व्यासहार्द्दविचक्षण ॥ इत्यादिः ।

End. गङ्गायै यमुनायै च सरस्वत्यै वटाय च ।
सोमेश्वराय शेषाय माधवाय नमो नमः ॥

Colophon. इति श्रीपद्मपुराणे पातालखण्डे सूतशौनकसंवादान्तर्गतशेषसनकसंवादे शत तमोऽध्यायः ।

विषयः । पद्मपुराणीयपातालखण्डीयप्रयागमाहात्म्यप्रकरणमिदं । अत्र १ प्रथमाध्याये,—सुतेन सह ऋषीणां संवादः ।

२ अ०,—देवदानवयक्षगिरिनदीवेदवृक्षशास्त्रप्रभृतीनां राजनिरूपणादिकं । शौचदयादिधर्म्मपादकीर्त्तनादिकं । स्तेयमदाद्यधर्म्मपादकथनं । कलौ नराणां प्रकृत्यादिनिरूपणं ।

३, ४ अ०,—प्रयागमाहात्म्यकथनं । भगवत्तत्त्वजिज्ञासूनां सनकादीनां पाताल-गमनपूर्व्वकं शेषस्तवनं । कामद-मोक्षदभेदेन तीर्थद्वैविध्यकथनं । प्रयागस्य तीर्थ-राजत्वनिर्व्वचनं ।

५, ६, ७, ८ अ०,—देवगणसनाथस्य नारदस्य ब्रह्मस्तवनादिविवरणं । ब्रह्मादि-कृतप्रयागतुलाकरणवृत्तान्तः । प्रयागपरिमाणादिकथनं । तत्र ब्रह्मकृताश्वमेध-यज्ञानुष्ठानविवरणं । तत्कृतमाधवस्तोत्रं ।

९, १० अ०,—अटतो नीलकण्ठस्य पुरतो माधवस्याविर्भाववृत्तान्तः । तत्कृतमाधव-स्तोत्रं । माधवाज्ञया वटमूले शिवस्य नित्यावस्थानविवरणं । प्रयागक्षेत्रे शक्रकृतो-द्यानशोभावर्णनं । इन्द्रकृतमाधवस्तोत्रादिकं

११, १२ अ०,—कामनाभेदे पुष्पविशेषेण पूजाविधानं । लक्षपुष्पपूजाविधिः । लक्षप्रदक्षिण-लक्षनमस्कार-लक्षदीपदानानां विधानं । मासविशेषे एतेषां फल-विशेषकथनं ।

१३, १४ अ०,—माधवसमीपे अलौकिकरूपलावण्यशालिनीमविदितपूर्व्वां का-मिनीं निरीक्ष्य लक्ष्म्यादीनां विस्मयः । अस्या जन्मादिविवरणं । विकटोपाख्यान-कीर्त्तनञ्च ।

१५, १६, १७, १८ अ०,—अग्नितीर्थोत्पत्तिविवरणं । लक्षहोमविधिः । तत्र कुण्डादिनिर्म्माणप्रक्रिया । यमसमीपे वृद्धब्राह्मणरूपस्य भगवतो यत्किञ्चिद्दानेनापि महत्फलं भवतीति कथनं ।

१९ अ०,—निर्ऋतिक्षेत्रवर्णनं । विकिरनामधेयक्षेत्रवर्णनं । क्षुधार्त्तस्य भिक्षुकस्य निर्ऋतिसमीपे अन्नादिप्रार्थनावृत्तान्तः ।

२०, २१, २२, २३ अ०.—श्राद्धविधिः । श्राद्धपार्व्वणादीनां लक्षणं । तेषां नित्य-त्वादिभेदकथनं । श्राद्धे पाचकभणार्थं पञ्चाधिकब्राह्मणनिमन्त्रणे दोषकथनं । श्राद्ध-

विषयः। कर्त्तुर्नियमाः। तत्र दानार्हद्रव्याणि। वर्ज्जनीयानि च। पाकविधिः। तत्र गर्भिणीम्रतवत्सादिक्कृतपाकवर्ज्जनकथनं।

२४, २५, २६, २७ अ०,—वरुणक्कृतब्रह्मस्नातविवरणं। तत्र चक्रवाकीसमीपे पथिकस्य स्वीयदृत्तान्तकथनं। चन्द्रवतीपुरीविवरणं। मदालसोपाख्यानं। पान्थं प्रति संसारस्य अनित्यत्वं कथयन्त्याश्चक्रवाक्या निजपूर्व्वजन्मकथाकीर्त्तनं। तस्मै पुनस्तस्याः सञ्जीवनीविद्यादानं।

२८, २९, ३० अ०,—वायवीयतीर्थवर्णनं। कौवेरतीर्थकथनं। पुलस्त्योपाख्यानं। कुवेरस्य लङ्कायां निवासविवरणञ्च। हिरण्याच-हिरण्यकशिपु-रावणादीनां जन्मादिविवरणं। रावणविप्रक्कृतस्य कुवेरस्य तपस्यावर्णनादिकं।

३१, ३२, ३३, ३४, ३५ अ०,—ईशानतीर्थवर्णनं। ईशानक्कृतमाधवस्तुतिः। तपस्यरता तेन सह माधवस्य संवादः। तीर्थराजश्रवणस्मरणादीनां माहात्म्यकथनं। त्रिवेणीवर्णनं। तत्र तत्परिमाणादिकथनं। प्रणवस्य त्रिवेणीत्वनिरुक्तिः। गङ्गायमुनयोः संवादः। शेषक्कृतवेणीस्तोत्रं।

३६, ३७, ३८, ३९ अ०,—त्रिवेण्यां चौरमाहात्म्यं। तत्र वासमरणयोः फलश्रुतिः। किञ्च जलप्रवेशेनापि अन्यथा वा तत्र मरणे नात्मघातदोष इति कथनं। तीर्थयात्राविधिः। तत्र अधिकारिनिरूपणं। नियमादिकथनञ्च। तीर्थप्राप्तप्रथमदिनक्कत्यनिरूपणं।

४०, ४१, ४२, ४३, ४४ अ०,—तीर्थराजस्नानादौ सङ्कल्पकरणे पापमोचनकामनया तदुल्लेखे पापनिरूपणसङ्ख्यादिकीर्त्तनं। तत्र तर्पणविशेषनिरूपणं। स्त्रीणां रजोयोगेऽपि प्रयागस्नानादौ दोषाभावकथनं। तीर्थश्राद्धविधिः। वेणीमाधवस्य ध्यानं, षोड़शोपचारपूजामन्त्रादिकथनञ्च। वेणीमाधवयोर्युगलस्तोत्रं।

४५, ४६, ४७ अ०,—द्वात्रिंशद्विधापराधकीर्त्तनं। शिलाचक्रपरीक्षणं। पञ्चायतनपूजाविधानं। तीर्थराजे ब्राह्मणदम्पतिपूजनफलकथनं। पुराणश्रवणविधिः। तत्र वक्तृस्रोतृलक्षणनियमादिकथनं।

४८, ४९, ५०, ५१, ५२ अ०,—माघस्नानफलकथनं। माघमासकर्त्तव्यसामान्यधर्म्मनिरूपणं। तत्र विशेषधर्म्मनिर्णयश्च। माघशुक्लचतुर्थ्याः कुन्दचतुर्थीतिनामकथनं। तत्र कुन्दपुष्पेण शिवार्च्चने फलकथनं। वसन्तपञ्चमी, तत्र वासन्तिकोत्सवविधिः। माघसप्तमीस्नानविधिः। तत्र शिरसि दीपं निधाय मौनस्नानकर्त्तव्यता। माघाष्टम्यां भीष्मतर्पणविधानं। भीमद्वादशी। महामाघीलक्षणं। माघस्नानव्रतोद्यापनविधानञ्च।

५३ अ०,—दानलक्षणं। तत्कर्त्तृकप्रशंसा। धर्म्मदानलक्षणं। अर्थदानलक्षणं। काम-

विषयः। दानलक्षणं। व्रीड़ादानलक्षणं। हर्षदानलक्षणं। भयदानलक्षणं। दानयोग्यपात्र-लक्षणं। वृत्तस्वरूपकथनं। ध्रुवाजस्त्रिक-काम्य-नैमित्तिकादिदानलक्षणं। नैमित्तिकदानस्यापि त्रैविध्यं। इष्टापूर्त्तादिलक्षणं।

५४, ५५, ५६, ५७ अ०,—दानकालकथनं। दानार्हद्रव्यादिनिरूपणं। प्रथमकल्पसमर्थस्य अनुकल्पानुष्ठाने दोषकीर्त्तनं। दानभेदे दक्षिणाभेदनिरूपणं। षोड़शमहादानकथनं। गोदानविधिः। अन्नादिदानविधिकीर्त्तनञ्च।

५८, ५९, ६०, ६१, ६२ अ०,—गुप्तदानप्रशंसा। तत्र मध्यदेशस्थगुप्तधनाभिधवैश्यस्य उपाख्यानं। कृष्णशर्म्मोपाख्यानं। गुप्तदानमाहात्म्यवर्णनं। सर्व्वस्वदानप्रशंसा। तद्विधानकथनं। अत्र नापितकुलजातयोः कयोश्चित् सर्व्वस्वदानवृत्तान्तकीर्त्तनं। श्रीपतिजयाभिधेययोरुपाख्यानं।

६३, ६४ अ०,—ताम्बूलदानविधिः। नागवल्लीसमुत्पत्तिविवरणं। ताम्बूलस्य पारिभाषिकलक्षणकीर्त्तनं। ब्रह्मचारिविधवादीनां ताम्बूलभक्षणप्रतिषेधः।

६५, ६६, ६७, ६८, ६९, ७० अ०,—नानायज्ञमाहात्म्यवर्णनं। एकादशीव्रतनिर्णयः। तत्र अधिकार्य्यनुकल्पादीनां व्यवस्था। खण्डा-सम्पूर्णादीनां लक्षणकथनं वैष्णवलक्षणं। स्मार्त्तलक्षणं। एकादशीनिशाजागरणमाहात्म्यं। चण्डालब्रह्मराक्षसयोरुपाख्यानं। अनृतवचनं कुत्र कुत्र दोषाय न भवतीति भगवदुपदेशकीर्त्तनं।

७१, ७२, ७३, ७४, ७५ अ०,—एकादश्युत्पत्तिविवरणं। विष्णुकृतासुरदानवनाशनवृत्तान्तकीर्त्तनं। शक्तिं प्रति विष्णोर्वरदानं। अक्षयवटमाहात्म्यं। मूलमाधववटमाधव-शङ्खमाधव-पद्ममाधवादीनां विवरणं।

७६, ७७, ७८, ७९ अ०,—मूलटङ्केश्वर-सूर्य्यकुण्डप्रभृतीनां विवरणं। सूर्य्यस्य तपस्यादिकीर्त्तनं। आदिवेणा आरभ्य ऋणमोचनान्तं यावत्तीर्थवर्णनं। आनन्दकाननस्थस्य वामननामकब्राह्मणस्य उपाख्यानं। पापमोचनतीर्थवर्णनं। चन्द्रपुरनिवासिनो महामतिनामकस्य विप्रस्य उपाख्यानं।

८०, ८१ अ०,—रामतीर्थविवरणं। रेणुकावधानन्तरं परशुरामकृतैतत्तीर्थनिर्म्माणादिवृत्तान्तकथनं। पञ्चाग्न्यादिसाधनविधिः। अत्र विशेषेण धूमपानादीनां प्रकारनिरूपणं। सरस्वतीकुण्ड-गोघट्टनतीर्थादिमाहात्म्यकथनं।

८२, ८३ अ०,—पिशाचमोचनतीर्थ-कामतीर्थ-कापिलतीर्थ-तक्षकतीर्थविवरणं। इन्द्राज्ञया अश्विनीकुमारयो रसराजापहारकतक्षकान्वेषणवृत्तान्तकथनं। कालियतीर्थवर्णनं। गरुड़ेन सह विष्णोर्युद्धविवरणं। कालियनाग-गरुड़योरायोधनवर्णनं।

८४, ८५ अ०,—चक्रतीर्थवर्णनं। सिन्धुसागरतीर्थकथनं। पाण्डवकुण्ड-वरुणकुण्डयोः कथनं। भरद्वाजेश्वरविवरणं। सीतारामाश्रमकथनं। विश्वामित्र-गोतम-

वशिष्ठादीनामाश्रमकथनं। प्रयागक्षेत्रे अश्वदानोद्यतं शक्रं निरूप्य ब्रह्मसुराचार्य्ययोः संवादकथनं। भोगवतीतीर्थकथनं। गङ्गाया भोगवतीतिनामकारणकथनं। दिवोदासस्य तपस्यावर्णनं।

८६, ८७, ८८ अ०,—ब्रह्मकुण्डदशाश्वमेधिकप्रभृत्यन्तर्वेदिस्थतीर्थवर्णनं। सङ्क्षेपेण रामावतारप्रयोजनकीर्त्तनं। ऊर्व्वशीकुण्डकथनं। ऊर्व्वशीपुरूरवसोः संवादः। सुधारसतीर्थ·कोटितीर्थ·मानसतीर्थप्रभृतीनां माहात्म्यादिकथनं।

८९, ९०, ९१, ९२ अ०,—यमयमुनयोरुत्पत्तिविवरणं। तयो रूपवर्णनञ्च। यमुनामाहात्म्यकीर्त्तनं। कालिन्दीतिनामकारणकथनं। यमुनाकलिन्दपर्व्वतयोः संवादः। यमुनाया नदीभावप्राप्तिविवरणं। शान्तिपुरविवरणं। कलिन्दगिरेरारभ्य गङ्गासङ्गमपर्य्यन्तं यमुनापार्श्वस्थितानां तीर्थभूमीनां विवरणादिकं।

९३, ९४, ९५, ९६ अ०,—गङ्गामाहात्म्यं। गङ्गोत्पत्तिविवरणं। अत्र सगरस्य अश्वमेधयज्ञानुष्ठानादिकथनं। सरस्वत्या उत्पत्तिविवरणं। तस्या गर्भे वाड़वस्य जन्म, पुनस्तस्य समुद्रगर्भप्रवेशवृत्तान्तकथनञ्च। त्रिवेण्या उत्पत्तिः। वेणीदानमाहात्म्यं। त्रिवेण्यां क्षौराद्यनुष्ठाने तिथिवारादिदोषाभावकथनं।

९७. ९८, ९९, १००, हठयोगानुष्ठानप्रकारकीर्त्तनं। प्रयागमाहात्म्यश्रवणपठनादिमाहात्म्यकथनञ्च।

No. 1264. वामनपुराणं।

Substance, country-made yellow paper, 13 × 4½ inches. Folia, 198. Lines, 8 on a page. Extent, 6,336 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Verse. Very incorrect.

Vámana Puráṇa. The fourteenth of the eighteen great Puráṇas attributed to Vyása. According to the Matsya Puráṇa, "that in which the four-faced Brahmá taught the three objects of existence, as subservient to the account of the greatness of Trivikrama, which treats also of the S'iva Kalpa, and which consists of ten thousand stanzas, is called the Vámana Puráṇa." Its principal subject is the dwarf incarnation of Vishṇu, in which he overcame the giant Bali by a trick, he not being assailable by force. It is related by Pulastya in compliance with a request of Nárada. The MS. under notice is not near so extensive as what the Matsya refers to, but it corresponds closely with the extent of the codices examined by Col. Vans Kennedy and Professor

H. H. Wilson. (Wilson's *Vishṇu Purana*, pp. LXXV ff.) Wilson supposes that "the compilation of the work may have amused the leisure hours of some Brahman of Benares three or four centuries ago," but its name and quotations from it occur in compilations of the 9th, 10th and 11th centuries, and Chand, at the close of the 12th century, gives its extent in verses. The work opens with an account of the rainy season, followed by a request of Deví to S'iva to build a dwelling for their joint use. Then follows the feast of Daksha and its consequences. S'iva, having decapitated Daksha, is required to expiate his crime of Bráhmanicide by dwelling at Kapálamochana in Benares. Then comes the marriage of S'iva with the daughter of the Himálaya mountain, with the usual preludes as described in the *Kumára-sambhava*. Descriptions follow of the birth of Kartikeya and the domestic delights of S'iva, and the whole interspersed with a variety of tales and episodes. The story of the dwarf incarnation, though avowedly the main subject, is given at the end, and takes up but a small portion of the work. Wilson justly observes that the work "divides its homage between S'iva and Vishṇu with tolerable impartiality."

Beginning. ॐ नमो भगवते वासुदेवाय ।
पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरं ।
नारदः पर्य्यपृच्छत्तं पुराणं वामनाश्रय ॥
कथं भगवता ब्रह्मन् विष्णुना प्रभविष्णुना ।
वामनत्वं धृतं पूर्व्वं तन्ममाचक्ष्व पृच्छतः ॥
कथं वा वैष्णवो भूत्वा प्रह्लादो दैत्यसत्तमः ।
त्रिदशै+++सार्द्धमत्र मे विस्मयो महान् ॥
श्रूयते हि द्विजश्रेष्ठ दक्षस्य दुहिता सती ।
शङ्करस्य प्रिया भार्य्या बभूव वरवर्णिनी ॥
किमर्थं सम्परित्यज्य स्वशरीरं वरानना ।
पुनश्च देवदेवस्य पत्नीत्वमगमच्छुभा ॥
जाता हिमवतो गेहे गिरीन्द्रस्य महात्मनः ।
त्रैलोक्यराज्यमाच्छिद्य बलेरिन्द्रस्य सोऽददत् ॥
नमस्तस्मै श्रीधराय क्षुद्रवामनरूपिणे ।
एतन्मे संशयं छिन्धि सर्व्ववित् त्वमतो हि मे ॥ इत्यादिः ।

End. एतत्पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनं ।

पुत्रदं सर्व्वकामाद्यं सर्व्वग्रहनिवारणं॥
नीचासनगतैः सर्व्वैः श्रोतव्यमिदमुत्तमं।
पठितव्यं न सन्ध्यायां न देयं यस्य कस्यचित्॥

Colophon. इति वामनपुराणे त्रिविक्रमचरितं समाप्तं। समाप्तञ्चेदं वामनाख्यपुराणमिति।

विषयः। १ प्रथमे अध्याये,—वर्षावर्णनं। वर्षणोद्वेजिताया गिरिजाया गिरिसमीपे गृह-निर्म्माणार्थप्रार्थना। जीमूतजालाकलनेन शिवस्य जीमूतकेतुनामकथनञ्च।

२ अ०,—शरद्वर्णनं। समङ्करां शङ्करीं विहाय दक्षस्य यज्ञानुष्ठानं। कथं भगवान् कपालीतिविवरणं। दुर्व्वासस उत्पत्तिः। त्राह्मपुरुषशैवपुरुषयोरायोधनं।

३ अ०,—वदरिकाश्रमे ब्रह्महत्यया आलिङ्गितं कपालिनं दृष्ट्वा नरनारायण-कालिन्दीपुष्करारण्यप्रभृतीनामन्तर्द्धानं। निर्व्विषस्य तस्य पुण्डरीकाक्षस्तवनं। हरे-रुपदेशेन हरस्य काशीपुरीगमनादिविवरणं। कपालमोचनतीर्थवर्णनञ्च।

४, ५ अ०,—गौतमनन्दिन्याः प्रमुखाद् दक्षयज्ञवृत्तान्तं निशम्य दाक्षायण्या देह-त्यागः। वीरभद्रादीनामुत्पत्तिः। यज्ञभूमौ तैः सार्द्धं सङ्ग्रामे ततो देवानामप-यानं। विनष्टे च दक्षे यज्ञस्य मृगरूपेण अपसरणं। शिवस्य कालरूपत्वकीर्त्तनं। मेषादिद्वादशराशीनां लक्षणादिकञ्च।

६, ७, ८ अ०,—नरनारायणजन्मादिकथनं। वसन्तवर्णनं। सतीविरह-विधुरस्य विधुभूषणस्य अङ्गस्पर्शेन दग्धायाः कालिन्द्याः कज्जलनिभत्वप्राप्तिः। शिवविलापः। पाञ्चालीकेशविवरणं। मुनिकामिनीनामौत्सुक्यवर्णनं। शिवलिङ्गपतनवृत्तान्तः। हरिब्रह्मकृतहरस्तुतिः। शैवशिष्यप्रणाली। मदनदाहनं। कामधनुषो मुष्टिबन्ध-कोटिप्रभृतिपञ्चविधस्थानविशेषेण चम्पकवकुलादीनामुत्पत्तिः। उर्व्वश्या जन्म, रूपवर्णनञ्च। नरनारायणाभ्यां समं प्रह्लादस्य युद्धवर्णनं। पीताम्बरप्रह्लादसंवाद-कीर्त्तनञ्च।

९, १० अ०,—अन्धकोपाख्यानं। तेन सह इन्द्रादीनां समरसंरम्भः। देवानां प्रत्येकं वाहनलक्षणादिकथनं। शक्रस्य जम्भ-वृत्र-बलाद्यभिधदैत्यनाशनं।

११, १२, १३ अ०,—सुकेशिसमीपे मुनीनां धर्म्मस्वरूपकीर्त्तनादि। जम्बूप्लक्षा-दीनां परिमाणादिकथनं। पापविशेषे नरकविशेषकीर्त्तनं। जम्बूद्वीपस्थवर्ष-जनपद-नदीप्रभृतिकथनञ्च।

१४, १५ अ०,—दशाङ्गधर्म्मकथनं। ब्रह्मचर्य्यलक्षणादिः। सदाचारलक्षणं। प्रातःकृत्यादिनिरूपणं। स्वधर्म्मपरित्यागनिष्ठुरसत्यहीनवचनादिप्रयोगनिषेधः। चौरादिनियमः। शशकमत्स्यकच्छपादीनां भोज्यताकथनं। मणिमुक्तावस-नादिद्रव्यशुद्धिः। षण्ढ-मार्ज्जारप्रभृतीनां लक्षणं निरूप्य तद्गृहे भोजनादि-

विषयः। प्रतिषेधः। अशौचादिनिरूपणं। वानप्रस्थादिधर्म्मकथनं। शूद्रस्य केवलं गार्हस्थ्यधर्म्माधिकारकथनं।

१६, १७ अ०,—निशायां शून्यमार्गे निशाचरनगरीं निभाल्य सूर्य्यभ्रमेण लोकानां चेष्टादिवर्णनं। तत्पुरीपातनापराधात् पुरारिणा निपातितस्य दिनपतेरश्वीवरुणयोः सलिलमध्ये भ्रमणादिविवरणं। उत्तरायणसङ्क्रान्त्यादिनिरूपणं। प्रतिपदादिक्रमेण देवानां शयनादिकालकथनं। चातुर्मास्यविधिः। सर्व्वाक्षयकरव्रतविधानञ्च।

१८, १९, २०, २१ अ०,—गिरिशगणेशादीनां प्रियपुष्पकथनं। शरदागमे विष्णुपूजा विधानं। वैष्णवपञ्जरस्तोत्रं। रम्भ-करम्भयोरुपाख्यानं। रम्भात् महिषीगर्भे महिषासुरजन्मविवरणं। रक्तवीजोत्पत्तिः। कात्यायन्या जन्म। अगस्त्य-विन्ध्यगिरिवृत्तान्तवर्णनं। देव्या सह चण्डमुण्डप्रभृतीनां संवादः। महिषासुरबधकथनञ्च।

२२, २३ अ०,—सोमवंशीयर्क्षराजोपाख्यानं। तपनतनयाया ऋक्षकुमारेण संवरणेन समं विवाहः। तस्या गर्भे कुरोर्जन्म। कुरुक्षेत्रोत्पत्तिश्च।

२४, २५, २६ अ०,—मेनकागर्भे कन्यात्रयजन्मविवरणं। तत्र ब्रह्मणः शापेन ज्येष्ठा जलरूपतां प्राप्य सुरनदी संवृत्ता, मध्यमा तु सन्ध्यारागवती बभूवेति कथनं। कनिष्ठाया महादेवप्राप्त्यर्थं तपस्या। तया सह भिक्षोः संलापः। सप्तर्षीणां हिमालयसमीपे उमाप्रार्थनादिवृत्तान्तः। शिवविवाहवर्णनं।

२७, २८, २९, ३०, ३१ अ०,—पितामहप्रसादात् काल्याः काञ्चनवर्णत्वप्राप्तिः। देवान् प्रति देव्याः शापदानं। गजाननजननं। इन्द्रस्य नमुचिनिसूदनं। देव्याश्चण्डमुण्डनिशुम्भहननं। कुमारस्य जन्म। सैनापत्ये अभिषेचनं। तारकासुरनाशनं। महिषक्रौञ्चगिरिभेदनञ्च।

३२, ३३ अ०,—मदालसोपाख्यानं। अन्धकासुरभयेन पार्व्वत्याः शतरूपग्रहणं। केदारतीर्थोत्पत्तिः। सुरदानवोपाख्यानं। तेन सह वशिष्ठयमादीनां संवादः। सनत्कुमार-सनक-सनातन-सनन्दप्रभृतिधर्म्मपुत्रकथनं।

३४ अ०,—पुन्नाम्नो नरकस्य प्रपञ्चं प्रदर्श्य तत्स्वरूपकथनं। शेषाख्यपापनिरूपणं। क्रमेण पुत्रशिष्ययोः पुन्नामनरकशेषपापहन्तृत्वकीर्त्तनं। औरसक्षेत्रजादिपुत्रलक्षणं। अहिंसाधर्म्मयोः ब्रह्मणे पुत्रत्वेन सनत्कुमारस्य सम्प्रदानं। द्वादशारचक्रलक्षणादिकथनं। विष्णोः मुरनाशनं।

३५ अ०,—शिवदर्शनवञ्चितानां देवानां पुरतः केशवस्य तप्तकृच्छ्रलक्षणादिकथनं। तेषां तदनुष्ठानञ्च। जलमध्ये शिवस्य स्थाणुनामकरणं। तस्य शुक्राय सञ्जीवनीविद्यादानं। प्रह्लादान्धकसंवादः।

विषयः। ३६, ३७, ३८ अ०,—पाणिग्रहं याचमानस्य दण्डस्य पुरतः शुक्रसुताया विरजायाः चित्राङ्गदोपाख्यानकीर्त्तनं। अञ्जनसुताया उपाख्यानं। गन्धर्व्वकन्यकाभ्यां सार्द्धं अवगाहमानस्य गालवमुनेर्मत्स्येन सह संवादः। वेदवत्या उपाख्यानं। गद्येन हाटकेश्वरशिवस्तोत्रं। ऋतध्वजवानरयोः संवादः। वेदवतीचित्राङ्गदाप्रभृतिभिः सह इन्द्रद्युम्नसुरथप्रभृतीनां विवाहवर्णनं।

३९, ४०, ४१ अ०,—तत्र शिष्येण दण्डेन बलात् वचनीयतां नीतास्मीति स्वदुहितुर्वचनमाकर्ण्य शुक्रस्य दण्डं प्रति शापदानवृत्तान्तकीर्त्तनं। दण्डकारण्यविवरणं। देवसैन्यानामन्धकसेनाभिः सह युद्धवर्णनं।

४२ अ०,—दैत्यगुरुकृतपशुपतिस्तुतिः। कवलितस्य तस्य शिवशरीरात् शुक्ररूपेण निर्गमनात् शुक्रेतिसञ्ज्ञाकीर्त्तनं। महादेवस्य अष्टादशभुजधारणं। शिवरूपपरिग्रहेण अन्धकस्य पार्व्वतीगृहप्रवेशविवरणं। तद्भयेन पार्व्वत्याः श्वेतार्ककुसुमप्रवेशकथनं। इन्द्रस्य जम्भवलप्रभृतिदानवनाशनं।

४३, ४४ अ०,—पुरारिणा सममन्धकस्य युद्धवर्णनादिः। सोमधार-सोमराजकामराजप्रभृतिभैरवोत्पत्तिः। अन्धककृतशिवस्तोत्रं। अन्धकस्य गणेश्वरत्वं प्राप्य भृङ्गी बभूवेतिकथनञ्च। इन्द्रस्य मलयपर्व्वते दानवैः सह युद्धवर्णनं। पाकशासनपुरन्दरेतिनाम्नोर्निरुक्तिः। एकोनपञ्चाशन्मारुतजन्मविवरणं। इन्द्रस्य गोत्रभिन्नामनिरुक्तिः।

४५ अ०,—स्वायम्भुवमन्वन्तरीयसवनराजोपाख्यानं। तत्र सप्तर्षिपत्नीनां पीयूषबुद्ध्या पुष्करस्थशुक्रपानेन गर्भसञ्चारविवरणं। तासां पुत्रीणां सप्तमारुतत्वकथनञ्च। एवं स्वारोचिषादिमन्वन्तरेषु सप्तसप्तमारुतसम्भवकीर्त्तनं।

४६, ४७, ४८ अ०,—बलिकालनेमिप्रभृतिभिः सह इन्द्रादीनां युद्धवर्णनं। विष्णोः कालनेमिनिपातनं। दैत्यजितानां देवानां पलायनादिवर्णनं। त्रिलोकाधिपतिं बलिं प्रति शुक्रस्य उपदेशदानं। विष्णोः सरस्वतीचतुष्टयसृष्टिविवरणं।

४९, ५०, ५१, ५२ अ०,—वामनप्रादुर्भावकथनं। प्रह्लादस्य तीर्थयात्राविवरणं। धुन्धुदैत्यस्य अश्वमेधयज्ञानुष्ठानं। बलिनिग्रहात् पूर्व्वमपि त्रिविक्रमरूपपरिग्रहेण भगवतो वालुकार्णवे धुन्धुनिक्षेपणं। दस्युना हृतसर्व्वस्वस्य सुधर्म्माख्यस्य वणिज उपाख्यानं। सोमशर्म्मोपाख्यानं। श्रवणद्वादशीकथनं।

५३, ५४, ५५ अ०,—नक्षत्रपुरुषव्रतविधानं। शिवस्य सुदर्शनचक्रधारणं। विष्णोरपि त्रिशूलाकलनमित्यादिवृत्तान्तकथनं। जलोद्भवासुरनामकीर्त्तनं। वीतमन्युद्विजोपाख्यानं। श्रीदामनरपतेरुपाख्यानं। चक्रिच्छिन्नेन सुदर्शनेन त्रिधाभिन्नस्य शिवस्य संशयेन हिरण्याक्षसुवर्णाक्ष-विरूपाक्षाख्यरुद्राविर्भावविवरणं।

५६, ५७, ५८, ५९, ६० अ०,—शिवस्य रुद्रकोटीतिनामनिर्व्वचनं। गजेन्द्रमोक्ष-विवरणं। विष्णुपञ्जरकीर्त्तनं। राक्षसम्प्रति ब्रह्मचारिणः सारस्वतस्तोत्रोपदेशः। पापप्रशमनाभिधस्तोत्रं। अन्यविधपापप्रशमनस्तुतिः।

६१, ६२, ६३, ६४, ६५ अ०,—विधातृकृतवामनस्तोत्रं। वामनस्य रूपविशेषेण स्वकीयस्थानकथनं। शुक्रसमीपे बलेः कोषकारपुत्रोपाख्यानकथनं। त्रिविक्रम-रूपवर्णनं। बलिबन्धनपातालगमनादिवृत्तान्तकथनं। त्रिविक्रमस्य ब्रह्मणे लघु-रूपप्रदर्शनं। गद्येन ब्रह्मणो वामनस्तुतिकीर्त्तनं।

६६, ६७ अ०,—बलिकृतसुदर्शनस्तोत्रकथनं। बलिं प्रति प्रह्लादस्य भगवत्तत्त्वोप-देशदानं। एतत्पुराणपठनादिफलश्रुतिकीर्त्तनञ्च।

No. 1265. पदार्थतत्त्वावलोकः।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 50. Lines, 32 on a page. Extent, 1,800 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Prose. Generally correct.

Padártha-tattvávaloka. A commentary on the *Padártha-khánḍana* of Raghunátha S'iromaṇi. By Siddhántapanchánana.

The full name of the commentator cannot be ascertained. The work of S'iromani is commonly called *Padártha-tattva* and also *Padártha-tattva-vivechana ;* it is a criticism of the Vaiseshika categories.

Beginning. इन्द्रादिवृन्दारकवृन्दवन्द्यं प्रणम्य पादाम्बुरुहं मुरारेः।
शिरोमणिस्वीकृत +×++++++++॥
अथ द्रव्यादयस्तावत् प्राचीनपरिगृहीताः पदार्थाः सप्त, तत्र विचारपुरःसरं केषाञ्चिदाधिक्यं निराकरिष्यन् आधिक्यमपि केषाञ्चिद् व्यवस्थापयिष्यन् व+ व्यवस्थापकं सिद्धान्तप्रवादमात्रमनधिकृत्य प्रतिजानीते। अथेति। ईश्वरा-दिति। इत्यादिः।

End. परे तु दशरथपदवाच्यत्वादिनैव तत्र बोधः। न तु दशरथत्वादिना—इति कृतं परिभावनेन। श्रीरस्तु।
निर्म्मासे कठिनेऽस्मिन्, अकौटिल्येनापि सूक्ष्मतरबुद्ध्या।
दत्तो दोषोऽपि मुदे, स्तन इव रचितोदरा+तः॥
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।
विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता॥

No. XI.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA, LL. D.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME III—PART IV.

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1876.

तच्चिन्ताहरितेन तावकमहामायाविमूढात्मना
संसारार्णवदुर्निवारलहरीजालेषु सोमुह्यता ।
विद्योर्ज्जत्सदसद्विवेकरहितेनेदं मया वर्णितं
तेनानेन मदर्पितेन भगवन् प्रीणातु नारायणः ॥

Colophon. इति सिद्धान्तपञ्चाननकृतः पदार्थतत्त्वावलोकः समाप्तः ।

विषयः । शिरोमणिकृतपदार्थखण्डनस्य व्याख्या ।

No. 1266. कूर्म्मपुराणपूर्व्वभागः ।

Substance, country-made yellow paper, 14 × 10 inches. Folia, 135. Lines, 23 on a page. Extent, 3,121 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Kúrma Purána, Púrva-bhága. The Kúrma is the fifteenth of the eighteen great Puráṇas attributed to Vyása and the MS. under notice comprises only the first half of that work. The following is Professor Wilson's account of this Puráṇa:

"That in which Janárdana, in the form of a tortoise, in the regions under the earth, explained the objects of life—duty, wealth, pleasure, and liberation—in communication with Indradyumna and the R'ishis in the proximity of S'akra, which refers to the Lakshmí Kalpa, and contains seventeen thousand stanzas, is the Kúrma Puráṇa."

In the first chapter of the Kúrma Purána, it gives an account of itself, which does not exactly agree with this description. Súta, who is repeating the narration, is made to say to the R'ishis: "This most excellent Kaurma Puráṇa is the fifteenth. Samhitás are fourfold, from the variety of the collections. The Bráhmí, Bhágavatí, Saurí, and Vaishnaví are well known as the four Samhitás which confer virtue, wealth, pleasure, and liberation. This is the Bráhmí Samhitá conformable to the four Vedas; in which there are six thousand s'lokas; and, by it, the importance of the four objects of life, O great sages, holy knowledge and Parames'wara is known." There is an irreconcilable difference in this specification of the number of stanzas and that given above. It is not very clear what is meant by a Samhitá, as here used. A Samhitá, so observed above (p. XIX.), is something different from a Puráṇa. It may be an assemblage of prayers and legends, extracted, professedly, from a Puráṇa, but is not, usually, applicable to the origi-

nal. The four Samhitás here specified refer rather to their religious character than to their connexion with any specific work; and, in fact, the same terms are applied to what are called Samhitás of the Skanda. In this sense, a Puráṇa might be also a Samhitá; that is, it might be anassemblage of formulæ and legends belonging to a division of the Hindu system; and the work in question, like the Vishṇu Puráṇa, does adopt both titles. It says: "This is the excellent Kaurma Puráṇa, the fifteenth (of the series)." And again: "This is the Bráhmí Samhitá." At any rate, no other work has been met with pretending to be the Kúrma Puráṇa.

"With regard to the other particulars specified by the Matsya, traces of them are to be found. Although, in two accounts of the traditional communication of the Puráṇa no mention is made of Vishṇu as one of the teachers, yet Súta repeats, at the outset, a dialogue between Vishṇu, as the Kúrma, and Indradyumna, at the time of the churning of the ocean; and much of the subsequent narrative is put into the mouth of the former.

"The name, being that of an Avatára of Vishnu, might lead us to expect a Vaishṇava work: but it is always, and correctly, classed with the S'aiva Puráṇas; the greater portion of it inculcating the worship of S'iva and Durgá. It is divided into two parts, of nearly equal length. In the first part, accounts of the creation, of the Avatáras of Vishṇu, of the solar and lunar dynasties of the kings to the time of Krishṇa, of the universe, and of the Manwantaras, are given, in general in a summary manner, but, not unfrequently, in the words employed in the Vishṇu Puráṇa. With these are blended hymns addressed to Mahes'wara by Brahmá and others; the defeat of Andhakásura by Bhairava; the origin of four S'aktis, Mahes'warí, S'ivá, Satí, and Haimavatí, from S'iva; and other S'aiva legends. One chapter gives a more distinct and connected account of the incarnations of S'iva, in the present age, than the Linga; and it wears, still more, the appearance of an attempt to identify the teachers of the Yoga school with personations of their preferential deity. Several chapters from a Kás'í Máhátmya, a legend of Benares. In the second part there are no legends. It is divided into two parts, the I's'wara Gítá and Vyása Gitá. In the former, the knowledge of god, that is, of S'iva, through contemplative devotion, is taught. In the latter, the same object is enjoined through works, or observance of the ceremonies and precepts of the Vedas.

Beginning. नमस्कृत्याप्रमेयाय विष्णवे कूर्म्मरूपिणे ।
पुराणं सम्प्रवक्ष्यामि यदुक्तं विश्वयोनिना ॥
सत्रान्ते सूतमनघं नैमिषे च महर्षयः ।
पुराणसंहितां पुण्यां पप्रच्छ रोमहर्षणं ॥
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
तस्य ते सर्व्वरोमाणि वचसा हर्षितानि यत् ।
द्वैपायनस्तु भगवान् ततो वै रोमहर्षणः ।
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ॥
मुनीनां संहितां वक्तुं स्वांशेन पुरुषोत्तमः ।
त्वं हि स्वायम्भुवे यज्ञे सत्याहे वितते सति ॥
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ।
तस्माद् भवन्तं पृच्छामः पुराणं कौर्म्ममुत्तमं ॥ इत्यादिः ।

End. द्वादशे रुद्रसावर्णो रोचमानस्त्रयोदशः ।
भौत्यश्चतुर्द्दशः प्रोक्तो भविष्या मनवः क्रमात् ॥
अयं वः कथितो ह्यंशः पूर्व्वो नारायणेरितः ।
भूतैर्भव्यैर्वर्त्तमानैराख्यानैरुपबृंहितः ॥
पाठयेच्छृणुयाद्वापि श्रावयेद्वा द्विजोत्तमान् ।
नमो देवाधिदेवाय देवानां परमात्मने ।
पुरुषाय पुराणाय विष्णवे प्रभविष्णवे ॥

Colophon. इति कूर्म्मपुराणे पूर्व्वभागः समाप्तः । त्रिपञ्चाशत्तमोऽध्यायः ॥

विषयः । १ अध्याये,—सूतेन सह ऋषीणां संवादः । रोमहर्षणनामनिरुक्तिः । महापुराणोपपुराणनामसङ्ख्यादिः । पुराणलक्षणं । समुद्रमन्थनकाले भगवतः कूर्म्मरूपधारणं । नारदादिभ्यो भगवतो लक्ष्मीपरिचयदानं । इन्द्रद्युम्नचरित्रकीर्त्तनं । लक्ष्मीसकाशात् तस्य तत्त्वज्ञानलाभः । तत्कृतविष्णुस्तुतिः । तस्मै कूर्म्मरूपस्य विष्णोः सदाश्रया, अयत्नाश्रया, ब्राह्मी चेति त्रिविधभावनाद्युपदेशदानं ।

२, ३ अ०,—सहानायामाहात्म्यं । मरीच्यादीनां ब्राह्मणादीनाञ्च सृष्टिः । ब्राह्मणस्य यजन-याजन-दानप्रभृतिषट्कर्म्माणि । दानाध्ययनादिरूपक्षत्रियकर्म्माणि । दानाध्ययनकृष्यादिरूपवैश्यकर्म्माणि । द्विजशुश्रूषारूपशूद्रकर्म्म । गृहस्थ-वनस्थ-भिक्षुक-ब्रह्मचारिणां धर्म्मकथनादिः । गार्हस्थ्याश्रमकर्म्मयोगप्रशंसा । क्षमादयादानादिचातुर्वर्ण्यधर्म्मः । गृहस्थसन्न्यासिप्रभृतीनामवान्तरभेदः । ब्रह्मविष्णुशि-

विषयः। वानां वस्तुतोऽभेदः । वैष्णव-शाक्त-शैवाश्रमकथनं । त्रिपुण्ड्रधारणावश्यकता । आश्रमग्रहणक्रमकथनञ्च ।

४, ५ अ०,—आदिसृष्टिविवरणं। तत्र चतुर्व्यूहकथनं। ब्रह्मस्वरूपं। प्रकृतिक्षोभेण महदादिसृष्टिः। ब्रह्मविष्णुशिवानां रजःसत्त्वादिगुणाश्रयत्वेन स्रष्टृत्वादिः। अजप्रजापतिमहादेवप्रभृतिनामनिरुक्तिः। कालसङ्ख्या। युगसन्धिपरिमाणादिः। भगवतः कालात्मकत्वकथनञ्च।

६, ७, ८ अ०,—नारायणाख्यब्रह्मस्वरूपं। तत्स्तुतिः। तमोमोह-महामोहादिपञ्चविधाविद्याकीर्त्तनं। महद्-भूतवैकारिकैन्द्रियक-मुख्य-तिर्य्यक्स्रोतःप्रभृतिनवविधसृष्टिः। सनक-सनातन-सनन्दनादयः पञ्चयोगिनः। महादेवोत्पत्तिः। जगत्सृष्टिः। ब्रह्मणो देहार्द्धभागाभ्यां स्त्रीपुरुषोत्पत्तिः। मन्वादीनां सन्ततिः। दक्षकन्यकाः। पितरः। धर्म्मादीनां यशःकीर्त्तिप्रभृतिपुत्रकथनञ्च।

९ अ०,—पद्मनाभनाभिपद्मे हिरण्यगर्भस्य जन्मवृत्तान्तः। अन्योन्यं संलपतोः कमलेशकमलजयोः समीपे महादेवस्याविर्भावः रूपवर्णनञ्च। प्रीतस्य तस्य ब्रह्महरिभ्यां वरदानं। ब्रह्मपुत्रत्वकथनञ्च।

१० अ०,—मधुकैटभौ निहत्य प्रवेश्य च स्रष्टारं निजशरीरे नारायणाख्यब्रह्मणो-योगनिद्रा। कोपाविष्टस्य ब्रह्मणः अश्रुविन्दुभ्यः प्रेतोत्पत्तिः। प्राणमयरुद्रोत्पत्तिश्च। रुद्रनामनिरुक्तिः। अष्टमूर्त्तयः। तत्पत्नीपुत्रादिकथनं। ब्रह्मकृतरुद्रस्तवनं। हरस्यान्तर्द्धानं। मरीच्यादीनां सृष्टिः।

११, १२ अ०,—तपस्यतो पितामहस्य समीपे अर्द्धनारीश्वररूपस्य रुद्रस्य प्रादुर्भावः। एकादशरुद्रोत्पत्तिः। दाक्षायण्या जन्मादिः। शिवशक्तिमाहात्म्यं। शक्तिशक्तिमतोरभेदः। मेनकागर्भे शिवशक्तेर्जन्म। चतुर्मुखाष्टभुजचन्द्ररेखादिलक्षणां तां विलोक्य भीतस्य हिमालयस्य अष्टोत्तरसहस्रनामभिस्तत्स्तुतिः। पुनर्नीलोत्पलदलश्यामां द्विभुजां सौम्यरूपाञ्च तां निरूप्य गिरिराजस्य तन्माहात्म्यवर्णनं। तस्मै देव्या उपदेशदानं। तत्र श्रुतिस्मृतिविरुद्धशास्त्राणां तामसत्वं। कापालभैरवयामलादीनां मोहनत्वं। चतुर्द्दशविद्याः। उपासनाफलं। देव्युपासनावश्यकत्वं। ज्ञानमाहात्म्यं। ब्रह्मस्वरूपं। कर्म्मज्ञान-भक्तियोगान्यतमेन ब्रह्मशरणावश्यकता। देवीमाहात्म्यफलश्रुतिः।

१३, १४, १५ अ०,—भृगु-मरीचि-वसिष्ठादीनां प्रियव्रतोत्तानपादादीनाञ्च सन्ततिकीर्त्तनं। पुराणवक्तुः सूतस्योत्पत्तिः। शिखण्डितनयस्य कुशलिनो महादेवार्च्चनवेदाध्ययनादिवृत्तान्तः। सप्तप्राचेतसानामुत्पत्तिः। दक्षोदितां शिवनिन्दामाकर्ण्य अपर्णाया देहत्यागः, हिमालयालये जननञ्च। दक्षाय शिवस्य शापदानं।

विषयः। जन्मान्तरेऽपि पूर्व्ववैरमनुस्मृत्य दक्षस्य विरूपाक्षभागरहितयज्ञानुष्ठानं। दक्ष-दधीचिसंवादः। वृत्तान्तमिममुपश्रुत्य देवीमुखाद् देवदेवस्य वीरभद्रसर्ज्जनं गणाधिपं पुरस्कृत्य वीरभद्रादीनां यज्ञनाशनं। भर्गनेत्रवह्निजिह्वादिनाशः। तैः सह विष्णोर्युद्धं। महादेवागमनं। दक्षमुपदिश्य सपरिवारस्य तस्य प्रस्थानं। ब्रह्मणः शिवमाहात्म्यकथनञ्च।

१६ अ०,—दक्षकन्यानां विवाहः। अष्टौ वसवः। धर्म्म-ध्रुव-पवन-चन्द्र-विश्व-कर्म्मादीनां पुत्रकथनं। दितिसन्तानकथनं। पितामहं पुरस्कृत्य हिरण्यकशिपु-विप्रकृतानामिन्द्रादीनामुपेन्द्रसमीपे स्वावस्थाकथनं। समरसमये हिरण्यकशिपु-पादताड़ितस्य भगवतः वैष्णवपुरुषस्य अन्तर्द्धानं। हिरण्याक्षाक्षिप्तपाशुपतास्त्रे-णापि अक्षतदेहं नृसिंहरूपं भगवन्तं निभाल्य नूनं वासुदेवोऽयमिति विसृश्य विसृज्य च शस्त्राणि प्रह्लादस्य तच्चरणावनमनं। हिरण्यकशिपुबधः। हिरण्याक्षस्य पाताले पलायनं। भगवतो वराहरूपेण तन्निधनं। प्रह्लादं प्रति ब्राह्मणशापः। तेन सार्द्धं भगवतो युद्धं। पुनः पूर्व्वसंस्कारात् भगवज्ज्ञानेन तन्मुक्तिः। गोबध-वृत्तान्तकथनपूर्व्वकं गोतमनामनिरुक्तिः। ऋषीन् प्रति गोतमस्य शापदानं। लो-कानां मोहनाय कापाल-पाञ्चरात्र-पाशुपतादिशास्त्ररचना। अन्धकासुरस्य गिरिजाहरणोद्योगः। अन्धकसमीपाद्देवानां पराजयः। शूलिना शूलेन ताड़ित-हृदयस्य अन्धकस्य तत्स्तवनादिः। तस्य नन्दीश्वरानुचरत्वकथनञ्च।

१७, १८ अ०,—सनत्कुमार-विरोचनसंवादः। बलेर्द्देवानां पराजयः। अदिते-स्तपस्या, विष्णुस्तवनञ्च। प्रह्लादबलिसंवादः। अदितिगर्भे भगवतो जन्मग्रहणादिः। वामनरूपेण बलिसमीपे त्रिपादभूमिप्रार्थनादिः। गङ्गोत्पत्तिः। बलेः पातालप्रवेशः। वाणोपद्रुतेन वृन्दारवृन्देन संस्तुतस्य आशुतोषस्य वाणपुरदाहनादिः। कद्रुविन-तादीनां सन्ततिकीर्त्तनं।

१९, २०, २१ अ०,—नैध्रुव-रैभ्य-शाण्डिल्य-पुलस्त्य-मरीचिप्रभृतीनामृषीणां वंश-कीर्त्तनं। सञ्ज्ञा-राज्ञिप्रभादिसूर्य्यपत्नीकथनं; तासां गर्भे मनु-यम-यमुनादीनां जन्म। इक्ष्वाकुवंशकथनं। सावस्तेः गौड़देशे सावस्तिनामपुरनिर्म्माणं। धुन्धु-मारादीनां वंशः। तत्र विशेषेण त्रिधन्वराजोपाख्यानं। सङ्क्षेपेण रामपरिणयन-वनगमन-सीताहरण-सेतुबन्धन-रामेश्वरलिङ्गस्थापन-रावणनिधनादिकथनं।

२२, २३ अ०,—चन्द्रवंशकीर्त्तनं। तत्र विशेषेण शूर-शूरसेन-जयध्वजादीनां वृत्तान्तः। तेषां समीपे सप्तर्षीणां सुरनरकिन्नरप्रभृतीनामाराध्यदेवताकथनं। सार्द्धञ्च तैः समरसमये सुदर्शनेन भगवतो विदेहनामदानवघातनादिः। ततो जय-ध्वजवंशजस्य दुर्ज्जयस्य उर्व्वशीगमनरागादिकथनं। तस्य पुनः स्वपत्न्याः पतिव्रताया

विषयः। उपदेशेन कण्वाश्रमगमनं। ततो गन्धर्व्वहननपूर्व्वकविचित्रमालाग्रहण-सुरसुन्दरी-परित्याग-वाराणसीगमनादिवृत्तान्तकथनञ्च।

२४, २५ अ०,—क्रोष्टुवंशकथनं। तत्र मृगयागतस्य नवरथस्य राज्ञो राक्षसदर्शनादिवृत्तान्तः। यदुवंशकीर्त्तनं। तत्र पुत्रलाभार्थं श्रीकृष्णस्य तपश्चरणादिः। तस्य पुनः मुनीश्वरसमीपे शिवाराधनादिस्थानजिज्ञासा। ततस्तदुपदेशेन सङ्कीर्त्य कृत्तिवासोगुणगानं। तद्दर्शनसञ्जातानन्दस्य नन्दनन्दनस्य नन्दीशवन्दनञ्च।

२६, २७ अ०,—गिरिशेन सह गिरिधरस्य कैलासगमनपूर्व्वकं विविधविलासकीर्त्तनं। पुनस्तस्य विशेषेण द्वारवतीप्रवेशवृत्तान्तादिवर्णनं। मार्कण्डेयसमीपे हरिहरयोरैक्यकथनं। लिङ्गोत्पत्तिविवरणकीर्त्तनञ्च। कलियुगे भगवद्भजनावश्यकता।

२८, २९ अ०,—गतवति कीर्त्तिशेषं शेषशयने द्वैपायनेन सममर्ज्जुनस्य संवादः। काशीवासप्रशंसा। युगधर्म्मकथनं। तत्र वेदभेदकारणकीर्त्तनञ्च।

३०, ३१, ३२, ३३, ३४, ३५ अ०,—अत्र षडध्यायाः पतिताः।

३६, ३७, ३८, ३९ अ०,—मार्कण्डेययुधिष्ठिरसंवादः। प्रयागमाहात्म्यं। तत्र यात्राविधिः। बलिवर्द्दारोहणेन तत्र गमने दोषः। कन्यादानफलं। प्राणत्यागफलं। माघमासे तत्र स्नानफलं। वटेश्वरमाहात्म्यादिकीर्त्तनञ्च।

४०, ४१, ४२ अ०,—प्रियव्रतपुत्राणां अग्नीध्रमेधातिथिप्रभृतीनां जम्बूप्लक्षादिसप्तद्वीपाधिपत्यकीर्त्तनं। तेषां पुत्रादिनाम्ना तत्र तत्र वर्षसञ्ज्ञाकथनञ्च। चन्द्र-बुध-बृहस्पतिप्रभृतीनामुच्चनीचत्वादिकथनं। छन्दोनामानि। यमलोकादिकथनं। अहोरात्रकारणनिरूपणं। द्वादशादित्याः। ब्रह्मवादिनो मुनयः। भूर्लोकादिसंस्थानकथनं। सप्तसञ्ज्ञकवायुनेमिकीर्त्तनं। भूर्लोकात् सूर्य्यादीनां दूरत्वपरिमाणं। तेषां विष्कम्भविस्तारादिकीर्त्तनञ्च।

४३, ४४, ४५ अ०,—सूर्य्यस्य सप्तविधरश्मिनिरूपणादिः। तत्सहस्रसञ्ज्ञककिरणानां विभागशो वर्षणादिकारणत्वकीर्त्तनं। वसन्तादौ सूर्य्यवर्णकथनं। बुधादिग्रहाणां सूर्य्यमभितो भ्रमणकथनं। चन्द्रादीनां त्रिचक्ररथादिकथनं। महर्लोकसत्यलोकविष्णुलोकादिकथनं। सप्तपातालकथनं। जम्बूद्वीपसुमेरुप्रभृतीनां संस्थानपरिमाणादिकथनं। तत्र वर्षपर्व्वतादिकीर्त्तनञ्च।

४६, ४७, ४८ अ०,—महादेव-देवेन्द्र-यमादीनां पुरीकथनं। केतुमाल-भद्राश्वादिषु स्थितानां स्त्रीपुरुषादीनां वर्णादिकथनं। कुलपर्व्वताः। नागद्वीपादिविवरणं। नदीनामानि। पौण्ड्र-कलिङ्ग-मागधादिदेशाः। हेमकूटशिखरे महादेवपुरी। जैगीषव्याश्रमः। लक्ष्म्यादीनां वासस्थानं। अञ्जन-सुगन्धादिगिरिषु अप्सरआदीनां निवासकीर्त्तनञ्च।

४९, ५०, ५१ अ०,—श्वद्वीपवर्णनं। तत्र कुलपर्व्वतनदीवर्षादयः। कुशद्वीप-वर्णनं। क्रौञ्चद्वीपादिकथनं। विशेषेण श्वेतद्वीपवर्णनं। पुष्करद्वीपस्थवटवृक्षे ब्रह्मावस्थानवृत्तान्तकथनं। गतागतमन्वन्तरवृत्तान्तकीर्त्तनञ्च।

५२. ५३ अ०,—अष्टोत्तरविंशतिव्यासाः। विभागपूर्व्वकं द्वैपायनव्यासस्य वैशम्पायनादिभ्यो वेदसम्प्रदानविवरणं। वेदानां शाखासङ्ख्याः। कलियुगे शिवावतार-कथनं। योगिनः। एतत्पाठनादिफलश्रुतिः॥ इति पूर्व्वभागः।

No. 1267. कूर्म्मपुराणोत्तरभागः।

Substance, country-made yellow paper, 14 × 10 inches. Folia 122. Lines, 25 on a page. Extent, 3,050 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Kúrma Puráṇa, uttarabhága. The second part of the work described in the last preceding number. It comprises the I'svara Gítá and the Vyása Gítá.

Beginning. ऋषय ऊचुः। भवता कथितः सम्यक् सर्गः स्वायम्भुवः शुभः।
ब्रह्माण्डस्यास्य विस्तारो मन्वन्तरविनिश्चयः॥
भद्रेश्वरेश्वरो देवो वर्णिभिर्धर्म्मतत्परैः।
ज्ञानयोगरतैर्नित्यमाराध्यः कथितश्च यत्॥
तद्वदाशेषसंसारदुःखनाशनमुत्तमं।
ज्ञानं ब्रह्मैकविषयं येन पश्येम तत्परं॥
त्वं हि नारायणः साक्षात् कृष्णद्वैपायनात् प्रभोः।
अवाप्ताखिलविज्ञानस्तत् त्वां पृच्छामहे पुनः। इत्यादिः।

End. अवाप्तवान् पञ्चशिखो देवलादिदमुत्तमं।
सनत्कुमाराद् भगवान् मुनिः सत्यवतीसुतः॥
एतत्पुराणं परमं व्यासः सर्व्वार्थसञ्चयं।
तस्माद् व्यासादहं श्रुत्वा प्रख्यतां पापनाशनं॥
ऊचिवान् वै भवद्भिश्च दातव्यं धार्म्मिके जने।
तस्मै व्यासाय मुनये सर्व्वज्ञाय महर्षये॥
पाराशर्य्याय शान्ताय नमो नारायणात्मने।
यस्मात् सञ्जायते कृत्स्नं यत्र चैव प्रलीयते॥
नमस्तस्मै परेशाय विष्णवे कूर्म्मरूपिणे॥

Colophon. इति श्रीकूर्म्मपुराणे उपरिभागे षट्‌साहस्र्यां संहितायां व्यासगीतासु सप्तचत्वारिंशोऽध्यायः ॥०॥ ४७ ॥ समाप्तश्चेदं कूर्म्मपुराणं ॥

अतः परं पुराणस्यास्यैका अनुक्रमणिका वर्त्तते। सा तु पृष्ठैकमितेति शं।

विषयः। १, २ अ०,—सत्यवतीतनयेन सह ऋषीणां संवादः। सनत्कुमार-सनन्दन-सनकप्रभृतीनां नरनारायणस्वरूपदर्शनक्षणे चण्डेशभूषणस्य प्रादुर्भावं प्रेक्ष्य तत्स्तवनं। तेषां निर्व्वन्धातिशयेन अन्धकरिपोरात्मतत्त्वज्ञानकथनं। तत्र ब्रह्मणो निर्व्विशेषत्वं। संसारस्याज्ञानमूलत्वं। आत्मस्वरूपं। साङ्ख्ययोगमाहात्म्यञ्च।

३, ४, ५ अ०,—प्रधानपुरुषकालानामनादित्वं। सर्व्वेभ्यः शर्व्वस्य परमत्वं। तस्य परममाहात्म्यादिकीर्त्तनञ्च। ब्रह्मविष्णुरुद्राणां तदात्मकत्वं। व्यासकृतशम्भिशेखरपरमरूपवर्णनं। तद्गुणगानं। तस्य जगदात्मकत्वकीर्त्तनञ्च।

६ ७, ८, ९ अ०,—ईश्वरगीता। तत्र महादेवमाहात्म्यं। विभूतियोगः। चतुर्व्विंशतितत्त्वानि। पाशनिरूपणं। अविद्यादिपञ्चविधक्लेशकथनं। मूलप्रकृतिस्वरूपं। पुनरीश्वरमाहात्म्यं। नित्य-निरञ्जन-निष्कामस्य कामरिपोः कथं विश्वरूपत्वमिति प्रपञ्चः। तद्दर्शनोपायः। कैवल्यस्वरूपकीर्त्तनञ्च।

१०, ११ अ०,—ईश्वरयोगप्रशंसा। अपरयोग-महायोगयोर्लक्षणं। अन्यविधयोगनिन्दा। प्राणायामादियोगाङ्गानि। चित्तशुद्ध्युपायः। अहिंसालक्षणं। वैधहिंसाया अहिंसात्वं। सत्यलक्षणं। स्तेयास्तेयब्रह्मचर्य्य-परिग्रहाणां लक्षणं। योगसिद्ध्युपायः। तपस्या-स्वाध्याययोर्लक्षणं। वाचिकोपांशुमानसानां स्वाध्यायभेदानां लक्षणं। सन्तोष-शौच-शौचभेदानां लक्षणं। उत्तमादिभेदेन प्राणायामत्रैविध्यं। पुनस्तस्य सगर्भ-गर्भभेदात् द्वैविध्यलक्षणादिः। तत्सञ्ज्ञानिरुक्तिः। रेचक-पूरकादीनां लक्षणं। आसनादीनां विभागकथनं लक्षणञ्च। योगसाधनप्रकारः। एतत्फलश्रुतिकीर्त्तनञ्च। ईश्वरगीता समाप्तिः।

१२, १३ अ०,—ब्रह्मयोगकथनं। तत्र उपनयनकालः। उपवीतलक्षणभेदाः। तद्धारणप्रकारादिः। मेखला। प्रातःकृत्यादिकथनं। गुर्व्वादीनामभिवादनप्रकारः। ब्राह्मणक्षत्रियादिषु कुशलादिजिज्ञासानियमः। गुरवः। तेषां पत्न्यः। एतैः सार्द्धमुपवेशनादिनियमः। सर्व्वत्र मातुः श्रेष्ठत्वं। अग्रजस्यावमाननायां दोषः। पितृव्य-मातुलादीनां पुरतः प्रत्युत्थाय 'असावहमिति' कथनौचित्यं। भिक्षादीनां नियमकथनञ्च। उच्छिष्टादिविवेचनं। विण्मूत्रादित्यागस्थाननियमादिकथनं।

१४ अ०,—गुरुशुश्रूषणप्रकारः। ब्रह्मचारिणो नृत्यगीतद्यूतादिवर्ज्जनावश्यकता। उत्पथादिप्रतिपन्नगुरुपरित्यागकर्त्तव्यता। गुरुपत्नीकृत्यं। तरुण्या गुरुपत्न्याः पाद-

विषयः। स्पर्शपूर्व्वकं प्रणामादिनिषेधः। पितृस्वस्रादिषु मातृवत्सम्मानादिकर्त्तव्यता। वेदाध्ययननियमः। गायत्रीजपप्रकारः। अनध्यायकालादिनिरूपणञ्च।

१५, १६ अ०,—दारपरिग्रहनियमादिः। गार्हस्थ्यधर्म्माः। ब्राह्मणलक्षणं। शमदमादीनां लक्षणं। हिंसामिथ्याऽप्रियवचनादिपरित्याज्यता। प्रतिग्रहनियमः। ब्रह्मस्वापहरणादिनिषेधः। पाषण्डि-वामाचार-पाञ्चरात्राणां वाङ्मात्रेणापि अर्च्चनप्रतिषेधः। निवासयोग्यदेशनिरूपणादिः। पङ्क्तिभोजनादिनियमः। आत्मप्रशंसापरनिन्दादिवर्ज्जनं। नग्नस्त्रीदर्शन-सस्त्रीकभोजन-स्नान-मोहादिपरिवर्ज्जनीयता। पादप्रक्षालनशयनस्पर्शनादिनियमः।

१७ अ,—अनापदि शूद्रनटगणिकाद्यन्नभोजने दोषः। मूल्यदानेन शूद्रगृहजातपायसस्नेहपक्वादिद्रव्याणां भोज्यता। पलाण्डु-लशुनादिभक्षणनिषेधः। भावदुष्टान्नादिनिन्दा। आविकादिक्षीरपाननिषेधः। बक-हंसदात्यूहादिमांसाभोज्यता। सशल्कमत्स्यभोजनादिर्विधिः।

१८ अ०,—ब्राह्मणानां प्रातःकृत्यविधिः। सन्ध्योपासनादीनां कर्त्तव्यता। सूर्य्यहृदयस्तोत्रं। दर्भसूत्राभ्यां विना कर्म्मानुष्ठाने दोषः। मध्याह्नकृत्यं। जपनियमाः। तर्पणविधिः। हरिहरादीनां पूजनविधानं। देवयज्ञपितृयज्ञप्रभृतिपञ्चयज्ञकथनं। हन्तकारलक्षणं। अतिथिपूजावश्यकता।

१९ अ०,—भोजने दिगादिनियमः। सूर्य्यग्रहणादिकाले भोजनकालादिनिरूपणं। भोजनादीनामात्मार्थे निष्फलत्वं। अन्धकारादौ तन्निषेधः। सायाह्नकृत्यं। शयननियमः।

२०, २१, २२ अ०,—नित्यनैमित्तिककाम्यभेदात् त्रिविधश्राद्धकथनं। नक्षत्रवारतिथिविशेषे श्राद्धकरणे फलविशेषकथनं। गयागङ्गाप्रयागादौ तदनुष्ठानफलं। श्राद्धे दानयोग्यफलमूलमत्स्यमांसादिनिरूपणं। पिण्डान्वाहार्य्यकश्राद्धविधानं। पङ्क्तिपावनलक्षणं। पात्रयोग्यब्राह्मणनिर्व्वचनं। पङ्क्तिदूषकलक्षणं। वर्ज्जनीयब्राह्मणनिरूपणं। निमन्त्रणादिविधिः। श्राद्धयोग्यदेशः। तदनुष्ठानप्रकारः। श्राद्धदिने स्त्रीसंसर्गादौ दोषः। आमान्नश्राद्धविधिः। एकोद्दिष्टनान्दीमुखश्राद्धादिकालकथनञ्च।

२३, अ०,—ब्राह्मणादीनां जननमरणशवानुगमनाद्यशौचकथनं। सापिण्ड्यादिनिरूपणं। नैष्ठिक-वनस्थादीनामशौचप्रतिषेधः। अशौचिगृहादानयोग्यद्रव्याणि। पर्णदाहविधिः। आद्यश्राद्धमासिकसपिण्डदानादिविधानञ्च।

२४, २५ अ०,—अग्निहोत्रादिविधानं। श्रुतिस्मृत्योरभावे शिष्टाचारस्य प्रामाण्यं। शिष्टलक्षणं। साधकाऽसाधकभेदेन द्विविधगृहस्थकथनं। आपत्काले ब्राह्मणस्य क्षत्रियवृत्तिराश्रय एवं क्षत्रियस्य वैश्यवृत्त्यवलम्बनमित्यादिकथनं।

2 M

विषयः। २६, २७ अ०,—दानधर्म्मकीर्त्तनं। दानलक्षणं। नित्यनैमित्तिकादिभेदेन तस्त्रैविध्यं। तत्र तिथ्यादिविशेषे अन्नजलभूमिदानादिफलश्रुतिः। पात्रविवेचनं। दानादाननियमाः। वानप्रस्थाश्रमकर्म्मनिरूपणं। तपश्चरणप्रकारः।

२८, २९ अ०,—सन्न्यासग्रहणसमयः। ज्ञानसन्न्यासि-वेदसन्न्यासिप्रभृतिकथनं। सन्न्यासधर्म्मनिरूपणं। तत्र भोजनादिनियमः। अलावुपात्रादिपरिग्रहः। ध्यानप्रकारः। स्त्रीसंसर्गादिनिषेधश्च।

३०, ३१, ३२, ३३, ३४ अ०,—महापातकादिप्रायश्चित्तकीर्त्तनं। ब्रह्महत्याप्रायश्चित्तं। शिवकृतब्रह्मशिरश्छेदनवृत्तान्तकथनपूर्व्वकं कपालमोचनतीर्थमाहात्म्यकीर्त्तनं। सुरापान-सुवर्णापहरणमातृस्वस्रादिगमनप्रभृतीनां प्रायश्चित्तकथनं। जीवहिंसावृक्षादिच्छेदनाभक्ष्यभक्षणादीनां प्रायश्चित्तकथनं। पतिव्रताप्रशंसा। अत्र सीताया वह्निशुद्धिवृत्तान्तकीर्त्तनञ्च।

३५, ३६ अ०,—गया-प्रयाग-त्रियम्बक-सोमेश्वर-विजय-पुरुषोत्तम-गोकर्ण-कुब्जाम्र-कोकामुख-शालग्राम-हयतीर्थ पुष्कर-सप्तसारस्वतप्रभृतिनानाविधतीर्थविवरणं। तत्र महादेवेन सह कङ्कणकमुनेः संवादकथनं। पुना रुद्रकोटि-मधुवन-कालञ्जर-प्रभृतितीर्थवृत्तान्तः। तत्र कालञ्जरतीर्थकथनप्रसङ्गेन कालेन समं श्वेतराजसंवादकीर्त्तनञ्च।

३७ अ०,—केदार-प्लक्षावतरण-मगधारण्य-महातीर्थ-श्रीपर्व्वत-गोदावरी-कावेरी-प्रभृतितीर्थकथनं। पुनश्चन्द्र-पुण्डरीक-ब्रह्म-प्लक्षप्रस्रवण-व्यास-यमुनाप्रभ-कुवेरतुङ्गोत्तमाङ्ग-कालसर्पिर्दशार्ण-कनकनन्दा-वदरिकाश्रमप्रभृतितीर्थानि।

३८, ३९, ४० अ०,—स्त्रीरूपधारिणं गिरिधरं पार्श्वतो निधाय आकलित-जातरूपरूपस्य विरूपाक्षस्य देवदारुवनप्रवेशपूर्व्वकं मोहितमुनिकुमारीकुमारकवृन्दस्य च वशिष्ठाश्रमप्रवेशः। अरुन्धत्या कृतातिथ्यस्य च तस्य ततो विनिष्क्रम्य लिङ्गोत्पाटनादिपुरःसरं मुनिसमाजादपसरणं। ब्रह्मोपदेशेन मुनीनां शिवलिङ्गोपासना। गिरिजया सह गिरिशस्य तत्र आविर्भावः। स्तवनेन प्रीतस्य तस्य मरीच्यादिसमीपे तत्त्वज्ञानकीर्त्तनञ्च।

४१, ४२, ४३, ४४, ४५ अ०,—नर्म्मदामाहात्म्यं। माहेश्वर-पुष्करिणी-शक्र-ऋषिऋण-दीप्तेश्वर-व्यास-मातृ-सोम-काम-शुक्ल-गणेश्वर-भृगु-गौतमेश्वर-हंसप्रभृतिनर्म्मदास्थतीर्थमाहात्म्यं। नैमिषारण्यमाहात्म्यं। नैमिषेतिसञ्ज्ञाविवरणं। जप्येश्वरमाहात्म्यकथनावसरे शिवानुग्रहेण शिलान्दस्य भूमिकर्षणकाले पुत्रलाभवृत्तान्तकीर्त्तनं। स तु कुमारः शिवाराधनेन नन्दीशत्वं प्रापेति कथनञ्च। जप्येश्वरसमीपस्थपञ्चनदमहाकालप्रभृतितीर्थमाहात्म्यकथनं।

४६, ४७ अ०,—नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्व्विधप्रलयस्वरूपकीर्त्तनं। प्रलयकालवर्णनं। वराहकल्पादिकथनं। प्रतिसर्गप्रक्रियाकीर्त्तनं। ब्रह्मादिसर्व्वदेवान् परित्यज्य शिवाराधनकर्त्तव्यता। जगतो ब्रह्ममयत्वं। ऋषीणां कूर्म्मरूप-भगवत्स्तुतिः। एतत्पुराणसङ्क्षिप्तकथा। एतत्पठनपाठनश्रवणादिफलकीर्त्तनञ्च।

No. 1268. रामायणतत्त्वदीपिका।

Substance, country-made paper, 14 × 7 inches. Folia, 163. Lines, 6 on a page. Extent, 4,063 s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Correct.

Rámáyaṇá-tattva-dípiká. A commentary on the Rámáyaṇa of Válmíki. By Mahes'vara Tírtha, disciple of Náráyaṇa Tírtha. The MS. comprises only the Yuddha Káṇḍa of the text.

Beginning. अथ श्रीमद्युद्धकाण्डे व्याख्येयानि व्याक्रियन्ते। एवमपारं पारावारं गोवत्सपदवत्समुत्तीर्य्य निरातङ्कं लङ्कां प्रविश्य सीतान्वेषणपूर्व्वकमशोकवनभङ्गादिकमतिमानुषं पौरुषं कृत्वा प्रतिनिवृत्तेन हनूमता प्रत्यभिज्ञानप्रदानपूर्व्वकमभिभाषितं सीतावृत्तान्तं श्रुत्वा रामस्तदाकर्णनमुदितमनाः, "कृतकार्य्ये भृत्यजने स्वामिना एवं भवितव्यम्" इति सदाचारमुपदेष्टुं सुग्रीवादिहरिवीराणामुत्साहमुत्पादयितुञ्च समाहृतप्रेयसीवृत्तान्तं हनूमन्तमस्तौषीदित्याह,—श्रुत्वेति। इत्यादिः।

End. शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा युज्यते सदा॥ इति वचनात्।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीनारायणतीर्थस्वामिशिष्य-श्रीमहेश्वरतीर्थविरचिते श्रीमद्रामायणतत्त्वदीपिकायां युद्धकाण्डे एकत्रिंशोत्तरशततमः सर्गः॥ ॥ १३१ ॥
महेशतीर्थरचिता रामपादसमर्पिता।
टीका श्रीयुद्धकाण्डस्य समाप्ता तत्त्वदीपिका॥

विषयः। वाल्मीकिरामायणयुद्धकाण्डव्याख्यानं।

No. 1269. रामायणतत्त्वदीपिका।

Substance, country-made paper, 14 × 7 inches. Folia, 138. Lines, 5 on a page. Extent, 3,050 s'lokas. Character, Nágara. Date, S. M. 1852. Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Correct.

Rámáyaṇa-tattva-dípiká. The last volume of the work described in the last preceding No. It comprises the Uttarakáṇḍa of the text.

Beginning. श्रीउत्तरकाण्ड++बहवः प्रक्षिप्तसर्गा इति
व्याख्याकर्तृभिरेव निपुणैस्तेषां न टीका कृता।
तेषां भावमशेषमत्र महतां ज्ञाते मया+++
सर्गाणां न कृता सदीक्षणवशात् टीकेति विज्ञायतां॥
एवं श्रीरामचन्द्रस्थितावतारोद्योगप्रभृतिश्रीरामाभिषेकपर्य्यन्तां कथां षड्भिः काण्डैरुपवर्ण्य अतः परं सीतारामयोर्यथार्थं प्रका+++रावणेन्द्रजिद्बालि-प्रभावकथनेन रामलक्ष्मणयोः प्रशंसाञ्च कर्त्तुं प्रथमं मुनीनामागमनमाह,—
प्राप्तेति। इत्यादिः।

End. तद्रामायणकाव्यं ब्रह्मा अन्वमन्यत सकलपुरुषार्थसाधकत्वेन अङ्गीकरोतिस्म इत्यर्थः।

Colophon. इति परमहंसपरिव्राजकाचार्य्यश्रीनारायणतीर्थशिष्यमहेश्वरतीर्थविरचित-श्रीरामायणतत्त्वदीपिकायां दशोत्तरशततमः (सर्गः)॥ ११०॥
महेशतीर्थरचिता रामपादसमर्पिता।
टीका तूत्तरकाण्डस्य समाप्ता तत्त्वदीपिका॥
श्रीरामायणसिन्धुमध्यमसकृत्संविश्य तत्रोद्भवा-
न्युत्कृष्टानि पदार्थरत्ननिकराण्युद्धृत्य सद्भिः पुरा।
टीकासम्पुटसञ्चितानि निपुणैस्तान्येव लब्ध्वा मया
श्रीनारायणतीर्थरामगुरुसत्पादार्पितान्यादरात्॥
श्रीरामायणटीकेयं महेशयतिना कृता।
शिवरामेण यतिना+++++ कारिता॥
यादृशी पुस्तिका दृष्टा तादृशी लिखिता मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
शुभमस्तु सं(वत्) १८५२।

विषयः। वाल्मीकिरामायणोत्तरकाण्डव्याख्यानं।

No. 1270. वराहपुराणं ।

Substance, country-made yellow paper, 12¼ × 9¼ inches. Folia, 277. Lines, 31 on a page. Extent, 9,123 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Varáha Puráṇa. The twelfth of the eighteen great Puráṇas attributed to Vyása. The following is Professor Wilson's account of this work:

"It is narrated by Vishṇu as Varáha, or in the boar incarnation, to the personified Earth. Its extent, however, is not half that specified; little exceeding ten thousand stanzas. It furnishes, also, itself, evidence of the prior currency of some other work, similarly denominated; as, in the description of Mathurá contained in it, Sumantu, a Muni, is made to observe: "The divine Varáha in former times expounded a Puráṇa, for the purpose of solving the perplexity of Earth."

"Nor can the Varáha Puráṇa be regarded as a Puráṇa agreeably to the common definition; as it contains but a few scattered and brief allusions to the creation of the world and the reign of kings: it has no detailed genealogies, either of the patriarchal or regal families, and no account of the reigns of the Manus. Like the Linga Puráṇa, it is a religious manual, almost wholly occupied with forms of prayer and rules for devotional observances, addressed to Vishṇu; interspersed with legendary illustrations, most of which are peculiar to itself, though some are taken from the common and ancient stock. Many of them, rather incompatibly with the general scope of the compilation, relate to the history of S'iva and Durgá. A considerable portion of the work is devoted to descriptions of various Tírthas, places of Vaishṇava pilgrimage; and one of Mathurá enters into a variety of particulars relating to the shrines of that city, constituting the Mathurá Máhátmya.

"In the sectarianism of the Varáha Puráṇa there is no leaning to the particular adoration of Kṛishṇa; nor are the Rathayátrá and Janmáshṭamí included amongst the observances enjoined. There are other indications of its belonging to an earlier stage of Vaishṇava worship; and it may, perhaps, be referred to the age of Rámáṇuja, the early part of the twelfth century." *Vishṇu Puráṇa*, p. LXX.

The guess about the date, as already elsewhere noticed, is wide of the mark. The MS. comprises 165 chapters numbered irregularly, and sometimes incorrectly. The subjects of these chapters have been detailed below in Sanskrit.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
नमस्तस्मै वराहाय लीलयोद्धरते महीं ।
खुरमध्यगतो यस्य मेरुः खणखणायते ॥
दंष्ट्राग्रेरुत्थिता गौरुदधिपरिहृता पर्व्वतैर्निम्नगाभिः
साकं मृत्पिण्डवत् प्राग्बृहदुरुवपुषानन्तरूपेण येन ।
सोऽयं कंसासुरारिर्मधुनरकदशास्यान्तकृत्सर्व्वसंस्थः
कृष्णो विष्णुः सुरेशोन्नुदतु मम रिपूनादिदेवो वराहः ॥
यः संसारार्णवे नौरिव मरणजराव्याधिनक्रोर्म्मिभीमे
भक्तानां व्याधिहर्त्तासुरनरकदशास्यान्तकृत्कोलरूपी ।
विष्णुः सर्व्वेश्वरोऽयं यमिह कृतधियो लीलया प्राप्नुवन्ति
मुक्तात्मानोऽनपायं भवति प्रणुदितारातिपक्षः क्षितीशः ॥
यस्मिन् काले क्षितिः पूर्व्वं कल्पे वराहरूपिणा ।
उद्धृतार्थमयो भक्त्या पप्रच्छ परमेश्वरं ॥
धरण्युवाच । कल्पे कल्पे भवानेवं मां समुद्धरति प्रभो । इत्यादिः ।

End. एषा चेयं वराहाख्या वराहस्य सदा प्रिया ।
य एतां द्विजमुख्याय वाचकाय ददाति च ॥
स राज्यमतुलं भुक्त्वा कुलैः सार्द्धं व्रजेच्च मां ।
लिखितं तिष्ठते गेहे यस्य तस्य स्वयं हरिः ।
तिष्ठति स भवान् रुद्रो ब्रह्मा चैवात्र तिष्ठति ॥

Colophon. इति (श्रीवराहपुराणे) भगवच्छास्त्रे वराहपुराणं समाप्तं ॥

विषयः । १ प्रथमे अध्याये,—धरणीवराहसंवादः । धरणीकर्तृकवराहस्तुतिः ।
२ अ०,—पुराणलक्षणकथनं । आदिसृष्टिकथनं । तत्र प्रकृतिपरिणामेन बुद्ध्यादिसृष्टिकथनं । रुद्रादीनामुत्पत्तिकथनादिः । दक्षादीनामुत्पत्तिकथनं । नारायणनामनिरुक्तिः । विस्तरेण सृष्टिप्रक्रियाकथनं । नवविधसृष्टिकथनं । ब्रह्मणो रुद्रादिसृष्टिः । स्वायम्भुवमनुवंशकीर्त्तनं । प्रियव्रतसमीपे नारदस्य सरसि सावित्रीदर्शनादिवृत्तान्तवर्णनं । सावित्र्यङ्गे वेददर्शनादिविवरणकथनञ्च ।
३ अ०,—नारदस्य नामव्युत्पत्तेः पूर्व्वजन्मवृत्तान्तस्य च वर्णनं ।
४ अ०,—दशावतारकथनं । ईश्वरः पञ्चभूतमय इत्यादिकीर्त्तनं । अश्वशिरसो राज्ञ उपाख्यानं । तत्र ब्राह्मणवेशेन उपस्थितयोः केशवकेशववाहनयोः स्वरूपप्रदर्शनपूर्व्वकं ब्रह्मादीनां सर्व्वेषां विष्ण्वात्मकत्वप्रकाशः ।

विषयः। ५ अ०,—किं कर्म्मशीलो मोक्षभागी उत ज्ञानी इत्यादिनिरूपणं। रैभ्यबृहस्पति-संवादः। लुब्धकसंयमनवृत्तान्तः। योगकथनं। योगेन अश्वशिरसः कृष्णप्राप्तिः।
६ अ०,—काश्मीराधिपतिर्वसुरेव लुब्धक इत्यादिवृत्तान्तवर्णनं। पुण्डरीकाक्षपारस्तोत्रकथनं। व्याधवाक्यात् वसोः पूर्व्वजन्मवृत्तान्तस्मरणं।
७ अ०,—वसोः स्वर्गारोहणं श्रुत्वा रैभ्यस्य तपस्याचरणं। तत्र तेन सह सनत्कुमार-संवादः। विशालाधिपतेर्विशालन्टपतेरुपाख्यानं। विष्णुप्रसादाद् विशालस्य मोक्षप्राप्तिः।
८ अ०,—रैभ्य विमुक्ते तद्देहस्थः पापपुरुषः धर्म्मव्याधो बभूवेत्यादिवृत्तान्तकथनं। पशुहिंसादोषकथनं। धर्म्मव्याधो विष्णुस्तवनेन तन्मयोऽभूदित्यादिकीर्त्तनं।
९ अ०,—प्रणवमाहात्म्यं। ॐकाररूपो हरिरितिकथनं। ततो लोकस्य सृष्टिः। वेदाविर्भावः। मत्स्यरूपेण भगवता वेदोद्धारः। तस्य स्तवनकीर्त्तनञ्च।
१० अ०,—आदिवराहसमीपे देवानां वरग्रहणं। सुप्रतीकोपाख्यानं। दुर्ज्जयकर्त्तृक-स्वर्गपराजयः। तेन सह विद्युत्सुविद्युन्नामकासुरयोः संवादः। हेतिप्रहेतिभ्यां दुर्ज्जय-समीपे पराजितानां देवानां विष्णुसमीपगमनादिवृत्तान्तकथनं। दुर्ज्जयाय हेतिप्रहे-तिभ्यां कन्यायुगलसम्प्रदानं। सुकेशीमिश्रकेश्योर्गर्भे तस्य पुत्रयुगजननादिकथनं।
११ अ०,—दुर्ज्जयस्य गौरमुखमुनेराश्रमप्रवेशः। भोजनं सर्व्वेषां कारयिष्यामीति मुनिवचनं श्रुत्वा तस्य कोपः। गौरमुखः विष्णुस्तवनेन चिन्तामणिं प्राप्य तत्प्रभा-वाद् दिव्यपुरीं निर्म्माय सबलस्य राज्ञः परमातिथ्यं कृतवान्। ततो बलात्कारेण मणिग्रहणोद्यते तस्मिन् गौरमुखस्य मन्यूद्भूतेन सैन्येन राजसेना हतेति वर्णनं। नारायणस्तु गौरमुखकृतस्तवेन तत्रागत्य निमिषेण सुदर्शनेन दुर्ज्जयं जघान, तेन च तत्स्थानं नैमिषेतिसञ्ज्ञया विख्यातमित्यादिकथनञ्च।
१२ अ०,—दुर्ज्जयनिधनं निशम्य सुप्रतीकस्य श्रीरामस्तवनं। तस्य श्रीरामदर्शना-दिविवरणं।
१३ अ०,—गौरमुखस्य भगवदाराधनार्थं प्रभासतीर्थगमनं। तेन सह मार्कण्डेयस्य संवादः। पितृलोकसृष्टिकथनं। तेषां नाम कथनं। तिलोदकादिदानं। पितृ-गीतादिकथनञ्च।
१४ अ०,—श्राद्धे ब्राह्मणनिरूपणं। श्राद्धे पात्रकरणायोग्यनिरूपणञ्च। तत्र निम-न्त्रणप्रकारकथनादिः। श्राद्धकथनं। तत्र मांसनिरूपणादिः। विहिताविहित-द्रव्यकथनं। श्राद्धकालकथनादिकञ्च।
१५ अ०,—गौरमुखः श्राद्धैः पितृलोकान् सन्तर्प्य भगवन्तं स्तुत्वा च परमां गतिं प्रापेत्यादिकथनं।

विषयः। १६ अ०,—विद्युत्सुविद्युतोर्बधार्थं देवानां यज्ञकरणोद्योगः। गवां रक्षार्थं सरमानियोगः। गवामसुरसान्निध्यगमनादिकथनं। सरमाशासनं। देवानां यागकरणं। असुराणां पराजयकथनं।

१७ अ०,—प्रजापालोपाख्यानं। आश्रमागतेन तेन सार्द्धं महातपसो मुनेः संवादः। अहं प्रधानोऽहं प्रधान इति विवदमानानां देवानां वृत्तान्तकीर्त्तनं। विष्णोः प्राधान्यकथनादिः।

१८ अ०,—अग्न्यादीनामुत्पत्तिकथनादिः। अग्नेर्गार्हपत्यादिनामनिरुक्तिः।

१९ अ०,—ब्रह्मणः कोपात् प्रतिपदि तिथावग्नेरुत्पत्तिकथनं। तत्र हवने सर्व्वेषां देवानां प्रीतिरिति कथनादिः।

२० अ०,—अश्विनीकुमारयोर्जन्मविवरणं। तयोः पितामहस्तुतिः।

२१ अ०,—रुद्रोत्पत्तिकथनं। रुद्रनामनिर्व्वचनं। ब्रह्मणा रुद्राय गौरीसम्प्रदानं। रुद्रे जलप्रविष्टे गौरीमन्तःशरीरगां कृत्वा ब्रह्मणः पुनर्दक्षादिसृष्टिकरणकथनं। दाक्षायणीजन्मविवरणं। दक्षयज्ञवर्णनं। रुद्रपार्षदैः सह सुराणां युद्धकथनं। हरिहरयोर्युद्धवर्णनं। शिवभागदानपूर्व्वकं देवानां तत्स्तुतिः। दक्षस्य रुद्राय गौरीसम्प्रदानं।

२२ अ०,—दक्षस्य वैरमनुस्मृत्य गौर्य्या हिमालये जन्मग्रहणं। गौर्य्यास्तपश्चरणं। महादेवेन सह तस्या विवाहवर्णनं। तृतीयायां तिथौ गौर्य्या जन्मकथनं। तत्तिथिमाहात्म्यकथनादिः।

२३ अ०,—गणेशोत्पत्तिविवरणं। तस्य गजवक्त्रत्वादिकारणकथनं। विनायकानामुत्पत्तिकथनं। तेषामाधिपत्ये गणेशस्याभिषेकविवरणं। देवगणकृतगणपतिस्तोत्रं।

२४ अ०,—नागोत्पत्तिविवरणं। ब्रह्मकर्तृकं तेषां निवासस्थानादिकथनं।

२५ अ०,—कार्त्तिकेयोत्पत्तिविवरणकथनादिः। देवगणकृतमहेशस्तुतिः। स्कन्दोत्पत्तिः। एतत्फलश्रुतिः।

२६ अ०,—सूर्य्योत्पत्तिविवरणकथनादिः। देववृन्दकृतसूर्य्यस्तुतिः।

२७ अ०,—अन्धकविप्रकृतानां देवानां दैन्यवर्णनं। गिरिशं निहत्य गिरिजां हरिष्यामीति अन्धकस्य तम्प्रति युद्धयात्रा। विष्ण्वादीनामन्धकेन सार्द्धमायोधनं। शूलेन विद्धस्यान्धकस्य भूमिस्पृष्टशोणिताद् बहूनामन्धकानामुत्पत्तिः। मातृगणकर्तृकं तेषां शोणितपानं। कामादिगुणानामुत्पत्तिकथनादिः।

२८ अ०,—सिन्धुद्वीपराजविवरणं। तस्य पूर्व्वजन्मनि वृत्तत्वकथनं। तपस्यतः सिन्धुद्वीपस्य वेत्रवतीनद्या मनुष्यरूपायाः पाणिग्रहणं। तस्यां वृत्रासुरस्य जन्म।

विषयः। तेन सह देवानां युद्धकीर्त्तनं। कात्यायन्या उत्पत्तिकथनं। महादेवकृतदेवीस्तवनादिकथनं।

२९ अ०,—दिशामुत्पत्तिकथनं। तासां लोकपालैः सह विवाहकथनादिः।

३० अ०,—धनदोत्पत्तिविवरणं। तन्नामनिर्व्वचनं। तत्सेवार्थं तिथिनिरूपणं।

३१ अ०,—ईश्वरस्य विष्णुरूपेण प्रादुर्भावकथनं। तस्य नाभिदेशात् कमलरूपायाः पृथिव्या उत्पत्तिकथनादिः। कर्णिकारूपसुमेरुमध्ये ब्रह्मणो जन्मकथनादिः। तत्कृतविष्णुस्तुतिः।

३२ अ०,—धर्म्मोत्पत्तिविवरणकथनादिः। युगविशेषे तस्य पादनिरूपणं। चन्द्रेण कृते ताराहरणे धर्म्मस्य वनप्रवेशः। तत्र देवानां स्तुतिकथनादिः।

३३ अ०,—रुद्राणामुत्पत्तिकथनादिः। पशुपतिरूपशिवस्तोत्रं।

३४ अ०,—पितृसर्गकथनादिः। तत्र तर्पणादितिथिकथनं।

३५ अ०,—चन्द्रम्प्रति दक्षशापविवरणं। समुद्रमन्थने तस्योत्पत्तिकथनादिः।

३६ अ०,—सुप्रभादिनृपाणां चरितकथनादिः। गोविन्दनामकहरिस्तुतिः।

३७ अ०,—भगवतो भावसाध्यताकथनादिः। ब्रह्मपुत्रस्य अवनेर्व्याधेन सह संवादः।

३८ अ०,—व्याधस्य तपस्यावर्णनादिः। तस्य दिव्यदेहप्राप्तिकथनादिः।

३९ अ०,—भगवत्साधनोपायवर्णनं।

४० अ०,—धरणीव्रतकथनादिः। तस्य फलश्रुतिकथनादिः। अत्र मार्गशीर्षे मासि महामीनरूपस्य भगवतः पूजाविधानं।

४१ अ०,—पौषशुक्लद्वादश्यां कूर्म्मरूपस्य तस्य पूजनं।

४२ अ०,—माघशुक्लद्वादश्यां वराहरूपस्य तस्य पूजनकथनादिः।

४३ अ०,—फाल्गुनशुक्लद्वादश्यां नृसिंहरूपस्य तस्य पूजाकथनादिः। अत्र पारसव्यराजोपाख्यानं।

४४ अ०,—एवं चैत्रमासे वामनरूपस्य तस्य पूजनकथनं। अत्र हयाश्वराजोपाख्यानं।

४५ अ०,—वैशाखमासे परशुरामरूपस्य तस्य पूजनं। अत्र वीरसेनराजोपाख्यानं।

४६ अ०,—ज्यैष्ठमासे रामलक्ष्मणपूजा। अत्र दशरथोपाख्यानं।

४७ अ०,—आषाढ़मासे श्रीकृष्णपूजनं। अत्र वसुदेवोपाख्यानं।

४८ अ०,—श्रावणमासे बुद्धपूजनं। अत्र नृगराजोपाख्यानं।

४९ अ०,—भाद्रमासे कल्किपूजनं। अत्र विशालराजोपाख्यानं।

५० अ०,—आश्विनमासे पद्मनाभपूजा। अत्र भद्राश्वराजोपाख्यानं।

५१ अ०,—कार्त्तिकमासे द्वादशीव्रतमाहात्म्यकथनं। इति धरणीव्रतं।

५२ अ०,—भद्राश्वागस्त्यसंवादः। दशादशविभागकथनं। योगकथनं। अगस्त्यगीता।

विषयः। ५३ अ०,—अगस्त्यगीतायां शरीरमधिकृत्य योगकथनं।
५४ अ०,—प्रवृत्तिनिवृत्तिकथनं। सर्व्वेषां देहे समानं वस्तु वर्त्तते इति कथनं च।
५५ अ०,—मानससरसि अप्सरसां नारदेन सह संवादः। तत्र वसन्तशुक्लद्वादश्यां हरिपूजनविधिकीर्त्तनं। तासां विष्णुप्राप्तिकथनं।
५६ अ०,—शुभव्रतविधानकथनादिः। अत्र करन्धमराजोपाख्यानं।
५७ अ०,—धन्यव्रतविधानकथनादिः।
५८ अ०,—कान्तिव्रतविधानकथनादिः।
५९ अ०,—सौभाग्यव्रतविधानकथनादिः। अत्र हरिहरयोरैक्यकथनञ्च।
६० अ०,—अविघ्नव्रतविधानकथनादिः।
६१ अ०,—शान्तिव्रतविधानकथनादिः।
६२ अ०,—कामव्रतविधानकथनादिः।
६३ अ०,—आरोग्यव्रतविधानकथनादिः। पुरा किल अनरण्यो नाम नरपतिर्मानससरसि मोहितो विशालकमलदर्शनेन तदाकलयितुं सम्प्रेरयामास स्वीयसारथिं। सारथिस्तु स्पर्शनक्षणे एव तन्मध्यजातकुमारशब्देन पद्मलमुपागतं, राजा च कुष्ठी संवृत्तः,-इत्यादिवृत्तान्तकथनं। राजसमीपे वसिष्ठस्य पद्मवृत्तान्तकथनञ्च।
६४ अ०,—पुत्रप्राप्तिव्रतविधानकथनादिः। अत्र शूरसेननृपोपाख्यानं।
६५ अ०,—शौर्य्यव्रतविधानकथनादिः।
६६ अ०,—सार्व्वभौमव्रत-धनदव्रत-वैष्णवव्रत-धर्म्मव्रत-रुद्रव्रतेन्द्रव्रत-पितृव्रतानां विधानकथनादिः।
६७ अ०,—नारदो भगवन्मायामुग्धो जनयामास पञ्च पुत्रान् काशीराजसुतायामित्यादिवृत्तान्तकथनपूर्व्वकं विष्णुमायाश्चर्य्यकीर्त्तनं। नारदकृतविष्णुस्तोत्रकथनं।
६८ अ०,—विष्णोर्नारदसमीपे जगदुत्पत्तिप्रकारप्रदर्शनं। तल्लयप्रकारप्रदर्शनञ्च। कालनिरूपणं। पञ्चरात्रशास्त्रोल्लेखादिः।
६९ अ०,—पूर्व्वाध्यायोक्तसंशयनिराकरणं।
७० अ०,—युगधर्म्मकथनं। तत्र विशेषेण कलिधर्म्मकथनं। शुद्धिकथनं।
७१ अ०,—अगस्त्यस्य इलावृतवर्षभ्रमणवृत्तान्तकथनादिः। तत्र बहुविधाश्चर्य्यघटनाकीर्त्तनं। जलरूपिनारायणवृत्तान्तकथनञ्च।
७२ अ०,—अगस्त्यस्य यज्ञानुष्ठानकाले सर्व्वेषां देवानामागमनं। तत्र शिवकर्त्तृकविष्णुप्राधान्यकथनादिः। कालो रुद्रेण मोहशास्त्रं प्रकाशितमित्यादिकथनञ्च।
७३ अ०,—रुद्रगीता। गोतमस्य जलप्रक्षेपेणापि गोर्मरणाद् गोघातित्वमित्यादिविवरणकथनं। गोदावरीनदीविवरणं। पाशुपती दीक्षा।

विषयः। ७४ अ०,—ब्रह्मविष्णुरुद्राणामभेदकथनादिः ।
७५ अ०,—रुद्रस्य जलमज्जनविवरणकथनादिः । तत्र रुद्रकृतविष्णुस्तुतिकथनादिः।
७६ अ०,—सङ्क्षेपेण मनुवंशकथनादिः। सप्तद्वीपाधिपादिकथनं। नववर्षाधिप-कथनादिः। भरतवंशकीर्त्तनं।
७७ अ०,—जम्बूद्वीपवर्णनं। तत्र पर्व्वतपरिमाणादिकथनं। नद्यादिकथनञ्च।
७८ अ०,—मेरोः पूर्व्वादिदिक्षु देवादीनामालयवर्णनं।
७९ अ०,—सुमेरुपरिमाणादिकथनं। कदम्बजम्बूप्रभृतिवृक्षविवरणं।
८० अ०,—विष्कम्भपर्व्वतचतुष्टयानां परिमाणादिकथनं। चैत्ररथादिवर्णनं। अरु-णोदयादिसरोवरवर्णनं। तच्चतुर्दिक्षु स्थितानां पर्व्वतानां नामकथनादिः।
८१ अ०,—लक्ष्म्यावासमहापद्मकथनं। विल्वबनकथनादिः। भद्रवनादिवर्णनञ्च।
८२ अ०,—मेरोर्दक्षिणप्रदेशे उडुम्बरवनवर्णनं। तत्र कर्द्दमाश्रमकथनं। महाम्र-वनवर्णनं। किंशुकवनवर्णनादिः। एकशिलोदेशकथनादिः। तत्र नीलवाससो देवस्य वासस्थानकीर्त्तनादिः। पुरस्थलीवर्णनादिकञ्च।
८३ अ०,—शीताख्यपर्व्वते पारिजातवनवर्णनं। कुञ्जरनामपर्व्वते दानवपुरकथनं। वज्रकपर्व्वते राक्षसानां पुरीकथनादिः। अन्यान्यपर्व्वतेषु अन्येषां पुरादिवर्णनं।
८४ अ०,—रुद्रक्षेत्रादिवर्णनं।
८५ अ०,—कैलासपर्व्वतवर्णनं। पुष्पकरविमानकथनं। निधिकथनं। इन्द्रादि-लोकपालानां निवासकथनं। गन्धर्व्वनगरादिवर्णनं। उमावने भगवता अर्द्धनारी-श्वरत्वमाकलितमित्यादिवर्णनं।
८६ अ०,—नदीनामवतारकथनं। तत्र सोमाख्याकाशसमुद्रकथनादिः।
८७ अ०,—वरगण्डिकावर्णनं। तत्र पुरुषाः श्वेताः पद्मगन्धिनः स्त्रियश्च कुमुदवर्णा इत्यादिकथनं।
८८ अ०,—कुलपर्व्वतकथनादिः। तत्र जनपदनामकीर्त्तनादिः। प्रधानानां नदीनां नामकथनञ्च।
८९ अ०,—वायव्यरम्यकवर्णनं। तत्र महान्यग्रोधकथनं। हिरण्मयवर्षवर्णनादिः। तत्र वृक्षवर्णनादिः। चन्द्रद्वीपकथनं। तत्र चन्द्र(वज्र)कान्तपर्व्वतवर्णनादिः।
९० अ०,—भारतवर्षवर्णनादिः। तत्र कुलपर्व्वतकथनं। नदीकथनं। नदीनामु-त्पत्तिस्थानकथनं। शाकद्वीपवर्णनं। ततो जलधाराम्बिकेयप्रभृतिगिरिकथनं।
९१ अ०,—कुशद्वीपवर्णनं। तत्र पर्व्वतवर्षनदीप्रभृतिवर्णनं।
९२ अ०,—क्रौञ्चद्वीपवर्णनं।
९३ अ०,—शाल्मलद्वीपवर्णनं।

विषयः। ९४ अ०,—गोमेदशाकद्वीपवर्णनं।
९५ अ०,—ब्रह्मरुद्रादिदेवानां मध्ये विष्णोः परत्वकथनादिः। प्रमथैः परिवृतस्य पिनाकपाणेः समीपे ब्रह्मणो महिषासुरचेष्टितकीर्त्तनं। त्रिकलादेव्या उत्पत्तिवर्णनं। त्रितनुधारणकथनादिः। सृष्ट्यादिदेवीनां तपस्यादिकथनं।
९६ अ०,—सृष्ट्यादिदेवीनां माहात्म्यादिकथनं। तासां ब्रह्मकृतस्तुतिः।
९७ अ०,—तपस्यन्त्या वैष्णव्याः कोपात् कुमारीणामुत्पत्तिकथनादिः। कुमारीभिः सेव्यमानां तां विलोक्य महिषासुरसमीपे नारदस्य तद्वृत्तान्तकथनादिः।
९८ अ०,—देव्याः समीपे महिषासुरस्य दूतप्रेरणादिः। महिषासुरस्य युद्धयात्रावर्णनादिः।
९९ अ०,—महिषासुरस्य सुरलोकाक्रमणवर्णनं।
१०० अ०,—देवीसमीपे दूतस्य महिषासुरजन्मवृत्तान्तकथनं। तेन सह देव्याः परिणयप्रस्तावना। कुपितया देव्या सार्द्धमसुराणां युद्धवर्णनं। महिषासुरवधकथनं। देव्याः स्तुतिः।
१०१ अ०,—समुद्रजलवासिनो रुरुनामकासुरस्य शक्रादिभिः सह युद्धवर्णनं। देवीहास्योद्भवानां योगिनीनां समीपे असुराणां पराजयः। देवीकर्त्तृकरुरुवधः। रुद्रस्य देवीस्तोत्रकथनादिः। योगिनीनां तृप्त्यर्थं स्थाननिरूपणादिः। प्रयोजनवशादेकायाः शक्तेस्त्रैविध्यं। त्रिशक्तिमाहात्म्यकथनं।
१०२ अ०,—रुद्रसृष्टिकथनं। तृतीये जन्मनि रुद्रस्य पिङ्गाचलादिकथनं। रुद्रस्य ब्रह्मस्कन्धारोहणं। रुद्रस्य ब्रह्मशिरश्छेदनं। ब्रह्मशापेन कपाललग्नहस्तस्य कपालमालिनो महेन्द्रपर्व्वतं गत्वा कापालिकव्रताचरणं। द्विधाभिन्नस्य शिरसः खण्डमेकं गृहीत्वा रुद्रस्य विविधतीर्थपर्य्यटनं। कपालमोचनतीर्थकथनादिः। महाव्रतभग्नकापालादिव्रतकथनं। रुद्रमाहात्म्यकथनं।
१०३ अ०,—सत्यतपोनामकलुब्धकोपाख्यानं। तत्र कदाचित् छिन्नायां तर्ज्जन्यां तस्य भस्मदर्शनादिवृत्तान्तकथनं। वृत्तान्तमिमं निशम्य इन्द्रोपेन्द्रयोः किरातवराहरूपाभ्यां तत्र प्रवेशादिकथनं। तयोः सत्यतपसे वरदानं। स्वगुरोरारुणेस्तत्त्वज्ञानमुपलभ्य सत्यतपसो मोक्षप्राप्तिकथनादिः।
१०४ अ०,—वैष्णव्याः शक्तेर्माहात्म्यकथनं। विष्णुपूजाविधिकथनं। दीक्षाकीर्त्तनं।
१०५ अ०,—येन येन द्रव्येण नवग्रहपूजनं कृत्वा यद् यत् फलं भवति तत्प्रकारकथनादिः।
१०६ अ०,—द्वादशीव्रतमाहात्म्यकथनं। अत्र श्वेतराजोपाख्यानं। श्वेतराजसमीपे वसिष्ठस्य विनीताश्वराजविवरणकीर्त्तनं। दानमाहात्म्यकथनादिः।

विषयः। १०७ अ०,—नष्टचन्द्रसूर्य्यतारकादिसमये पृथिव्या विष्णुस्तुतिः।

१०८ अ०,—स्तवेन वशीभूतस्य विष्णोर्वराहरूपेण तदुद्धारकथनादिः। विष्णु-सन्निधौ पृथिव्या नानाविषयकप्रश्नकीर्त्तनादिः।

१०९ अ०,—नाहं यज्ञादिना तुष्यामि किन्तु केवलया भक्त्येति विष्णोः कथनादिः। विष्णुभक्तिमाहात्म्यकथनं। विष्णुपूजाविधानादिकथनं। कर्म्माध्यायकथनं।

११० अ०,—कर्म्मानुष्ठानविधिकथनादिः। कथं कर्म्म कर्त्तव्यं तत्कथनादिः। दुःख-जनककर्म्मप्रदर्शनं।

१११ अ०,—द्वात्रिंशद्विधापराधकथनादिः। यथा यथा विष्णुः प्रपद्यते तत्कथनञ्च।

११२ अ०,—येन प्रकारेण विष्णवे उपचारादिकं दातव्यं, मन्त्रकथनपूर्व्वकं तत्-प्रकारथनं।

११३ अ०,—विष्णवे दानयोग्यानां फलमूलमांसादीनां नामादिकथनं।

११४ अ०,—स्नात्वा जलाञ्जलिदानेन विष्णुतर्पणकर्त्तव्यता, तन्मन्त्रकथनञ्च।

११५, अ०,—विष्णुभक्तानां प्रकृतिकथनादिः। येन येन कर्म्मणा गर्भवासो न भवति तत्कथनं।

११६ अ०,—येन कर्म्मणा जनः तिर्य्यग्योनित्वं नाधिगच्छति तत्कथनं। कोकामुख-तीर्थमाहात्म्यादिकथनं। अत्र श्येनमत्स्ययोर्वृत्तान्तकथनं। आमिषलोलुपाया-श्चिल्ल्या राजकन्यारूपेण जन्मग्रहणादिविवरणकथनं।

११७ अ०,—येन कर्म्मणा लोकः परं पदं पश्यति, तत्कथनादिः। माधवादिमास-विशेषे केशवार्च्चनफलकथनं। तत्र द्रव्यविशेषदानफलकथनञ्च।

११८ अ०,—षट्सु ऋतुषु विष्णोराराधनार्थे कर्म्मविशेषविधानं।

११९ अ०,—मायावैचित्र्यकीर्त्तनादिः। अत्र सोमशर्म्मोपाख्यानं। विष्णुभक्तदर्शन-वन्दनादिकर्त्तव्यता। मायाचक्रमाहात्म्यादिकथनं।

End. प्रकामदोषप्रचुरेऽप्यमुष्मिन् ग्रन्थे मदीये करुणानुबन्धात् ।
प्रसादवन्तो न कृशानवन्तु परन्तु वैश्वावसवन्तु सन्तः ॥

Colophon. इति पञ्चमतभञ्जननिबन्धव्याख्यातृतातयज्वभागिनेयवाजपेयसर्व्वष्टष्ठाप्तोर्यामादियाज्याचेयवंशमौक्तिकभवद्पायाचार्य्यतनुभवस्लेषयमकचक्रवर्त्तिरघुनाथाचार्य्यदीक्षिततनयस्य श्रीनिवासरूपातिशयसुविदिततनयस्य सीताम्बागर्भसम्भवस्य श्रीमत्काञ्चीनगरवास्तव्यस्य व्यङ्कटाचार्य्ययज्वनः कृतिषु विश्वगुणादर्शः सम्पूर्णः ॥

विषयः । सूर्य्यपद्मसमुद्रादिविश्ववस्तूनां गुणवर्णनं ।

No. 1310. आत्मविद्योपदेशविधिः ।

Substance, country-made paper, 9 × 4½ inches. Folia, 14. Lines, 8—10—11—12 on a page. Extent, 378 s'lokas. Character, Nágara. Date, Sm. 1818. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

A'tmavidyopades'a-vídhi alias *A'tmopades'a.* Self-knowledge, or an epitome of the Vedánta scheme of salvation; in the form of a dialogue. By S'aṅkara A'chárya. *Hall's Contributions*, p. 111.

Beginning. ॐ तत्सज्ज्ञानात्मने नमः ।
चित्सदानन्दरूपाय सर्व्वधीवृत्तिसाक्षिणे ।
नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥
यदज्ञानादिदं भाति यज्ज्ञानात् विनिवर्त्तते ।

नमस्तस्मै चिदानन्दवपुषे परमात्मने ॥
अथात्मविद्योपदेशविधिं व्याख्यास्यामः ।

End. अथ शठानां धूर्त्तानां अश्रद्दधानां नास्तिकानामुत्पथगामिनां एतद्विद्यां न प्रकाशयेत् ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैताः कथिता विद्याः प्रकाशन्ते महात्मन इति श्रुतेः ।

Colophon. इति श्रीसङ्क्षिप्तवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करकृतं बहिर्मुखान्तःप्रवणमज्ञानबोधनी आत्मविद्योपदेशविधिः समाप्तः ॥

विषयः । मोक्षसाधनीभूतस्य आत्मतत्त्वज्ञानस्य उपायकथनं ॥

No. 1311. इष्टकापूरणं ।

Substance, country-made paper, $7\frac{3}{4} \times 3\frac{3}{4}$ inches. Folia, 8. Lines, 7 on a page. Extent, 70 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Ishṭaká-púraṇa. Directions for the making and using of bricks for fire altars, founded on the aphorisms of Kátyáyana. The work itself is written in an aphoristic form, but I cannot make out the name of its author.

Beginning. अथातः सुपर्णचित्यस्याग्नेः कातीयसूत्रशेषमृजुपक्षस्यानुव्याख्यास्यामः ॥ तत्रेष्टकाप्रमाणं । समचतुरस्राणां यथा पुरुषमङ्गुलौ षड़ङ्गुलं द्वादशाष्टादशचतुर्विंशतिरिति ।

End. अयुतञ्च सहस्रञ्च शतञ्च शशतिं तथा ।
सङ्ख्यैषा शाण्डिल्यस्याग्नेस्तस्मै च मुनये नमः ॥

Colophon. इष्टकापूरणं समाप्तं ॥

विषयः । यज्ञीयेष्टकापूरणप्रकरणं ।

No. 1312. द्वादशस्तोत्रव्याख्या ।

Substance, country-made paper, 6¾ × 3¼ inches. Folia, 49. Lines, 9—10 on a page. Extent, 690 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dvádas'astotra-vyákhyá. A commentary on a hymn in twelve stanzas by Anánda Tirtha in praise of Hari. Author's name not known; the hymn is held in great esteem by the Vaishṇavas of Bengal.

Beginning. उत्पत्तिस्थितिसंहृतिप्रणियति ज्ञानानिबन्धाहती
मोक्षश्चेति यतो भवन्ति जगतो भावाः स्वतन्त्रात् परात् ।
तं वन्दे निरवद्यमद्गुणतनुं लक्ष्मीधरालिङ्गितं
दोर्भिश्चक्रगदाम्बुजाभयभृतं मुक्तैकगम्यं हरिं ॥ १ ॥
प्रणम्य श्रीमदानन्दतीर्थार्य्यचरणाश्रितान् ।
गुरून् व्याकरवै विष्णोः प्रीतये द्वादशस्तुतीः ॥ २ ॥

End. क्वानन्दतीर्थयोगीन्द्रवाचोदीनाः सुदुर्विदाः ।
क्वाहमल्पमतिः कृष्णानुग्रहः साधयेन्न किं ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितद्वादशस्तोत्रव्याख्या समाप्ता ।

विषयः । श्रीमदानन्दतीर्थविरचितस्य हरेर्द्वादशस्तोत्रस्य व्याख्यानं ।

No. 1313. प्रस्तोतृप्रयोगः ।

Substance, country-made paper, 9½ × 4¼ inches. Folia, 22. Lines, 5 on a page. Extent, 196 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Prastotṛi-prayoga. The duties of the Prastotá, one of the priests at a sacrifice, defined and explained. Anonymous.

Beginning.
५ र २र २ २ र र ५ ५ र २र २
त्य मू षू । वाजि । ना २ ४ ५ म् । देवहूता २३४ म् । स हो वा नं तो ।
२ २
ह ता २ । रं७ ।

End. तेजो धर्म्मः सङ्क्रीडन्ते शिशुमतीर्वायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानि चक्रदू २३४५ ॥ ११ ॥

Colophon. इति प्रश्नोष्टप्रयोगः समाप्तः ।
विषयः । प्रश्नोष्टपायक् कथनं ।

No. 1314. आह्निकप्रयोगः ।

Substance, country-made paper, 9 × 4 inches. Folia, 28. Lines, 8—9 on a page. Extent, 513 s'lokas. Character, Nágara. Date, Sm. 1695. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Áhnika-prayoga. Directions for the performance of the daily religious duties obligatory on householders. By Raghunátha Bhaṭṭa, son of Mádhava Bhaṭṭa.

Beginning. अथाह्निकं । तत्र प्रभात उत्थाय मातापितृगुर्व्विष्टदेवतां मनसा नत्वा तद्दिनः-कर्त्तव्यं विचार्य्य ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च गुरुश्च शुक्रः शनिराहुकेतवः कुर्व्वन्तु सर्व्वे मम सुप्रभातं ।

End.

Colophon. इति श्रीमदुपाध्यायभट्टमाधवात्मजभट्टरघुनाथवर्णित आह्निकप्रयोगः सम्पूर्णः ।
विषयः । आह्निककृत्यनिरूपणं ।

No. 1315. चातुर्मास्यप्रयोगः ।

Substance, country-made paper, 8½ × 3½ inches. Folia, 59. Lines, 7—8—9 on a page. Extent, 754 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Cháturmásya-prayoga. Directions for the performance of the quadrimensial rite called *Cháturmásya.* It used to be observed during the summer season; the Buddhists adopted it, and for the convenience of hermits, fixed its period from July to October. Hindus now observe it during the same period, assuming it to be the time during which Vishṇu sleeps on the face of the ocean.

Beginning. अथ चातुर्मास्यप्रयोग उच्यते । फाल्गुन्यां चैत्र्यां वैश्वदेवेन यजते तयोः

पूर्व्वस्यां चतुर्द्दश्यां प्रातरग्निहोत्रं हुत्वा पत्न्या सह प्राणानायम्य एवं गुणविशेषण-विशिष्टायां पुण्यतिथौ चातुर्मास्यं प्रारप्से इति सङ्कल्प्य ।

End. ऐन्द्राग्न एकादशकपाले वै देवो द्वादशकपालः चरुर्व्वा अन्वाहार्य्यो दक्षिणा ।

Colophon. समाप्तानि चातुर्मास्यानि ।

विषयः । चातुर्मास्यप्रयोगकथनं ।

No. 1316. तत्त्वदीपः, सटीकः ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 97. Lines, 6—7—8—9 on a page. Extent, 2,127 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, Verse; Commentary Prose. Incorrect.

Tattvadípa. The philosophy of the Bhágavata Puráṇa digested, systematized and explained. The MS. is incomplete.

Beginning. मू०। नमो भगवते तस्मै कृष्णायाद्भुतकर्म्मणे ।
रूपनामविभेदेन जगत् क्रीड़ति यो यतः ॥ १ ॥
सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः ।
भवान्तसम्भवा दैवात् तेषामर्थे निरूप्यते ॥ २ ॥
भगवच्छास्त्रमाज्ञाय विचार्य्य च पुनः पुनः ।
यदुक्तं हरिणा पश्चात् सन्देहविनिवृत्तये ॥ ३ ॥

टी०। सर्व्वोद्धारप्रयत्नात्मा कृष्णः प्रादुर्बभूव ह ।
तथात्वं येन संसिद्ध्येत् तदर्थं व्यास उक्तवान् ॥ २ ॥
श्रीभागवतमत्यन्तं सर्व्वेषां सुखवापकं ।
तस्यापि तत्त्वं येनैव सिद्ध्येदिति विचार्य्य हि ॥ २ ॥
अग्निश्चकार तत्त्वार्थदीपं भागवते महत् ।
तत्रापि येन संसिद्ध्येद् व्याख्यानं तन्निरूप्यते ॥ २ ॥
श्रीभागवततत्त्वार्थं प्रकटीकरिष्यन् प्रथमं शास्त्रार्थोपनिबन्धनलक्षणं मङ्गलमा॰चरति नम इति ।

End. खण्डितं ।

विषयः । श्रीमद्भागवतादिशास्त्राणां सङ्क्षेपेण तत्त्वार्थप्रकटीकरणं ।

No. 1317. गीतगोविन्दटीका, पद्द्योतनिकानाम्नी ।

Substance, some leaves of country-made white paper, and some of country-made yellow paper, 12½ × 5 inches. Folia, 37. Lines, 10—11 on a page. Extent, 1,361 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect and incomplete.

Gitagovinda Ṭíká A commentary on the Gitagovinda of Jayadeva. By Náráyaṇa Paṇḍita.

Beginning. भद्राय भवतां भूयात् कृष्णः सङ्गतिभावितः ।
कालिन्दीजलसंसर्गी मेघश्यामोऽतिसुन्दरः ॥

End. खण्डितं ।

विषयः । गीतगोविन्दस्य व्याख्यानं ।

No. 1318. बौधायनीयशुल्वं ।

Substance, country-made paper, 9½ × 4 inches. Folia, 12. Lines, 10 on a page. Extent, 312 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'ulva S'útra alias *Baudháyana-sulva.* Aphorisms on the measurement and laying out of fire altars. By Bodháyana. Vide Journal As. Soc. XLIV. pp. 227ff. and *Pandit*, for 1875.

Beginning. अथेमे अग्निचयास्तेषां परिमाणविहारान् व्याख्यास्यामः ।

End. अथाग्न्याधेयिके विहारे नाम्नाचतुरस्रसमस्य + । अथेमेऽग्निचयाः ।

Colophon. इति बौधायनीयशुल्वं समाप्तं ।

विषयः । अग्निचयनभूमिपरिमाणविहारादिप्रकरणं ।

No. 1319. जीवत्पितृककर्त्तव्यसमुच्चयः ।

Substance, country-made paper, 9¼ × 4 inches. Folia, 28. Lines, 9 on a page. Extent, 544 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

*Jívatpitrikartavya-sa*n̲*chaya.* Duties of sons to their parents while living. By Rámakrishṇa Bhaṭṭa, son of Náráyaṇa Súri, and grandson of Rámesvara Bhaṭṭa.

Beginning. रघुवीरपदद्वन्द्वं निधाय हृदि मङ्गलं।
कुर्व्वता सर्व्वकर्म्माणि निर्व्विघ्नाः कार्य्यसम्पदः ॥

End. उदन्वतोऽम्भसि स्नानं नखकेशादिकर्त्तनं ।
अन्तर्वत्याः पतिः कुर्व्वन्न प्रजा जायते ध्रुवम् ॥
इत्याद्यन्यच दर्शनादित्यलमतिविस्तरेण ।
श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसूनुः।
श्रीरामकृष्णः स्वधिया व्यधत्त जीवे पितर्य्यात्मजकार्य्यशुद्धिं ॥

Colophon. इति श्रीमद्विद्वद्वृन्दवन्द्यपादश्रीमद्रामेश्वरभट्टसूनुश्रीमद्विद्वन्मुकुटमाणिक्यश्रीनारायणसूरिसूनुश्रीरामकृष्णभट्टविरचितो जीवत्पितृककर्त्तव्यसञ्चयः समाप्तिमगमत् ।

विषयः। जीवत्पितृककर्त्तव्याकर्त्तव्यनिरूपणं ।

No. 1320. प्रायश्चित्ताध्यायः ।

Substance, country-made paper, 9½ × 4 inches. Folia, 52. Lines, 10—11 on a page. Extent, 1,407 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect and incomplete.

Práyas'chittádhyáya. On expiations and purifications for householders. This is a fragment of a large work on Smṛití; but I have not been able to ascertain its name, nor that of its author.

Beginning. अधुना प्रायश्चित्ताध्यायो वर्ण्यते। गृहस्थाश्रमिणां नित्यनैमित्तिका धर्म्मा उक्ताः। अभिषेकादियुक्तस्य गृहस्थविशेषस्य गुणधर्म्माश्च दर्शिताः। अधुना तदधिकारसङ्कोचहेतुभूता शौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते।

End. इति स्मृतिकाराणामभिप्रायो लक्ष्यत इत्यदोषः। खण्डितं ॥

विषयः। प्रायश्चित्तादिकथनं ।

No. 1321. पारसीकप्रकाश: ।

Substance, country-made paper, 10 × 4½ inches. Folia, 12. Lines, 10 on a page. Extent, 247 s'lokas. Character, Nágara. Date, Sm. 1666. Place of deposit, Calcutta, Government of India; another copy at Benares, with Bábu Haris'chandra. Appearance, old. Prose. Incorrect.

Párasika-prakás'a. A list of Persian words strung in anushṭup verses, and explained in Sanskrit. By Víhárikrishṇadása. The work professes to have been compiled by order of the Emperor Akbar, but it is a meagre one, and the MS. is incomplete. It is, however, a very old one; it is dated Samvat 1666 = A. C. 1610 and must be one of the earliest copies made from the original of the author. Vide plate IX.

There is another work of this name which comprises a vocabulary of astronomical, astrological and technical terms borrowed by the Hindus from the Arabs. It was compiled by one Vedánga Ráya, under the auspices of Sháh Jehán. The description given of this work under No. CLXII (vol. I, p. 87) "Persian (Arabian?) astronomy as known to the Brahmans" is incorrect. For लग्नयात्रादिनिरूपणं on that page, the description should be पारसिकज्योतिषः शब्दमाला ।

Beginning. श्रीसूर्य्याय नमो विधाय विधिवत् सन्धाय चित्तं रवौ
दिव्यानामिव पारसीकवचसां कुर्व्वे प्रकाशं नवं ।
साक्षात् शाहजलालदीन्द्रसदसि प्राज्ञप्रमोदप्रदं
वाह्यध्वान्तमिवापहन्तु पुरुषान्तरस्थं नमः + + + ॥
यद् ब्रह्म वेदेन विकारहीनं प्रतीयते स्म प्रकृतेः परस्तात ।
तदेष गोब्राह्मणपालनार्थं महीमहेन्द्रोऽकवरः प्रजातः ॥
यदस्य नामाखिलशास्त्रसागरे स्मृतीतिहासादिषु साधु विश्रुतं ।
गतं त्रिलोकीषु चिरस्थितिं ततस्तदाज्ञया तन्त्रमिदं वितन्यते ॥
यद् गोपाललसुतेन कृष्णविभुना गावस्तथा पालिता
रामैर्भूसुरदैवतैर्द्विजवरास्त्राता न चित्रञ्च तत् ।
गोविप्राभिभवप्रिये यवनजे वंशेऽवतीर्णो विभु-
र्गोविप्रान् प्रतिपालयत्यकवरो विष्णुर्विचित्रं महत् ॥
कियतां पारसीकानां वचसां सङ्ग्रहो मया ।
विधीयते स्वबोधार्थं संस्कृतार्थावबोधनैः ॥

End. प्रायश्छन्दोऽनुरोधेन सम्यगुच्चारणाय च ।
सिंहकायश्च शब्दान्ते प्रयुक्तौ यौ न तौ स्थिरौ ॥

Colophon. इति महीमहेन्द्रश्रीमदकबरशाहिविरचिते विहारिकृष्णदासकृते पारसीकप्रकाशे शब्दार्थकोशप्रसारणमिति ।

विषयः । यावनिकसामान्यशब्दमाला ।

No. 1322. सर्व्वपृष्ठाप्तोर्यामप्रयोगः ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 23. Lines, 10—11—12 on a page. Extent, 438 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Sarvaprishṭháptoryáma-prayoga. A manual for the performance of the Soma right called Sarvaprishṭháptoryáma. It treats of only those parts of the rite which differ from the ordinary Áptoryáma. Anonymous.

Beginning. सर्व्वपृष्ठाप्तोर्यामस्य प्रयोगः । होतुः । सर्व्वमतियाज्ञिवित् । आज्यशस्त्रे प्र वो देवायाग्नयेत्येतस्य स्थाने अग्निं नर इति सूक्तं पञ्चविंशतिकं भवन्ति ।

End. सोमस्याग्ने वीही वौषट् द्विर्वा गोजः ।

Colophon. इति सर्व्वपृष्ठाप्तोर्यामे होतुर्वैश्वानराग्निमारुतं शस्त्रं । अन्यत् सर्व्वं प्रकृतिवत् ।

विषयः । सर्व्वपृष्ठाप्तोर्यामप्रयोगकथनं ।

No. 1323. विनायकशान्तिः ।

Substance, country-made paper, 8¾ × 4½ inches. Folia, 5. Lines, 10—11 on a page. Extent, 96 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Vináyaka-s'ánti. A manual for the performance of a rite required to be observed on the 4th or the 5th of the waxing moon every month, for the gratification of Vináyaka. It follows the rules of Baudháyana. Anonymous.

Beginning. अथ विनायकशान्तिविधिरुक्तो बौधायनेन । अथातो विनायककल्पं व्याख्यास्यामो मासि मासि चतुर्थ्यां शुक्लपक्षस्य पञ्चम्यां वाभ्युदयादौ सिद्धिकाम ऋद्धिकामः पशुकामो विनायकस्य बलिं हरेत् ।

End. शान्तिरत्ने तु देवनचत्रेऽपि करणमुक्तं। उपनयनाङ्गत्वेन क्रियमाणायान्तु सम्भ- वत्कालोपसङ्गृहः कार्य्य इति सम्प्रदायः ।

विषयः । विनायकशान्तिप्रयोगकथनं ।

No. 1324. वाक्यवृत्तिविवरणं, मूलसहितं ।

Substance, country-made paper, 10 × 4½ inches. Folia, 10. Lines, 9 on a page. Extent, 270 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Vákya-vritti-vivarana. A commentary on the *Vákyavritti.* By Ánandajñána, disciple of S'uddhánanda. Both the teacher and the pupil were Paramahansas. The MS. comprises also the text, in which S'ankara Áchárya expounds, in fifty-two couplets, in the form of a dialogue between a preceptor and a pupil, the principles of the Vedánta Philosophy. Hall's Contributions, pp. 106—204.

Beginning. ऐदम्पर्य्येण वेदान्ता यद्वदन्ति परं पदं ।
तदहं ब्रह्मनिर्भेदं सत्यादिपदलचितं ॥
मुमुचुजनाननुजिघृचया वाक्यवृत्तिसञ्ज्ञितं प्रकरणं प्रारभमाणो विघ्नोपशान्त्यो- पशमादिप्रयोजनसिद्धये परदेवताप्रमाणरूपं मङ्गलाचरणं मुखतः सम्पादयन प्रकरणारम्भापेचितमनुबन्धत्रयञ्च विषयसाधनप्रयोजनलचणं सङ्चिप्य प्रति- पत्तिसौकार्य्यार्थं कथयति। सर्गेति ।

End. वाक्यवृत्तेरियं वृत्तिर्विचिरा रचिता मया ।
पुनः सुचरिता याता सङ्गता पुरुषोत्तमे ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशुद्धानन्दपूज्यपादशिष्यश्रीभगवदानन्द- ज्ञानविरचितं वाक्यवृत्तिविवरणं समाप्तम्।

विषयः । वाक्यवृत्तेर्व्याख्यानं। वाक्यवृत्तौ च प्रथमं जीवपदार्थनिरूपणं। ततः परमात्म- पदार्थनिरूपणं। ततः जीवब्रह्मणोस्तादात्म्यकथनं। ततस्तत्त्वमस्यादिवाक्यघट- कस्य तत्पदस्य ब्रह्मप्रतिपादकत्वकथनं। त्वम्पदस्य जीवप्रतिपादकत्वकथनञ्च ।

No. 1325. बौद्धाधिकारः ।

Substance, country-made paper, 14 × 4¼ inches. Folia, 2. Lines, 25. Extent, 42 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Bauddhádhikára, alias *A'tmatattvaviveka*. An exposition of the knowledge of the soul as taught in the Vais'eshika system, and a refutation of Buddhist and other forms of infidelity and atheism. By Udayana A'chárya. The work was published in Calcutta about forty years ago. Hall's Contributions, pp. 81, 82.

Beginning. स्वाम्यं यस्य निजं जगत्सु जनितेष्वादौ ततः पालनं
व्युत्पत्तेः करणं हिताहितविधिव्यासेधसम्भावनं ।
भूतोक्तिः सहजा कृपानिरुपधिर्यत्नस्तदर्थात्मक-
स्तस्मै पूर्व्वगुरूत्तमाय जगतामीशाय पित्रे नमः ॥

End. सहकार्य्यभावप्रयत्नकार्य्याभाववांश्च सहकारिविरहे कार्य्यवांश्चेति व्याहतं ।
तस्माद् यद्यदभावे यन्न करोति तत्तदभावे तत्करोत्ये (इतः खण्डितं) ।

विषयः । आत्मतत्त्वनिरूपणं ।

No. 1326. बौद्धाधिकाररहस्यं ।

Substance, country-made paper, 14 × 4¼ inches. Folia, 7. Lines, 9 on a page. Extent, 216 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bauddhadhikára-rahasya, alias *A'tmatattva-vivaka-rahasya*. A commentary on the work noticed under the last preceding No. By Mathuránátha Tarkavágís'a.

Beginning. कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
बौद्धाधिकारविहृतिर्विषदीकृत्य उच्यते ॥

End. यद्वा घटस्य प्रसाध्याङ्गकदृष्टान्ततया अन्वयसहचारनिश्चयाभावेन व्याप्तानिश्चयादित्यर्थः ।

Colophon. इत्यात्मतत्त्वविवेकमाथुरी ।
विषयः । बौद्धाधिकारमूलस्य व्याख्यानं ।

No. 1327. बौद्धाधिकारदीधितिः ।

Substance, country-made paper, 14 × 4¼ inches. Folium, 1. Lines, 20. Extent, 33 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bauddhádhikára-didhiti alias *Átma-tattva-vivika-didhiti*. A gloss on the work noticed under No. 1325. By Raghunátha Bhaṭṭácharya Tarkas'iromaṇi.

Beginning. ॐ नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
निर्णीय सारं शास्त्राणां तार्किकानां शिरोमणिः ।
आत्मतत्त्वविवेकस्य भावमुद्भावयत्यसौ ॥

End. कामयमानाश्च सुखादिकं विहितनिषिद्धं साधनमस्यानुतिष्ठन्तः कर्म्माशयानाचिन्वाना जन्मादिकमनुभवन्ति ।

विषयः । बौद्धाधिकारदीधितिव्याख्यानं ।

No. 1328. वैयाकरणभूषणं ।

Substance, country-made paper, 16 leaves 10 × 5 inches, remainder 12¾ × 5 inches. Folia, 70. Lines, 11 on a page. Extent, 2,881 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vaiyákaraṇa-bhushaṇa. A dissertation on the philosophy of language. By Koṇḍa Bhaṭṭa. Vide Asiatic Society's Catalogue, Part I, p. 86 and Aufrecht's Catalogue, p. 177.

Beginning. (प्रथमावधिपत्रद्वयं नास्ति ततः परं) व्यास्तिश्च अर्द्धं नपुंसकमिति समासात् ।
एवं पूर्व्वकाय इत्यादि तत्पुरुषेऽपि द्रष्टव्यं ।

End. पाणिनीयवचसां खलु मूलं चन्द्रशेखरभवानिति रूढं । तेन भूषणमिदं चितवैव प्रीतये भवतु साम्बशिवस्य ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपरावारपारीणधुरीणरङ्गोजिभट्टात्मजकोण्डभट्टकृते वैयाकरणभूषणे चरमः स्फोटवादः समाप्तः।

विषयः। व्याकरणमतसिद्धशब्दशक्तिविवेचनं, पदाद्यभिव्यङ्ग्यस्फोटसिद्धान्तकथनञ्च।

No. 1329. अन्त्येष्टिपद्धतिः।

Substance, country-made paper, 9½ × 4½ inches Folia, 33. Lines, 9—10 on a page. Extent, 426 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Antyeshṭi-paddhati. A manual of funeral rites according to the modern ritual. By Bhaṭṭa Náráyana, son of Bhaṭṭa Rámes'vara. The author is probably the same with the writer of the Venisañhára-náṭaka, and one of the five Bráhmans who came to Bengal at the invitation of Adisura. The MS. is incomplete.

Beginning. भट्टरामेश्वरसुतो भट्टनारायणः सुधीः।
नत्वा शिवौ संविचार्य्य कुरुतेऽन्त्येष्टिपद्धतिं॥

End. सपत्न्यभावे भ्रातुः पुत्रः भ्राता स्नुषा दुहिता दौहित्रः पत्न्याः सगोत्रः सपिण्डः सब्रह्मचारी मित्रः। (परं खण्डितं)।

विषयः। अन्त्येष्टिक्रियाकथनं।

No. 1330. उपदेशरहस्यं, महाराष्ट्रीयभाषा।

Substance, country-made paper, 6¾ × 4 inches. Folia, 88. Lines, 11—13 on a page. Extent, 1,501 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Upades'a-rahasya. An exposition of the Vedánta doctrine in the Marháṭṭi language. Anonymous.

Beginning. श्रीसद्गुरुचे चरण। जेकां विश्रान्तिचि कारण। तयाते करूणि नमन। ग्रन्थकथन करितसे।

End. काशीराजमाझे सर्व्वस्व। तेंचि रहस्याचे रहस्य। ह्मणौनि उपदेशरहस्य। अतिसोरसे केलेंश। सन्तदयालु जे असति। तेंचि माझि काशीराजमूर्त्ति। तच्चरणप्रसादें स्फूर्त्ति। समर्पिली निजमति तत्पदीं।

Colophon. इति श्रीउपदेशरहस्यं सम्पूर्णं।

विषयः। वेदान्तमतसिद्धपञ्चभूततत्त्वविवेकः।

No. 1331. तत्त्वकमलाकरः।

Substance, country-made paper, 9¼ × 4¼ inches. Folia, 28. Lines 9—10 on a page. Extent, 641 s'lokas. Character, Nágara. Date, Sm. 1696. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Tattva-kamalákara. On the philosophy of the rites and ceremonies enjoined in the S'ástras, being a dissertation on the principles of the Mimáńsá school as bearing on Hindu ritual. By Kamalákara Bhaṭṭa, son of Rámakrishṇa Bháṭṭa, and grandson of Náráyaṇa Bhaṭṭa. The author was a distinguished Smṛiti scholar, and his opinions and writings on matters of law are largely quoted. The MS. is dated Samvat 1696 =A. C. 1640. Vide plate XIII.

Beginning. श्रीरामं पितरौ नत्वा कमलाकरशर्म्मणा।
अर्थशब्दौ निरूप्याथ शास्त्रतत्त्वं निरूप्यते॥

End. एवमञ्जलिना सक्तून् जुहोतीति न हस्तद्वयसंयोगोऽञ्जलिः, (किं) तु व्याकोशः॥ तेन श्रुतार्थापत्त्या शब्दकल्पना॥

Colophon. इति श्रीजगद्गुरुमीमांसकनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते तत्त्वकमलाकरे प्रथमोऽध्यायः।

विषयः। अथातो धर्म्मजिज्ञासेत्यादिमीमांसासूत्राणां व्याख्यानं।

No. 1332. चातुर्मास्यप्रयोगः।

Substance, country-made paper, 11½ × 4¾ inches. Folia, 38. Lines, 10—11 on a page. Extent, 841 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Another copy at Benares, with Bábu Harís'chandra. Appearance, old. Prose. Incorrect.

Cháturmásya-prayoga. A manual for the performance of the quadrimensial rite *Cháturmásya* of the Vedic liturgy. The rite commenced on the full moon of the month of Phálguṇa or Chaitra, and lasted, as its name implies, for four months. It was the archetype on which the modern Hindu rite of that name and the *Wassá* of the Buddhists were modelled; but the time was changed to the rains and autumn, from the middle of June to October, and, as was the case with many old rites and customs in India and elsewhere, the original meaning of the ceremony was obliterated, and the name alone retained to utilize the hold it had on the mind of the people. The MS. is incomplete, and the author's name is wanting.

Beginning. अथ चातुर्मास्येतिकर्त्तव्यता। फाल्गुन्यां पौर्णमास्यामारम्भः। चैत्र्यां वसन्ते वा। तत्र प्रथमप्रयोगे मातृपूजापूर्व्वकमाभ्युदयिकं श्राद्धं। ततो वैश्वानरपार्ज्जन्येष्टिः।

End. इदं पितृभ्यः सोमवद्भ्य इदं सोमाय पितृमते इदं पितृभ्यो बर्हिषद्भ्य इदं पितृभ्योऽग्निष्वात्तेभ्यः। इदमग्नये कव्यवा (इतः परं खण्डितं।)

विषयः। चातुर्मास्ययागप्रयोगकथनं।

No. 1333. चिकित्सासारः।

Substance, country-made paper, 13¾ × 7 inches. Folia, 42. Lines, 14—15 on a page. Extent, 1,672 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Chikitsá-sára. A fragment of a treatise on the practice of medicine. Author's name unknown.

Beginning. कमलनयन शशिभाल नागवदन एकरदनयत। वरद विरदप्रतिपाल हरो विघन अमराधिपत॥

End. (खण्डितं।)

विषयः। चिकित्साकथनं।

No. 1334. दर्शपूर्णमासप्रयोगः ।

Substance, country-made paper, 9½ × 4¾ inches. Folia, 39. Lines, 12—14 on a page. Extent, 1,246 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dars'a-paurṇamása-prayoga. A manual for the performance of the New-moon and the Full-moon sacrifices. The MS. is incomplete, and the author's name cannot be ascertained.

Beginning. अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा यजमानस्य ब्रह्मचर्यं दक्षिणादानं द्रव्यप्रकल्पनं कामानां कामनं प्रत्यगाशिषो मन्त्राञ्जपत्यकरणानुपतिष्ठते पर्व्वणि ।

End. (खण्डितं) ।

विषयः । दर्शपूर्णमासप्रयोगकथनं ।

No. 1335. बौधायनसोमप्रयोगः ।

Substance, country-made paper, 10½ × 4 inches. Folia, 26. Lines, 8—10 on a page. Extent, 593 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Baudháyana-soma-prayoga. A manual for the performance of the Soma rites according to the rules of Baudháyaṇa. The MS. is incomplete.

Beginning. सोमेन यक्ष्यमाणः पूर्व्वेद्युर्देहिशान्तिप्रतिसरबन्धान् विधाय प्रातरग्निहोत्रं हुत्वा ऋत्विग्भिः सह स्नानादिपञ्चकं विधाय प्रागग्रेषु दर्भेषु उपविष्टः ।

End. तन्तमेव ज्योतिषाममुकशर्म्मन् नु मा तनुहि ज्योतिषा । खण्डितं ।

विषयः । सोमयागप्रयोगकथनं ।

No. 1336. बौधायनदर्शपौर्णमासप्रायश्चित्तं ।

Substance, country-made paper, 9½ × 3¾ inches. Folia, 9. Lines, 11—12 on a page. Extent, 248 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Baudháyana-dars'a-paurṇamása-práyas'chitta. Expiations ordained by Baudháyana in connexion with the rites described in the work noticed under No. 1334. The MS. is incomplete.

Beginning. अथ बैाधायनदर्शपैार्णमासप्रायश्चित्तानि । तत्र । अन्वाधानानन्तरं दक्षिणाग्निनाशे शुचिर्भूत्वा विहारं प्रविश्य गार्हपत्यान्तं प्रणीय प्राणानायम्य दक्षिणाग्निनाशनिमित्तं प्रायश्चित्तं करिष्ये इति सङ्कल्प्यः ।

End. प्रियो देवानां परमे जनित्रे इति मन्त्रेण स्वायतने पुनः क्षिपेत् । ततः सर्व्वप्रायश्चित्तं । खण्डितं ।

विषयः । दर्शपैार्णमासकर्मवैकल्यप्रायश्चित्तकथनं ।

No. 1337. यजमानकृत्यं ।

Substance, country-made paper, 7¾ × 3¾ inches. Folia, 22. Lines, 7—8 on a page. Extent, 315 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Yajamána-kṛitya. The duties of the institutor of the sacrifices in connexion with the rites noticed in No. 1334. Anonymous.

Beginning. याजमानं व्याख्यास्यामो यजमानस्य ब्रह्मचर्य्यं दक्षिणादानं द्रव्यप्रकल्पनं कामानां कामनं प्रत्यगाशिषो मन्त्रान् जपत्यकरणानुपतिष्ठतेऽनुमन्त्रयते पर्व्वणि च केशश्मश्रुवापयतेऽप्यल्पशो लोमानि वापयत इति वाजसनेयकं ।

End. प्रायश्चित्तान्यनेकानि तपः कर्म्मात्मिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणात् परं ॥

Colophon. (समाप्तिसूचकं वाक्यं नास्ति)।

विषयः । दर्शपैार्णमासयागसङ्कल्पानन्तरं सपत्नीकयष्टृपाठ्यमन्त्राणां कथनं ।

No. 1338. मृताहिताग्निदाहादिविधिः ।

Substance, country-made paper, 9 × 3¾ inches. Folia, 17. Lines, 7—8—9 on a page. Extent, 188 s'lokas. Character, Nágara. Date, Sm. 1796. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mṛitáhitágnidáhádi-vidhí. Funeral rites for persons who have preserved the domestic fire during their lives. The MS. is incomplete, and the author's name is not given, but from the salutation it would seem that the work is a sequel to No. 1329 and by the author of that work—Bhaṭṭa Náráyaṇa.

Beginning. आश्वलायनमाचार्य्यं भट्टरामेश्वरं गुरुं ।
नत्वाहिताग्निमरणे दाहादि प्रोच्यतेऽधुना ॥

End. लौकिकाग्निना पात्राणि दहेत् । तदाग्नीन् वै तान् प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ॥

विषयः । मृताग्निकदाहादिविधानं ।

No. 1339. ग्रहलाघवविवरणं, वा ग्रहलाघवोदाहरणं ।

Substance, country-made paper, 11 × 5½ inches. Folia, 19. Lines, 13—14 on a page. Extent, 712 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Grahalághava-vivaraṇa alias *Grahalághavodáharaṇa.* Illustrations and exercises for the explanation of the Grahalághava—a treatise by Gaṇes'a Daivajña on the calculation of planetary motions. By Vis'va-nátha. The MS. is incomplete.

Beginning. ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मथ्य शास्त्राम्बुधिं
यच्चक्रे ग्रहलाघवं विवरणं कुर्व्वेऽस्य सत्प्रीतये ।
मृत्वा शम्भुसुतं दिवाकरसुतस्तद्विश्वनाथः कृती
जाग्रज्ज्योतिषवर्गगोकुलपरित्राणाय नारायणः ॥ १ ॥

End. इदं विषय ४ भक्तं राशयः शेषं । २ । २२ । खण्डितं । त्रिंशत् ३० गुणितं ।

विषयः । गणेशदैवज्ञकृतग्रहलाघवस्य व्याख्यानं ।

No. 1340. केशवीटीका ।

Substance, country-made yellow paper, 9¾ × 5 inches. Folia, 21. Lines, 13—14 on a page. Extent, 576 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Kes'aví-ṭíká. A commentary on Kes'ava's treatise on astronomical calculations. By Vis'vanátha.

Beginning. श्रीगणेशं नमस्कृत्य केशवीनामपद्धतेः ।
गणितं विश्वनाथेन क्रियते बालबुद्धये ॥

End. एवं चन्द्रादीनामपि ज्ञेयं श्रेष्ठाचबलपदमिति पातद्वयस्य मूलं ग्राह्यं।——
इतः परं खण्डितं ।

विषयः । केशवकृतगणितशास्त्रस्य व्याख्यानं ।

No. 1341. वैयाकरणसिद्धान्तमञ्जूषा ।

Substance, country-made yellow paper, 13 × 4¼ inches. Folia, 27. Lines, 12—14 on a page. Extent, 914 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Vaiyákaraṇa-siddhánta-mañjúshá alias *Mañjúshá.* A treatise on the Philosophy of grammatical structure. By Náges'a. Vide Asiatic Society's Catalogue, Part I, p. 87, Aufrecht's Catalogue, p. 177. Colebrooke's Essays, I, p. 42.

Beginning. नागेशभट्टविदुषा नत्वा साम्बं शिवं लघुः ।
वैयाकरणसिद्धान्तमञ्जूषेषा विरच्यते ॥

End. अस्माकन्तु व्यावहारिकोऽपि प्रपञ्चो दीर्घस्वप्न एव इति बोध्यं। तदनन्यत्वमिति सूत्रे भाष्यं। तथा च श्रुतयः——(इतः परं खण्डितं) ।

विषयः । अत्र व्याकरणमतसिद्धाष्टस्फोटेषु वाक्यस्फोटस्य मुख्यत्वकथनं, शब्दशक्तिनिरूपणादिकञ्च ।

No. 1342. बालखिल्यशास्त्रं ।

Substance, country-made paper, 10½ × 4½ inches. Folia, 12. Lines, 12—13—14 on a page. Extent, 390 s'lokas. Character, Nágara. Date, Sm. 1768. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Bálakhilla-s'astra. A compendium of the mantras of the Bálakilla rite.

Beginning. ह्रिं भूर्भुवः स्वरोम् अध्वर्य्यो शोऽशोंसावोमेच्यूष् ब्रवाणि तेऽग्र इत्यैतरा गिरः ॥
End. सोमस्याग्ने वीही वैाषट् ।
Colophon. इति मैत्रावरुणस्य वालखिल्यशस्तं ।
विषयः । मैत्रावरुणीयवालखिल्यशस्त्रात्मकमन्त्रकनं ।

No. 1343. कुसुमाञ्जलिबोधिनी ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 59. Lines, 9—10 on a page. Extent, 1,333 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old and decayed. Prose. Incorrect.

Kusumánjalíi-bodhiní. A commentary on the Kusumáñjali of Udayana A'chárya. The MS. is incomplete, and the author's name cannot be made out.

Beginning. दर्शयितुमर्थतं विनिहन्तुं चान्तरायसन्तमसम् ।
मम मनसि सन्निधत्तां नरहरिसवलाकृतिर्ज्योतिः ॥ १ ॥
विश्वं यो विदधात्यहष्टसचिवः सत्सम्प्रदायो यतः
प्रामाण्यं लभते श्रुतिर्गुणवतो वक्तुर्यतो नान्यतः ।
यस्मिन् बाधकसङ्कयापि वितथा माता च मानञ्च यः
सिद्धो यः श्रुतिनीतिसम्भवशतैस्तं मन्महे मानतः ॥ २ ॥
औदयने पथि गहने वैदेशिकः प्रतिपदं स्खलति लोकः ।
तस्य कृते कृतिरेषा कुसुमाञ्जलिबोधिनी जयति ॥
End. (खण्डितं)
विषयः । कुसुमाञ्जलिव्याख्यानं ।

No. 1344. आधानबैाधायनी ।

Substance, country-made paper, 9 × 4 inches. Folia, 60. Lines, 8 on a page. Extent, 952 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

A'dhánabaudháyani. A manual for the collection and preservation of the household fire according to the rules of Baudháyana. This is

different from the treatise noticed under No. 833, (*ante* II, p. 235). The MS. is incomplete, and the author's name cannot be made out.

Beginning. फलमत उपपत्तेरिति नयतो यो शेषकर्म्मफलदाता ।
तमहं सकलसुराणां परमं प्रणमामि यज्ञनामानं ॥ १ ॥
आधानप्रयोगः । तत्र कल्पसारः ।
आधित्सुरग्नीन् पुरतो विशुद्धः शिष्टाननुज्ञाप्य तयोत्तमर्णं ।
कच्छादिशुद्धः कुशली सजायो मैत्रीं व्रजेत् प्राणिभिराकुमारं ॥

End. ऋत्विग्वरणादिगोपितृयज्ञवर्जमधिकृतमग्न्याधेयं कुर्य्यात् ।

Colophon. इति आधानप्रकरणं समाप्तं ।

विषयः । आधानकर्म्मविवेकः ॥

No. 1345. योगवाशिष्टसारटीका, मूलसहिता ।

Substance, country-made paper, 9⅓ × 5½ inches. Folia, 156. Lines, 9—10—11—12 on a page. Extent, 2,918 s'lokas. Character, Nágara. Date, Sk. 1618. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Yogavás'ishṭa-ṭíká. A commentary, in the Marhatta language, on the philosophical maxims inculcated in the Yogavás'ishtasára. By Mádhavadása.

Beginning. जय जय उज्वलोज्वला । जय जय मङ्गलमङ्गला ॥
जय जय निर्मलनिर्मला । जय जय दयाला सद्गुरु ॥ १ ॥
जय जय चिदेककृपाला । भुवनभूषणभूपाला ।
गगनोपमाविशाला । जय जय दयाला सद्गुरु ॥ २ ॥

End. हे टीका ऐके आणी पुढे । आगी जोडे ब्रह्म वे ॥ ६६ ॥
माधवदास नारायणचा । मुलीचेनी नामे आला मांचा ॥
ह्मणे सत्य हेचीं वाचा । सद्गुरुप्रसादेकरूनि ॥ २६७ ॥

Colophon. इति श्री योगवाशिष्टसारमाधवदासकृतटीकायां निर्वाणो नाम दशमप्रकरणं सम्पूर्णम् ॥

विषयः । योगवाशिष्टसारस्य महाराष्ट्रभाषया व्याख्यानम् ।

No. 1346. विवेकसिन्धुः ।

Substance, country-made paper, 8½ × 4⅓ inches. Folia, 138. Lines, 9 on a page. Extent, 1,856 s'lokas. Character, Nágara. Date, Sm. 1636. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Viveka-sindhu. An exposition of some of the leading topics of the Vedánta doctrine. By Mukuṇḍa Rája, or Mukuṇḍa Muni, disciple of Rámanátha, who was a disciple of Harinátha. The work is in the form of a dialogue in verse, and is said to have been composed for the instruction of the author's pupil Jainapála. Attached to the text is a Marhaṭṭi translation in verse. Contents: 1 to 3. Order of creation. 4. The threefold bodies of the Creator. 5. Typical *(linga)* body. 6. Carnal *(sthula)* body. 7. Pantheism. 8. Unreality of the carnal body. 9. Ditto of the typical body. 10. Ditto of the rudimentary *(kárana)* body. 11. Ditto of the primary intellectual *(jñána-purṇa)* body. 12. Ditto of the three kinds of corporeality. 13. Ditto of absolute primary *(púrṇa-mahákáraṇa)* body. 14. The true character of *mukti* or salvation. 15. The identity of the human and the divine souls. 16. The great non-duality. 17. The order of destruction. 18. Praise of the line of teachers. Hall's 'Contributions,' p. 100. The MS. is dated Samvat 1636 = A. C. 1692. Vide plate XIII.

Beginning. लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १ ॥
श्रीहरिं जगदाधारमरविन्दाक्षमक्षरं ।
अभिवन्द्यात्मविज्ञानोपदेशविधिरुच्यते ॥ २ ॥
जये जये जी चन्द्रमौली, कातें कृपादृष्टि न्याहाली ।
तरिच पावे ननकाली, ब्रह्मसुखाची ॥ १ ॥

End. संपलें ग्रन्थाचे उत्तरार्द्ध । जे निजबोधाचे विशुद्ध ।
ह्मणोनि राजयोगिप्रसिद्ध । श्रीमुकुन्दराज ह्मणे ॥ १२५ ॥

Colophon. इति श्रीविवेकसिन्धौ संहारकर्मणि गुरुशिष्यसंवादे गुरुपरम्परामाहात्म्यकथनं नामाष्टादशप्रकरणं समाप्तम् ।

विषयः । १ । २ । ३, प्रकरणेषु सृष्टिक्रमः । ४, ईश्वरदेहत्रयकथनं । ५, लिङ्गदेहविवरणं । ६, स्थूलदेहविवरणं । ७, सर्वब्रह्मविवरणं । ८, स्थूलदेहनिरसनं । ९, लिङ्गदेहनिरसनं । १०, कारणदेहनिरसनं । ११, ज्ञानपूर्णदेहमहाका-

रणदेहनिरसनं। १२, देहत्रयनिरसनं। १३, पुनर्महाकारणदेहनिरसनं। १४, मुक्तिस्वरूपविवरणादिः। १५, भेदखण्डनपूर्वकाद्वयस्वरूपप्रतिपादनं। १६, महाद्वैतप्रतिपादनं। १७, संहारक्रमः। १८, गुरुपरम्परामाहात्म्यं।

No. 1347. न्यायसुधा।

Substance, country-made paper, $10\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 28. Lines, 11—12 on a page. Extent, 984 s'lokas. Character, Nágara. Date, Sm. 1624. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Nyáya-sudhá. A commentary on the Tantra-vártika—a treatise on the Vedánta. By Bhaṭṭa Somes'vara, son of Bhaṭṭa Mádhava. This is apparently a different work from the one of this name noticed by Mr. Hall, in his 'Contributions,' No. CXII, p. 113. The MS. bears date Samvat 1624 = A. C. 1680. Vide plate VI.

Beginning. यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात्॥ भाष्ये वक्तृत्वविशेषणस्य चिन्तानोपयिकत्वाद्यथावस्थितोक्तिमात्रार्थत्वं सूचयतुमाह, वक्तृत्वेति। चिन्तालक्षणसङ्गतिमाशङ्कते ननु वेति।

End. उक्तेन प्रकारेण शब्दान्तरादिप्रामाणिकाभेदसिद्धिर्न शाखान्तरप्रामाणिकेत्येवकारार्थः।

Colophon. इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वर++++त्रवार्त्तिकटीकायां सर्वानवद्यकरण्यां न्यायसुधाख्यायां द्वितीयाध्यायस्य चतुर्थो यावज्जीव++++याध्यायश्च समाप्तः।

विषयः। तन्त्रवार्त्तिकव्याख्यानं।

No. 1348. भाष्यप्रदीपोद्योतः, वा कैयटटीका, मूलसहिता।

Substance, country-made paper, $11 \times 4\frac{1}{4}$, $14\frac{1}{4} \times 5\frac{1}{2}$ inches. Folia, 427. Lines, 9—10—11—12—13 on a page. Extent, 11,510 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bháshypradípodyota alias *Kaiyaṭaṭíká* This is a very imperfect fragment of Nages'a Bhaṭṭa's annotations on Kaiyata's commentary on the Mahábháshya of Patañjali.

Beginning. (टी॰) नत्वा साम्बशिवं देवीं वागधिष्ठानिकां गुरून् ।
पाणिन्यादिमुनीन् वन्द्यान् पितरौ च सतीशिवौ ॥ १ ॥
नागेशभट्टो नागेशभाषितार्थविचक्षणः ।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः ॥ २ ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥ ३ ॥
नातिविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।
भाष्यप्रदीपव्याख्यानं कुर्वेऽहं तु यथामति ॥ ४ ॥
भाष्यं व्याचिकीर्षुः शिष्टाचारप्राप्तं मङ्गलं शिष्यशिक्षायै निबध्नाति । सर्वेति ।

End. (प्रारम्भे बहुदूरे मूलपाठोऽस्ति)
(मू॰) भावसाधनः करणसाधनो वाश्रयिष्यते इति नार्थः । सञ्ज्ञाद्वयविधानेन तेन विनापीष्टस्य सिद्धत्वात् ।

Colophon. इत्युपाध्यायजय्यटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य चतुर्थपादे चतुर्थमाह्निकम् । इति प्रथमाध्यायः समाप्तः ।
(टी॰) यथेति । ऐकपद्ये इति । एकपदे इत्यर्थः । भावसाधन इति । अत्र पक्षे खरवसानयोरित्यत्र बोद्ध + + + र्यमाश्रयणीयमिति शिवम् ॥ ११० ॥
इति श्रीकालोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्योते प्रथमस्य चतुर्थमाह्निकं, पा + + ध्यायश्च समाप्तः ।

विषयः । पूर्वभागे अष्टाध्याय्याः प्रथमाध्यायस्य पादद्वयस्थानां पाणिनीयसूत्राणां यद्भाष्यं, तस्य च यत् कैयटकृतव्याख्यानं तस्य विवरणं । विवरणमिदं किञ्चिदूनाष्टमाह्निकपर्यन्तं । अतोऽयं ग्रन्थः खण्डितः ।
मध्यभागे शेषभागे तृतीयचतुर्थपादगतानां पाणिनीयसूत्राणां यद्भाष्यं तस्य च यत् कैयटकृतव्याख्यानं तस्य विवरणं । मिलित्वा प्रथमाध्यायगतसर्वसूत्रभाष्यव्याख्याविवरणपर्यन्तमेवास्य ग्रन्थस्य पाठोऽस्ति ।

No. 1349. भगवद्गीताभाष्यं, वा श्रीमद्गीताभाष्यं ।

Substance, country-made paper, $11\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 32. Lines, 18—19—20 on a page. Extent, 1,520 s'lokas. Character, Nágara. Date, Sm. 1753. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Bhagavadgítá-bháshya. A commentary on the Bhagavad Gítá By A'nanda Tírtha.

Beginning. ॐ देवं नारायणं नत्वा सर्वदोषविवर्जितं ।
परिपूर्णं गुरून् स्वान् गीतार्थं वक्ष्यामि लेशतः ॥ १ ॥
नष्टधर्मज्ञानलोककृपालुभिर्ब्रह्मोपेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार ।

End. यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते । इति चोक्तम् ।
पूर्णाशेषमहाविष्णोर्गीतामाश्रित्य लेशतः ।
निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्येऽष्टादशोऽध्यायः ।

विषयः । भगवद्गीताव्याख्यानं ।

No. 1350. श्रीभगवद्गीतातात्पर्यनिर्णयः ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 28. Lines, 18—19—20 on a page. Extent, 1,330 s'lokas. Character, Nágara. Date, Sm. 1753. Place of deposit, Calcutta, Government of India. Appearance, old and decayed. Prose. Generally correct.

Bhagavadgítá-tátparya-nirṇaya. An essay on the philosophy of the Bhagavad Gíta, being an attempt to reduce the teachings of the Gítá to the principles of the Vedánta. By A'nanda Tírtha.

Beginning. ॐ समस्तगुणसम्पूर्णं सर्वदोषविवर्जितं ।
नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ॥
शास्त्रेषु भारतं सारं तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ।

End. मध्ये यत्तु तृतीयं मे तदनुभाग्यशः कृतः के ++++ निःशेषदोषरहितं कला नारखेलसद्गुणभूतिः स्वयम्भूसर्वासर्वादिवन्द्यं त्वां नौमि मे? ++++ ।

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये ++++ दशोऽध्यायः ॥ १८ ॥

विषयः । भगवद्गीतातात्पर्यव्याख्यानं ।

No. 1351. प्रयोगदीपिका।

Substance, country-made paper, 10¾ × 4¼ inches. Folia, 124. Lines, 10 on a page. Extent, 2,686 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Prayoga-dípiká. A compendium of the rules for the performance of the Soma Yága. The MS. is incomplete.

Beginning. ॐ अथ सोमप्रयोग उच्यते। सोम ओषधिविशेषः। तत्साध्यत्वात् कर्मनाम्नानेन मख्यमाणः सोमेन यक्ष्यमाणः। यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वानिष्टप्रथमयज्ञौ स्यातां स ऐन्द्राग्नेष्ट्वा सोमेन यजेत।

End. (खण्डितं।)

विषयः। सोमयागविधिः सोमप्राशनप्रतिज्ञान्तः। विधिरयं ग्रन्थस्यास्य खण्डितत्वादसम्पूर्णः।

No. 1352. प्रायश्चित्तमुक्तावली।

Substance, country-made paper, 13¼ × 5 inches. Folia, 21. Lines, 8—9 on a page. Extent, 566 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Práyas'chitta-muktávalí. A succinct account of the expiations ordained for the various kinds of offences and sins defined in the Smṛiti. By Divákara. The MS. is incomplete.

Beginning. यस्योदये मखभुजां प्रचरन्त्यशेषाः पुण्याः क्रियाः प्रतिदिनं हवनार्चनाद्याः।
सोऽयं तमिस्रदलनो दिशतामभीष्टं भानुस्त्रयीमयतनुः परिपूर्णरूपः॥ १॥
श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो महा-
नेनाकार्यविमुक्तके सुविधिना विश्वेश्वरस्थापना।
तत्पुत्रो विबुधाधिपः क्षितितले श्रीशङ्करस्तत्सुतो
जातो भाट्टनयेऽतुलः पृथुयशाः श्रीनीलकण्ठो बुधः॥ २॥
तत्पुत्रीतनयो दिवाकरकृती शास्त्रेष्वधीती पितु-
र्मीमांसानयकोविदः पुरभिदः क्षेत्राधिवासी सुधीः।
प्रायश्चित्तविनिर्णयामलमहामुक्तावलीं सन्मुदे
विस्पष्टं तनुते प्रणम्य महसां राशिं जगद्दोषकं ३॥

End. (खण्डितं)।

विषयः। महापातकोपपातकादिप्रायश्चित्तकथनं।

No. 1353. चातुर्मास्यसूत्रं, वा चातुर्मास्यप्रश्नः।

Substance, country-made paper, 9 × 3¾ inches. Folia, 12. Lines, 9—10—11 on a page. Extent, 270 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Corrected.

Ápastamba Sútra alias *Chaturmásya Sútra.* The Sútras of Ápastamba treating of the quadrimensial rite noticed under No. 1332. Vide ante, p. 335.

Beginning. अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते पूर्वस्मिन् पर्वणि पञ्च होतारं मनसानुद्रुत्याहवनीये स ग्रहं हुत्वान्वारम्भणीयामिष्टिं निर्वपति।

End. इत्येतद्वचनोऽभ्यासः पञ्चसांवत्सरिकेषु वैश्वानरपार्जन्या पञ्चहोता च नाभ्यावर्त्तेतैकोपक्रमत्वाद्यथान्वारम्भणीयायान्वरम्भणीयाय ॥ २२ ॥

Colophon. इति चातुर्मास्यप्रश्नः।

विषयः। अन्वारम्भणीयवरुणप्रघासादिचातुर्मास्यकर्त्तव्यकर्मविधिसूचनम्।

No. 1354. ताजिकसारटीका।

Substance, country-made paper, 12½ × 5½ inches. Folia, 32. Lines, 14 on a page. Extent, 1,113 s'lokas. Character, Nágara. Date, Sm. 1762. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tájika-sára-ṭiká. A commentary on the Tájikasára, a treatise on horoscopy. By Sámanta. The work was completed on the 10th of the waxing moon in the month of Phálguṇa of the S'aka year 1617, under the auspices of a prince named S'rìpati-Vishṇudása, who is said to have reigned in a country whose name reads something like Svekára purvára, but the letters are indistinct, and I cannot rely on the reading, nor guess what the names refer to.

Beginning. नियतेति । नीयते वर्षादिके वर्षमासादै सति जन्तोः प्राणिनः निश्चितं परं विपाकमेति फलतीत्यर्थः । तस्मात्कारणात्परिचिन्त्य विमृश्य वर्षजनितं फलं वक्ष्ये ।

End. वर्षे शैलहयाङ्कभूपरिमिते १६१७ मासे तथा फाल्गुने
पक्षे शुभ्रतरे तिथौ दशमिते श्रीखेटपूर्वा(प)रे ।
राज्ये श्रीपतिविष्णुदासनृपतेः खेरीभट्टेन्दे हरौ
वृत्तिं श्रीगुरुरत्न + + कृपया सामन्तनामाकरोत् ॥ १ ॥
गुरुवान्श्वरत्नाङ्कदीर्घायुर्वेङ्कनादयः ।
निरन्तरायशादेषा रचिता तनुताच्चिरम् ॥ २ ॥

Colophon. इति ताजिकसारटीका सोदाहरणा सम्पूर्णा ॥

विषयः । ताजिकसारस्य सोदाहृणं व्याख्यानं ।

No. 1355. चतुर्वर्गचिन्तामणिः ।

Substance, country-made paper, 12 × 5 inches. Folia, 103. Lines, 8—10—11 on a page. Extent, 3,086 s'lokas. Character, Nágara. Date, Sk. 1402. Place of deposit, Calcutta, Government of India. Appearance, old and decayed. Prose and verse. Generally correct.

Chaturvarga-chintámaṇi. A digest of Hindu law and ritual, in five parts. The 1st treats of Vrata, or fasts; the 2nd of Dána, or Benefactions; the 3rd of Kála or time appropriate for the celebration of ceremonial rites, the 4th of S'ráddha, or offerings to the manes, and the 5th of miscellaneous rites and observances. By Hemádri, Rájá of Deogar, who flourished in the thirteenth century, (Ante II. p. 47). It is generally believed that Vopadeva is the author of the work, and he was born in the S'aka year 1182. The MS. is a mere fragment, containing only a portion of the third part; but it is of great age being dated in the S'aka year 1402 = A. C. 1478, *i. e.*, nearly four hundred years ago. The second part of the work has been published by the Asiatic Society of Bengal, and the first is now in course of publication. Vide plate VII.

Beginning.

End. न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं ।
तस्मेवमेतत्सिद्धं, वचनमन्तरेण गौणकालग्रहणं न कार्यं । सति तु वचने गौणस्य तस्मात्परस्यापि कार्यमिति स्थितिः ।

Colophon. इति श्रीमहाराजाधिराजश्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारद-श्रीहेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ परिशेषखण्डे कालनिर्णये कालातिक्रम-विशेषकालनिर्णयः ।

विषयः । सांवत्सरिककालनिर्णयः । पुण्यतिथिनिर्णयादिश्च । अनध्यायनिर्णयादिः । ब्रह्म-चर्यादिकालाः । अग्निहोत्रादिकालाः । वास्तुप्रकरणं । प्रतिष्ठालक्षणकालादिः । देवपूजादिः । पवित्रारोपणादिः । पुष्पदाने विशेषकथनादिः । विष्णुशय-नादिकालनिर्णयः । कालातिक्रमे विशेषः ।

No. 1356. चातुर्मास्यहोत्रं, होत्रकल्पद्रुमीयं ।

Substance, country-made paper, 9 × $3\frac{3}{4}$ inches. Folia, 36. Lines, 9 on a page. Extent, 594 s'lokas. Character, Nágara. Date, Sм. 1874. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Cháturmásya-hotra. The ritual of the quadrimensial rite. By Govinda. The work is a section of a comprehensive treatise on Hindu rituals entitled *Hotra-kalpadruma.* Vide ante II. p. 244.

Beginning. अथ चातुर्मास्यानि । तेषां फाल्गुन्यां पौर्णमास्यामारम्भः । चातुर्मास्यस्य स्वरू-पन्तु । चतुर्मासीयो यज्ञ इत्यनुशासनाच्चतुर्षु मासेषु भवति इति व्युत्पत्त्या वैश्वदेववरुणप्रघासशाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि । इत्यादिः ।

End. कात्यायनमते । अग्निः सोमः सविता सविता सरस्वती पूषा शुनासीर इन्द्रं शुनासीरो वा वायुः सूर्यः पञ्च प्रयाजा इति ।

Colophon.. इति होत्रकल्पद्रुमे चातुर्मास्यहोत्रं समाप्तम् ।

विषयः । चातुर्मास्यकर्त्तव्यकतिपयेष्ट्यादिकथनं ।

No. 1357. गोपालविवेकः, सटीकः ।

Substance, country-made paper, $13\frac{1}{2}$ × $5\frac{1}{2}$ inches. Folia, 20. Lines, 9—10—11 on a page. Extent, 662 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Gopála-viveka. A poem in praise of devotion to Gopála, with a commentary. Anonymous.

Beginning. (टी०) यत्पादपद्ममिति । हे करुणानिधे तव चरणकमलस्य माहात्म्यं शेषोऽपि वक्तुं न शक्नोति । तथा श्रीभागवते । गायन् गुणान् दशशताननआदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् । एवम्भूतं पादपद्मं विहाय विषये मे बुद्धिः । कथम्भूतं पादपद्मं । इत्यादिः ।

(मू०) । यत्पादपद्मं मुनिभिश्च सेवितं नुतं विरिञ्च्यादिभिरर्चितं शुभम् ।
त्यक्त्वा परं तं विषयेषु बुद्धिः सुखी कथं स्यां करुणानिधेऽहं ॥ १ ॥

End. (मू०) यश्चेमां शृणुयाद्भक्त्या कथां कृष्णस्य धीमतः ।
स मुक्तः पातकैः सर्वैः प्रयाति भवनं हरेः ॥ ४२ ॥

(टी०) यश्चेमामिति । यो भक्तोऽभक्तो वा इमां कृष्णस्य कथां शृणुयात् । कथम्भूतस्य कृष्णस्य, धीमतः, विमलबुद्धेः, सर्वज्ञस्य, सः पातकोपपातकमहापातकैर्मुक्तः हरेर्भवनं वैकुण्ठाख्यं प्रयाति ॥ ४२ ॥

Colophon. इति गोपालविवेकस्य टीका समाप्ता ।

विषयः । गोपालविवेकव्याख्यानम् ।

No. 1358. विहारकारिका, वा चातुर्मास्यादिकारिका ।

